**यत्र नार्कविधुतारकदीप-ज्योतिषां प्रसरतां नावकाशः ।**
**ध्यानभिन्नतमसां मुदितात्मज्योतिषां तदपि भाति रहस्यम् ।।७।।**

જ્યાં સૂર્ય-ચંદ્ર-તારા કે દીપકોની જ્યોતિ પહોંચી શકતી નથી ત્યાં પણ ધ્યાનથી અજ્ઞાનરૂપી અંધકારને ભેદી આત્મજ્યોતિને પામનાર મહાત્માઓ રહસ્યને પામે છે. (૭)

**योजयत्यमितकालवियुक्तां, प्रेयसीं शमरतिं त्वरितं यत् ।**
**ध्यानमित्रमिदमेव मतं नः, किं परै र्जगति कृत्रिममित्रैः ।।८।।**

જગતને વિશે નકલી એવા મિત્રો વડે શું ? અમારે તો આ જગતમાં ધ્યાન જ એક મિત્ર સમાન છે કે, જે ધ્યાન અનંતકાળથી વિયોગ પામેલી પ્રશમરતિ નામની પત્નીને જલ્દીથી મેળવી આપે છે. (૮)

**वारितस्मरबलातपचारे, शीलशीतलसुगन्धिनिवेशे ।**
**उच्छ्रिते प्रशमतल्पनिविष्टो, ध्यानधाम्नि लभते सुखमात्मा ।।९।।**

કામના બળરૂપી તાપના પ્રવેશને અટકાવનાર, શીલની શીતલ સુગંધ જ્યાં પ્રવેશેલી છે તથા વિશાળ ધ્યાનરૂપી મહેલમાં પ્રશમરૂપી પલંગ ઉપર આત્મા સુખને પામે છે. (૯)

**शीलविष्टरदमोदकपाद्यप्रातिभार्घ्यसमतामधुपर्कैः ।**
**ध्यानधाम्नि भवति स्फुटमात्माहूतपूतपरमाऽतिथिपूजा ।।१०।।**

શીલરૂપી સિંહાસન, ઈન્દ્રિયના દમન રૂપી પગ ધોવા માટે પાણી, પ્રાતિભજ્ઞાન રૂપી અર્ધ્ય અને સમતા રૂપી મધુપર્ક વડે ધ્યાનરૂપી મહેલમાં પ્રત્યક્ષ રીતે આત્માની શ્રેષ્ઠ અતિથિપૂજા થાય છે. (૧૦)

**आत्मनो हि परमाऽऽत्मनि योऽभूद्, भेदबुद्धिकृत एव भेदः ।**
**ध्यानसन्धिकृदमुं व्यपनीय, द्रागभेदमनयोर्वितनोति ।।११।।**

આત્માનો પરમાત્મા વિશે જે ભેદબુદ્ધિથી કરાયેલો વિવાદ ઉત્પન્ન થયો છે, આ ધ્યાન નામના દૂતે તે વિવાદને દૂર કરીને જલ્દીથી આત્મા અને પરમાત્મા વચ્ચે અભેદ કર્યો છે અર્થાત્ ધ્યાનથી આત્મા એ જ પરમાત્મા સ્વરૂપ છે તેવું જણાય છે. (૧૧)

**क्वाऽमृतं विषभृते फणिलोके, क्व क्षयिण्यपि विधौ त्रिदिवे वा ।**
**क्वाऽप्सरोरतिमतां त्रिदशानाम्, ध्यान एव तदिदं बुधपेयम् ।।१२।।**

વિષથી ભરપૂર એવા નાગલોકમાં અમૃત ક્યાંથી હોય ? ક્રમશઃ નાશ પામતાં એવા ચંદ્રમાં અમૃત ક્યાંથી હોય ? અપ્સરાઓમાં રાગી એવા દેવોને દેવલોકમાં અમૃત ક્યાંથી હોય ? ખરેખર, પંડિતજનો વડે પીવા યોગ્ય અમૃત ધ્યાનમાં જ છે. (૧૨)

**गोस्तनीषु न सितासु सुधायां नाऽपि वनिताधरबिम्बे ।**
**तं रसं कमपि वेत्ति मनस्वी, ध्यानसम्भवधृतौ प्रथते यः ।।१३।।**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ધ્યાનથી ઉત્પન્ન થતી નિશ્ચલતામાં જે અપૂર્વરસ વિસ્તાર પામે છે તે રસને જ્ઞાનીઓ જ પામી શકે છે. પણ તેવો મધુરો રસ દ્રાક્ષમાં, સાકરમાં, અમૃતમાં કે પ્રિયાના આશ્લેષમાં પણ નથી. (૧૩)

**इत्यवेत्य मनसा परिपक्वध्यानसम्भवफले गरिमाणम् ।**
**तत्र यस्य रतिरेनमुपैति, प्रौढधामभृतमाशु यशःश्रीः ।।१४।।**

આ રીતે પરિપકવ-શ્રેષ્ઠ ધ્યાનથી ઉત્પન્ન થતાં ફળમાં રહેલી મહત્તા મન વડે જાણીને તેમાં જેને રતિ ઉત્પન્ન થાય છે. તે પ્રોઢ તેજસ્વી મહાત્માને યશરૂપી લક્ષ્મી શીઘ્ર પ્રાપ્ત થાય છે. (૧૪)

## ।। आज्ञाविचयधर्मध्यानम् ।।

*नयभङ्गप्रमाणाढ्यां, हेतूदाहरणान्विताम् ।*
*आज्ञां ध्यायेज्जिनेन्द्राणामप्रामाण्याकलङ्किताम् ।।*

## ।। अपायविचयधर्मध्यानम् ।।

*राग-द्वेष-कषायादिपीडितानां जनुष्मताम् ।*
*ऐहिकामुष्मिकांस्तांस्तान्नानाऽपायान् विचिन्तयेद् ।।*

## ।। विपाकविचयधर्मध्यानम् ।।

*ध्यायेत्कर्मविपाकं च, तं तं योगानुभावजम् ।*
*प्रकृत्यादिचतुर्भेदं, शुभाशुभविभागतः ।।*
*प्रतिक्षणसमुद्भूतो, यत्र कर्मफलोदयः ।*
*चिन्त्यते चित्ररूपः स विपाकविचयो मतः ।।*

## ।। संस्थानविचयधर्मध्यानम् ।।

*उत्पाद-स्थिति-भङ्गादिपर्यायैर्लक्षणैः पृथक् ।*
*भेदैर्नामादिभिर्लोकसंस्थानं चिन्तयेद् भृशम् ।।*
*अनाद्यनन्तस्य लोकस्य, स्थित्युत्पत्तिव्ययात्मनः ।*
*आकृतिं चिन्तयेद् यत्र, संस्थानविचयः स तु ।।*

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

याकिनीमहत्तराधर्मसूनु-समर्थशास्त्रकारशिरोमणि-श्रीमद्धरिभद्रसूरिविरचितवृत्त्या समन्वितं
भगवच्छ्रीमद् **जिनभद्रगणि**क्षमाश्रमणविरचितं

# ध्यानशतकम् ।

*ध्यानशतकस्य च महार्थत्वाद्वस्तुतः शास्त्रान्तरत्वात् प्रारम्भ एव विघ्नविनायकोपशान्तये मङ्गलार्थमिष्टदेवतानमस्कारमाह -

**वीरं सुक्कज्झाणग्गिदड्ढकम्मिंधणं पणमिऊणं ।**
**जोईसरं सरण्णं झाणज्झयणं पवक्खामि ।।१।।**

**वीरं० गाहा ।।** वीरं[१] शुक्लध्यानाग्निदग्धकर्मेन्धनं प्रणम्य ध्यानाध्ययनं प्रवक्ष्यामीति योगः। तत्र 'ईर गति-प्रेरणयोः' इत्यस्य विपूर्वस्याजन्तस्य विशेषेण ईरयति कर्म गमयति याति वेह शिवमिति वीरस्तं **वीरम्** ।

---

* प्रतिक्रमामि चतुर्भिर्ध्यानैः कारणभूतैरश्रद्धेयादिना प्रकारेण योऽतिचारः कृतः, तद्यथा- आर्तध्यानेन ४, तत्र ध्यातिर्ध्यानमिति भावसाधनः, तत्पुनः कालतोऽन्तर्मुहूर्तमात्रम्, भेदतस्तु चतुष्प्रकारमार्तादिभेदेन, ध्येयप्रकारास्त्वमनोज्ञविषयसम्प्रयोगादयः, तत्र शोकाक्रन्दनविलपनादिलक्षणमार्त्तं तेन, उत्सन्नवधादिलक्षणं रौद्रं तेन, जिनप्रणीतभावश्रद्धानादि लक्षणं धर्म्यं तेन, अवधासम्मोहादिलक्षणं शुक्लं तेन । फलं पुनस्तेषां हि तिर्यग्नरकदेवगत्यादिमोक्षाख्यमिति क्रमेण, अयं ध्यानसमासार्थः। व्यासार्थस्तु ध्यानशतकादवसेयः, तच्चेदम्- ध्यानशतकस्य च महार्थत्वाद्वस्तुतः x x x।। **—आव. नि. हा. ।।**

[१] A विशेषेण ईरयति क्षिपति कर्माणीति वीरः,
'विदारयति यत् कर्म तपसा च विराजते । तपोवीर्येण युक्तश्च तस्माद् वीर इति स्मृतः ।।'
इति लक्षणान्निरूक्ताद्वा वीरः । x x x **—योगशास्त्र, प्र. १ वृत्तौ ।।**

B 'शूर वीर विक्रान्तौ' कषायादिमहाशत्रुसैन्यजयाद् महाविक्रान्तो महावीरः,
–यदि वा 'ईर गतौ' कियत्क्षपितकर्मसाध्वपेक्षया विशेषत ईरयति-क्षपति-तिरस्करोत्यशेषाण्यपि कर्माणीति वीरः,
–अथवा विशेषत ईरयति-शिवपदं प्रति भव्यजन्तून् गमयतीति वीरः,
–यदि वा विशेषतः शिवपदं स्वयमियति-गच्छतीति वीरः,
–अथवा 'दृ-विदारणे' विदारयति कर्मरिपुसंघट्टमिति वीरः,
–अनन्यानुभूतमहातपःश्रिया वा विराजत इति वीरः,
–अन्तरङ्गमोहमहाबलनिर्दलनार्थमनन्तं तपोवीर्यं व्यापारयतीति वा वीरः,
उक्तं च- "विदारयति यत्कर्म तपसा च विराजते ।
तपोवीर्येण युक्तश्च तस्माद् वीर इति स्मृतः ।।" x x x ।। १०५७ ।। **—विशेषा. हेम. वृत्तौ ।।**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

किंविशिष्टमिति[a] ? अत आह - शुचं क्लमयतीति **शुक्लम्** शोकं ग्लपयतीत्यर्थः, ध्यायते-चिन्त्यतेऽनेन तत्त्वमिति **ध्यानम्** एकाग्रचित्तनिरोध इत्यर्थः, शुक्लं च तद् ध्यानं च तदेव कर्मेन्धनदहना**दग्निः** शुक्लध्यानाग्निः, तथा [२]मिथ्यादर्शना-ऽविरति-प्रमाद-कषाय-योगैः क्रियते इति [३]**कर्म** ज्ञानावरणीयादि, तदेवातितीव्रदुःखानलनिबन्धनत्वा**दिन्धनं** कर्मेन्धनम्, ततश्च शुक्लध्यानाग्निना **दग्धं** स्वस्वभावापनयनेन भस्मीकृतं कर्मेन्धनं येन स तथाविधस्तम्। **प्रणम्य** प्रकर्षेण मनोवाक्काययोगैर्नत्वेत्यर्थः[b], किम् ? समानकर्तृकयोः पूर्वकाले क्त्वाप्रत्ययविधानात्, **ध्यानाध्ययनं प्रवक्ष्यामी**ति योगः, तत्राधीयत इत्यध्ययनम्, 'कर्मणि ल्युट्' पठ्यत इत्यर्थः, ध्यानप्रतिपादकमध्ययनं ध्यानाध्ययनम्, तद् याथात्म्यमङ्गीकृत्य प्रकर्षेण वक्ष्ये-अभिधास्ये[c] ।

---

**२** **मू॰ मिथ्यादर्शनाऽविरतिप्रमादकषाययोगा बन्धहेतवः ।। ८-१ ।।**

**भा॰ मिथ्यादर्शनमविरतिः प्रमादः कषाया योगा इत्येते पञ्च बन्धहेतवो भवन्ति । तत्र सम्यग्दर्शनाद् विपरीतं मिथ्यादर्शनम्। तद् द्विविधम्- अभिगृहीतमनभिगृहीतं च । तत्राभ्युपेत्यासम्यग्दर्शनपरिग्रहः अभिगृहीतमज्ञानिकादीनां त्रयाणां त्रिषष्ठीनां कुवादिशतानाम्, शेषमनभिगृहीतम् । यथोक्ताया [हिंसानृतस्तेयाब्रह्मपरिग्रहेभ्यो विरतिर्व्रतम्।। ७-१ ।।] विरतेर्विपरीताऽविरतिः। प्रमादः - स्मृत्यनवस्थानम्, कुशलेष्वनादरो योगदुष्प्रणिधानं चेत्येष प्रमादः । कषाया मोहनीये [अ. ८, सू. १०] वक्ष्यन्ते। योगस्त्रिविधः पूर्वोक्तः [कायवाङ्मनःकर्म योगः ।। ६-१ ।।] —तत्त्वार्थसूत्रे ।।**

**३** A **कम्मं च चित्तपोग्गलरूवं जीवस्सऽणाइसंबद्धं ।**
**मिच्छत्तादिनिमित्तं णाएणमतीयकालसमं ।। ५४ ।। —योगशतके ।।**

B **सिरिवीरजिणं वंदिय, कम्मविवागं समासओ वुच्छं ।**
**कीरइ जिएण हेऊहिं जेण तो भण्णए कम्मं ।। १ ।।**

**वृ॰** x x x तत्र कर्मशब्दं व्युत्पादयन्नाह-**क्रियते** विधीयतेऽञ्जनचूर्णपूर्णसमुद्गकवन्निरन्तरपुद्गलनिचिते लोके क्षीरनीरन्यायेन वह्न्ययःपिण्डवद्वा कर्मवर्गणाद्रव्यमात्मसम्बद्धं **येन** कारणेन **तत**स्तस्मात् कारणात् **कर्म भण्यत** इति सम्बन्धः । x x x कैः कृत्वा जीवेन क्रियते ? इत्याह-**हेतुभि**र्मिथ्यात्वाविरति-कषाययोगलक्षणैश्चतुर्भिः सामान्यरूपैः,

"पडिणीयत्तण निन्हव, **उवघाय पओस** अंतराएण । अच्चासायणयाए, आवरणदुगं जिओ जयइ ।।" इत्यादिभिर्विशेषप्रकारैरिहैव [गा. ५३] वक्ष्यमाणैः । तदयमत्र तात्पर्यार्थः-क्रियते जीवेन हेतुभिर्येन कारणेन ततः कर्म भण्यत इति । x x x ।। १ ।। —**प्रथमकर्मग्रन्थे** ।।

किंविशिष्टं वीरं प्रणम्येत्यत आह-**योगेश्वरं योगीश्वरं वा** तत्र युज्यन्ते इति [४]योगाः मनोवाक्कायव्यापारलक्षणास्तैरीश्वरः प्रधानस्तम्, तथाहि-[५]अनुत्तरा एव भगवतो मनोवाक्कायव्यापारा इति, यथोक्तम् –

---

**४** **मू० कायवाङ्मनःकर्म योगः ।। ६-१ ।।**

**भा० कायिकं कर्म, वाचिकं कर्म, मानसं कर्म इत्येष त्रिविधो योगो भवति । कायात्मप्रदेशपरिणामो गमनादिक्रियाहेतुः काययोगः । भाषायोग्यपुद्गलात्मप्रदेशपरिणामो वाग्योगः । मनोयोग्यपुद्गलात्म-प्रदेशपरिणामो मनोयोगः ।। —तत्वार्थसूत्रे ।।**

**५** **सव्वसुरा जइ रूवं अंगुट्ठपमाणयं विउव्वेज्जा ।**
**जिणपायंगुट्ठं पइ ण सोहए तं जहिंगालो ।। ५६९ ।।**

**गणहर आहार अणुत्तरा(य) जाव वण चक्कि वासु बला ।**
**मण्डलिया ता हीणा छट्ठाणगया भवे सेसा ।। ५७०।।**

**संघयण रूव संठाण वण्ण गइ सत्त सार उस्सासा ।**
**एमाइणुत्तराइं हवंति नामोदए तस्स ।। ५७१ ।।**

**पगडीणं अण्णासु वि पसत्थ उदया अणुत्तरा होंति ।**
**खयउवसमेऽवि य तहा खयम्मि अविगप्पमाहंसु ।।५७२।।**

**अस्सायमाइयाओ जावि य असुहा हवंति पगडीओ ।**
**णिंबरसलवोव्व पए ण होंति ता असुहया तस्स ।।५७३।।**

**धम्मोदएण रूवं करेंति रूवस्सिणोऽवि जइ धम्मं ।**
**गिज्झवओ य सुरूवो पसंसिमो तेणं रूवं तु ।। ५७४।।**

**कालेण असंखेणवि संखातीताण संसईणं तु ।**
**मा संसयवोच्छित्ती न होज्ज कमवागरणदोसा ।। ५७५ ।।**

**सव्वत्थ अविसमत्तं रिद्धिविसेसो अकालहरणं च ।**
**सव्वण्णुपच्चओऽवि य अचिंतगुणभूतिओ जुगवं ।। ५७६।।**

**वासोदयस्स व जहा वण्णादी होंति भायणविसेसा ।**
**सव्वेसिंपि सभासा जिणभासा परिणमे एवं ।। ५७७।।**

**साहारणासवत्ते तदुवओगो उ गाहगगिराए ।**
**न य निव्विज्जइ सोया किढिवाणियदासिआहरण ।। ५७८ ।।**

**सव्वाउअंपि सोया खवेज्ज जइ हु सययं जिणो कहए ।**
**सीउण्हखुप्पिवासापरिस्समभए अविगणेंतो ।। ५७९।। —आवश्यकनिर्युक्तौ ।।**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

"दव्वमणोजोएणं मणणाणीणं अणुत्तराणं च ।
संसयवोच्छित्तिं केवलेण नाउण सइ कुणइ ।।१।।

रिभियपयक्खरसरला मिच्छितरतिरिच्छसगिरपरिणामा ।
मणणिव्वाणी वाणी जोयणनिहारिणी जं च ।।२।।

एक्का च अणेगेसिं संसयवोच्छेयणे अपडिहदा ।
न य णिव्विज्जइ सोया तिप्पइ सव्वाउएणंपि ।।३।।

सव्वसुरेहिंतोवि हु अहिगो कंतो य कायजोगो से ।
तहवि य पसंतरूवे कुणइ सया पाणिसंघाए ।।४।।" [ ] इत्यादि,

युज्यते वाऽनेन केवलज्ञानादिना आत्मेति योगः-धर्मशुक्लध्यानलक्षणः[६], स येषां विद्यत इति योगिनः-साधवस्तैरीश्वरः, तदुपदेशेन तेषां प्रवृत्तेस्तत्सम्बन्धादिति, तेषां वा ईश्वरो योगीश्वरः, ईश्वरः प्रभुः स्वामीत्यनर्थान्तरम्, तं योगीश्वरम्, अथवा योगिस्मर्य-योगिचिन्त्यं ध्येयमित्यर्थः।

पुनरपि स एव विशिष्यते-**शरण्यम्** तत्र शरणे साधुः शरण्यस्तम्, रागादि-परिभूताश्रितसत्त्ववत्सलं रक्षकमित्यर्थः[७], ध्यानाध्ययनं प्रवक्ष्यामीत्येतद् व्याख्यातमेव ।

---

६ A युजेः समाधिवचनस्य योगः, समाधिः, ध्यानमित्यनर्थान्तरम् ।। —**तत्वार्थवार्त्तिके ६,१,१२ ।।**

B **योगो ध्यानं समाधिश्च, धीरोधः स्वान्तनिग्रहः।**
**अन्तःसंलीनता चेति, तत्पर्यायाः स्मृता बुधैः।।** —**आदिपुराणे, २१-१२।।**

C **प्रत्याहृत्य यदा चिन्तां नानालम्बनवर्तिनीम् ।**
**एकालम्बन एवैनां निरूणद्धि विशुद्धधीः ।। ६० ।।**

**तदास्य योगिनो योग-श्चिन्तैकाग्रनिरोधनम् ।**
**प्रसंख्यानं समाधिः स्याद्, ध्यानं स्वेष्टफलप्रदम्।। ६१ ।।** —**तत्त्वानुशासने ।।**

७ **चउसरणगमण दुक्कडगरहा** x x x ।।५०।।

**वृ० चतुःशरणगमनम्** = अर्हत्-सिद्ध-साधु-केवलिप्रज्ञप्तधर्मशरणगमनम्, आचार्योपाध्याययोः साधुष्वेवान्तर्भावात्, केवलिप्रज्ञप्तधर्मस्य चानादित्वेन पृथगुपादानात् । न ह्यतश्चतुष्टयादन्यच्छरण्यमस्ति, गुणाधिकस्य शरण्यत्वात्, गुणाधिकत्वेनैव ततो रक्षोपपत्तेः, रक्षा चेह तत्तत्स्वभावतया एवाभिध्यानतः क्लिष्टकर्मविगमेन शान्तिरिति । x x x ।।५०।। —**योगशतके ।।**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अत्राऽऽह-यः [f]शुक्लध्यानाग्निदग्धकर्मेन्धनः स योगेश्वर एव, यश्च योगेश्वरः स शरण्य एवेति गतार्थे विशेषणे, न, अभिप्रायापरिज्ञानात्, [g]इह च शुक्लध्यानाग्निदग्धकर्मेन्धनः सामान्यकेवल्यपि भवति, न त्वसौ योगेश्वरो वाक्कायातिशयाभावात्, स एव च तत्त्वतः शरण्य इति ज्ञापनार्थमेवादुष्टमेतदपि ।

तथा [h]चोभयपदव्यभिचारे एकपदव्यभिचारेऽज्ञातज्ञापनार्थं च शास्त्रे विशेषणाभिधान-मनुज्ञातमेव [i]पूर्वमुनिभिरित्यलं विस्तरेणेति गाथार्थः ।।१।।

साम्प्रतं ध्या[a]नाध्यानलक्षणप्रतिपादनायाऽऽह -

**[१]जं थिरमज्झवसाणं तं झाणं जं चलं तयं चित्तं ।**
**तं होज्ज भावणा वा अणुपेहा वा अहव चिंता ।।२।।**

**जं थिरं० गाहा ।। यद्** इत्युद्देशः **स्थिरम्** निश्चलम्, **अध्यवसानम्** मन [b]एकाग्रालम्बनमित्यर्थः, **तद्** इति नि[c]र्देशः, **ध्यानम्** प्राग्निरूपितशब्दार्थम्। ततश्चैतदुक्तं भवति-यत् स्थिरमध्यवसानं तद् ध्यानमभिधीयते[२]। **यच्चलम्** इति यत् पुनरनवस्थितं

---

[१] A **स्थिरमध्यवसानं यत्, तद् ध्यानं चित्तमस्थिरम् ।**
**भावना चाप्यनुप्रेक्षा, चिन्ता वा तत् त्रिधा मतम् ।। १ ।।** —**अध्यात्मसारे, अ. १६ ।।**

B **एकचिन्तानिरोधो य-स्तद्ध्यानं भावनाः पराः ।**
**अनुप्रेक्षार्थचिन्ता वा, ध्यानसन्तानमुच्यते ।। ६६ ।।** —**ध्यानदीपिकायाम्।।**

[२] A **अव०** x x x ध्यानं पुनर्निश्चल एवाशुभः शुभो वा आत्मनः परिणामः । तथा चाह-
**झाणेण होइ लेसा, झाणंतरओ व होइ अन्नयरी ।**
**अज्झवसाओ उ दढो, झाणं असुभो सुभो वा वि ।। १६४० ।।**

**वृ०** लेश्या द्विविधो-द्रव्यतो भावतश्च । तत्र द्रव्यलेश्यामुपरिष्टाद् वक्ष्यति । भावलेश्या त्वनन्तरोक्त एव शुभाशुभरूपो जीवपरिणामः। सा चैवंविधा शुभाशुभपरिणामरूपा कृष्णादीनामन्यतमा **'लेस'**त्ति भावलेश्या **ध्यानेन** वा **भवति ध्यानान्तरतो वा** । ध्यानान्तरं नाम-अदृढाध्यवसायरूपा चिन्ता, यद्वा ध्यानस्य ध्यानस्य चान्तरिका ध्यानान्तरमुच्यते । **ध्यानं पुनः दृढो** निश्चलो**ऽध्यवसायोऽशुभो वा शुभो वा** मन्तव्यम् । स च निश्चलोऽध्यवसायो मानसो वाचिकः कायिकश्चेति त्रिधा द्रष्टव्यः। दृढश्चाध्यवसायोऽन्तर्मुहूर्त्तमात्रमेव कालं यावद् द्रष्टव्यः, परतो निरन्तरं दृढाध्यवसायस्य कर्तुमशक्यत्वात्। यश्चादृढोऽध्यवसायः स सर्वोऽपि चिन्तेत्यभिधीयते ।। १६४० ।।

**अव०** आह - यद्येवं तर्हि चिन्ता-ध्यानयोरन्यत्वमापन्नम्? उच्यते- नायमेकान्तः, किन्तु स्यादेकत्वं स्यादन्यत्वम्। कथं पुनः? इति उच्यते-

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**झाणं नियमा चिंता, चिंता भइया उ तीसु ठाणेसु ।**
**झाणे तदंतरम्मि उ, तव्विवरीया व जा काइ ।। १६४१ ।।**

वृ० यन्मनःस्थैर्यरूपं **ध्यानं** तद् **नियमात् चिन्ता** । **चिन्ता तु भक्ता** विकल्पिता **त्रिषु स्थानेषु।** तथाहि- कदाचिद् **ध्याने** ध्यानविषया चिन्ता भवति यदा दृढाध्यवसायेन चिन्तयति । **'तदंतरम्मि उ'** त्ति तस्य ध्यानस्यान्तरं तदन्तरं तस्मिन् वा चिन्ता भवेत्, ध्यानान्तरिकायामित्यर्थः। **तद्विपरीता वा या काचिद्** ध्याने ध्यानान्तरिकायां वा नावतरति किन्तु विप्रकीर्णा चित्तचेष्टा साऽपि चिन्ता प्रतिपत्तव्या। अतो यदा दृढाध्यवसायेन चिन्तयति तदा चिन्ताध्यानयोरेकत्वम्, अन्यदा पुनरन्यत्वम् ।।१६४१।।

भा० लेश्या द्विविधा-द्रव्यतो भावतश्च । तत्र द्रव्यलेश्यामुपरिष्टाद् वक्ष्यति । भावलेश्या त्वनन्तरोक्त एवात्मनो मानसिकः परिणामः, स च मानसध्यानादनन्य इतिकृत्वाऽभिधीयते । **ध्यानेन** आर्त्तादिना करणभूतेन **लेश्या** कृष्णादिका **भवति,** यदा यादृशं प्रशस्तमप्रशस्तं वा ध्यानं भवति तदा तादृगेव प्रशस्ता अप्रशस्ता वा लेश्याऽपीति भावः । **'झाणंतरओ व'** त्ति ध्यानान्तरम्-अदृढाध्यवसायरूपं चित्तं यद्वा ध्यानस्य ध्यानस्य चान्तरिका ध्यानान्तरमुच्यते, तत्र वा वर्त्तमानस्य षण्णां लेश्याना**मन्यतरा** लेश्या **भवति** । अथ ध्यानमिति कोऽर्थः? इत्याह- **अध्यवसायो दृढो** निश्चलो**ऽशुभो** वा **शुभो वा ध्यान**मिति मन्तव्यम् । दृढश्चाध्यवसायोऽन्तर्मुहूर्त्तमात्रमेव कालं यावद् द्रष्टव्यः, परतो निरन्तरं दृढाध्यवसायस्य कर्त्तुमशक्यत्वात्। यश्चादृढोऽध्यवसायः स सर्वोऽपि चिन्तेत्यभिधीयते न तु ध्यानम् ।। १६४० ।। आह-यद्येवं तर्हि चिन्ता ध्यानयोरन्यत्वमुपपन्नम् ? उच्यते- नायमेकान्तः, किन्तु स्यादेकत्वं स्यादन्यत्वम्। कथं पुनः? इति उच्यते । x x x ।।१६४१।। **—बृहत्कल्पसूत्रे** ।।

B अव० इत्थं सामान्येन भेदपरिमाणे दर्शिते सत्याह चोदकः, ननु कार्योत्सर्गकरणे कः पुनर्गुण इत्याहाचार्यः-

**देहमइजड्डसुद्धी सुहदुक्खतितिक्खया अणुप्पेहा ।**
**झायइ य सुहं झाणं एयग्गो काउसग्गंमि ।। १४६२ ।।**

वृ० **'देहमतिजड्डसुद्धी'**ति देहजाड्यशुद्धिः-श्लेष्मादिप्रहाणतः, मतिजाड्यशुद्धिस्तथावस्थितस्योपयोगविशेषतः, **'सुहदुक्खतितिक्खय'त्ति** सुखदुःखतितिक्षा सुखदुःखातिसहनमित्यर्थः, **'अणुप्पेहा'** अनित्यत्वाद्यनुप्रेक्षा च तथाऽवस्थितस्य भवति, तथा **'झायइ य सुहं झाणं'** ध्यायति च शुभं ध्यानं धर्मशुक्ललक्षणम्, **एकाग्रः** एकचित्तः शेषव्यापाराभावात् **कायोत्सर्ग** इति। इहानुप्रेक्षा ध्यानादौ ध्यानोपरमे भवतीतिकृत्वा भेदेनोपन्यस्तेति गाथार्थः ।। १४६२ ।।

अव० इह ध्यायति च शुभं ध्यानमित्युक्तम्, तत्र किमिदं ध्यानमित्यत आह-

**अंतोमुहुत्तकालं चित्तस्सेगग्गया हवइ झाणं ।**
**तं पुण अट्टं रुद्दं धम्मं सुक्कं च नायव्वं ।। १४६३ ।।**

वृ० **'अंतोमुहुत्तकालं'** द्विघटिको मुहूर्त्तः, भिन्नो मुहूर्त्तोऽन्तमुहूर्त इत्युच्यते, अन्तर्मुहूर्त्तकालं **चित्तस्यैकाग्रता भवति ध्यानं** 'एकाग्रचित्तनिरोधो ध्यान'मितिकृत्वा [तत्त्वार्थे, अ०९, सूत्र २७] । **तत् पुनरार्त्तं रौद्रं धर्मं शुक्लं च ज्ञातव्यमि**त्येषां च स्वरूपं यथा प्रतिक्रमणाध्ययने प्रतिपादितं तथैव द्रष्टव्यमिति गाथार्थः।।१४६३।।

**तत्थ य दो आइल्ला झाणा संसारवड्डणा भणिया ।**
**दुन्नि य विमुक्खहेऊ तेसिऽहिगारो न इयरेसिं ।। १४६४।।**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**संवरियासवदारा अव्वाबाहे अकंटए देसे ।**
**काऊण थिरं ठाणं ठिओ निसन्नो निवन्नो वा ।। १४६५ ।।**
**चेयणमचेयणं वा वत्थुं अवलंबिउं घणं मणसा ।**
**झायइ सुअमत्थं वा दवियं तप्पज्जए वावि ।। १४६६ ।।**

वृ० **'तत्थ य दो आइल्ला'** गाथा निगदसिद्धा । साम्प्रतं यथाभूतो यत्र यथावस्थितो यच्च ध्यायति तदेतदभिधित्सुराह- **'संवरियासवदार'त्ति** संवृतानि-स्थगितानि आश्रवद्वाराणि-प्राणातिपातादीनि येन स तथाविधः, क्व ध्यायति? **'अव्याबाधे अकंटए देसे'त्ति** अव्याबाधे-गान्धर्वादिलक्षणभावव्याबाधाविकले अकण्टके-पाषाणकण्टकादिद्रव्यकण्टकविकले **देशे** भूभागे, कथं व्यवस्थितो ध्यायति?- **'काऊण थिरं ठाणं ठिओ निसण्णो निवन्नो वा'** कृत्वा स्थिरं-निष्कम्पं (अव)स्थानम्-अवस्थितिविशेषलक्षणं स्थितो निषण्णो निवण्णो वेति प्रकटार्थम्, **चेतनं**-पुरुषादि **अचेतनं**-प्रतिमादि **वस्तु अवलम्ब्य**- विषयीकृत्य **घनं**-दृढं **मनसा**-अन्तःकरणेन यद् ध्यायति, किम्? तदाह-**'झायति सुयमत्थं वा'** ध्यायतीति सम्बध्यते, सूत्रं-गणधरादिभिर्बद्धम् अर्थं वा-तद्गोचरम्, किंभूतमर्थमत आह-**'दवियं तप्पज्जवे वावि'** द्रव्यं तत्पर्यायान् वा, इह च यदा सूत्रं ध्यायति तदा तदेव स्वगतधर्मैरालोचयति, न त्वर्थम्, यदा त्वर्थं न तदा सूत्रमिति गाथार्थः ।। १४६४-१४६६ ।।

अव० अधुना प्रागुक्तचोद्यपरिहारायाह-

**तत्थ उ भणिज्ज कोई झाणं जो माणसो परीणामो ।**
**तं न हवइ जिणदिट्ठं झाणं तिविहेवि जोगंमि ।।१४६७।।**

वृ० **तत्र भणेद्**-ब्रूयात् **कश्चित्**, किं ब्रूयादित्याह-**'झाणं जो माणसो परीणामो'** ध्यानं यो मानसः परीणामः, 'ध्यै चिन्तायां'मित्यस्य चिन्तार्थत्वात्, इत्थमाशङ्क्योत्तरमाह-**'तं न भवति जिणदिट्ठं झाणं तिविहेवि जोगंमि'** तदेतन्न भवति यत् परेणाभ्यधायि, कुतः? यस्माज्जिनैर्दृष्टं ध्यानं त्रिविधेऽपि योगे-मनोवाक्कायव्यापारलक्षण इति गाथार्थः ।। १४६७ ।।

अव० किं तु? कस्यचित् कदाचित् प्राधान्यमाश्रित्य भेदेन व्यपदेशः प्रवर्त्तते, तथा चामुमेव न्यायं प्रदर्शयन्नाह-

**वायाईधाऊणं जो जाहे होइ उक्कडो धाऊ ।**
**कुविओत्ति सो पवुच्चइ न य इअरे तत्थ दो नत्थि ।। १४६८ ।।**

वृ० **'वायाईधाऊणं'** वातादिधातूनाम् आदिशब्दात् पित्तश्लेष्मणोर्यो **यदा भवत्युत्कटः** प्रचुरो **धातुः कुपित इति स प्रोच्यते** उत्कटत्वेन प्राधान्यात्, **'न य इतरे तत्थ दो नत्थि त्ति'** न चेतरौ तत्र द्वौ न स्त इति गाथार्थः ।। १४६८ ।।

**एमेव य जोगाणं तिण्हवि जो जाहि उक्कडो जोगो ।**
**तस्स तहिं निद्देसो इअरे तत्थिक्क दो व नवा ।। १४६९ ।।**

वृ० **'एमेव य जोगाणं'** एवमेव च योगानां-मनोवाक्कायानां **त्रयाणामपि यो यदा उत्कटो योगस्तस्य** योगस्य **तदा** तस्मिन् काले **निर्देशः, 'इयरे तत्थेक्क दो व णवा'** इतरस्तत्रैको भवति द्वौ वा भवतः, न वा भवत्येव, इयमत्र भावना-केवलिनोः वाचि उत्कटायां कायोप्यस्ति, अस्मदादीनां तु मनः कायो न वेति, केवलिनः शैलेश्यवस्थायां काययोगनिरोधकाले स एव केवल इति, अनेन च शुभयोगोत्कटत्वं

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तथा निरोधश्च द्वयमिति[मपि] ध्यानमित्यावेदितव्यमिति गाथार्थः ।। १४६९ ।।

**अव०** इत्थं य उत्कटो योगस्तस्यैवेतरसद्भावेऽपि प्राधान्यात् सामान्येन ध्यानत्वमभिधायाधुना विशेषेण त्रिप्रकारमप्युपदर्शयन्नाह-

**काएवि य अज्झप्पं वायाइ मणस्स चेव जह होइ ।**
**कायवयमणोजुत्तं तिविहं अज्झप्पमाहंसु ।। १४७० ।।**

**वृ०** **'काएवि य'** कायेऽपि च **अध्यात्मम्** अधि आत्मनि वर्त्तत इति अध्यात्मं ध्यानमित्यर्थः, एकाग्रतया एजनादिनिरोधात्, **'वायाए'त्ति** तथा वाचि अध्यात्मं एकाग्रतयैवायतभाषानिरोधात्, **'मणस्स चेव जह होइ'त्ति** मनसश्चैव यथा भवत्यध्यात्मम् एवं कायेऽपि वाचि चेत्यर्थः, एवं भेदेनाभिधायाधुनैकादावपि दर्शयन्नाह-**कायवाङ्मनोयुक्तं त्रिविधमध्यात्ममाख्यातवन्तस्तीर्थं**करा गणधराश्च, वक्ष्यते च- "भंगिअसुतं गुणंतो वट्टति तिविहेवि झाणंमि"त्ति गाथार्थः ।। १४७० ।।

**अव०** पराभ्युपगतध्यानसाम्यप्रदर्शनेनानभ्युपगतयोरपि ध्यानतां प्रदर्शयन्नाह-

**जइ एगग्गं चित्तं धारयओ वा निरूंभओ वावि ।**
**झाणं होइ नणु तहा इअरेसुवि दोसु एमेव ।। १४७१ ।।**

**वृ०** **जइ एगग्गं** गाहा, हे आयुष्मन्! **यदप्येकाग्रं चित्तं** क्वचिद् वस्तुनि **धारयतो वा** स्थिरतया देहव्यापिविषवद् डङ्क इति **'निरुंभओ वावि'त्ति** निरुन्धानस्य वा तदपि योगनिरोध इव केवलिनः किमित्याह-**ध्यानं भवति** मानसं यथा **ननु तथा इतरयोरपि द्वयोर्वा**क्काययोः, **एवमेव** - एकाग्रधारणादिनैव प्रकारेण तल्लक्षणयोगाद् ध्यानं भवतीति गाथार्थः ।। १४७१ ।।

**अव०** इत्थं त्रिविधे ध्याने सति यस्य यदोत्कटत्वं तस्य तदेतरसद्भावेऽपि प्राधान्याद् व्यपदेश इति, लोकलोकोत्तरानुगतश्चायं न्यायो वर्त्तते, तथा चाह-

**देसियदंसियमग्गो वच्चंतो नरवई लहइ सद्दं ।**
**रायत्ति एस वच्चइ सेसा अणुगामिणो तस्स ।। १४७२ ।।**

**वृ०** इत्थं त्रिविधे ध्याने सति यस्य यदोत्कटत्वं तस्य तदेतरसद्भावेऽपि प्राधान्याद् व्यपदेश इति, लोकलोकोत्तरानुगतश्चायं न्यायो वर्त्तते, तथा चाह-**देसिय लभते शब्दं-** प्राप्नोति शब्दम्, किंभूतमित्याह-**'रायत्ति एस वच्चति'** राजा एष व्रजतीति, न चासौ केवलः, प्रभूतलोकानुगतत्वात्, न च तदन्यव्यपदेशः, तेषामप्राधान्यात्, तथा चाह- **'सेसा अणुगामिणो तस्स'त्ति** शेषाः-अमात्यादयः अनुगामिनः-अनुयातारस्तस्य राज्ञ इत्यतः प्राधान्याद्राजेति व्यपदेश इति गाथार्थः ।। १४७२ ।।

**अव०** अयं लोकानुगतो न्यायः, अयं पुनर्लोकोत्तरानुगतः-

**पढमिल्लुअस्स उदए कोहस्सिअरे वि तिन्नि तत्थत्थि ।**
**न य ते ण संति तहियं न य पाहन्नं तेहयंमि ।। १४७३ ।।**

**वृ०** **'पढमिल्लु'** प्रथम एव प्रथमिल्लुकः, प्राथम्यं चास्य सम्यग्दर्शनाख्यप्रथमगुणघातित्वात् तस्य प्रथमिल्लुकस्य **उदये,** कस्य?, **क्रोधस्य** अनन्तानुबन्धिन इत्यर्थः, **'इतरे वि तिण्णि तत्थत्थि'** शेषा अपि त्रयः- अप्रत्याख्यानप्रत्याख्यानावरणसञ्ज्वलनादयस्तत्र- जीवद्रव्ये सन्ति, न चातीताद्यपेक्षया तत्सद्भावः प्रतिपाद्यते, यत आह- **'न य ते ण संति तहियं'** न च ते-अप्रत्याख्यानप्रत्याख्यानावरणादयो न सन्ति, **किन्तु** सन्त्येव, **न च प्राधान्यं** तेषामतो न

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**तच्चित्तम्**, तच्चौघतस्त्रिधा भवतीति दर्शयति- **तद्भवेद्भावना वा** इति तच्चित्तं [d]भवेद्, का?

व्यपदेशः, आद्यस्यैव व्यपदेशः, **'तहेयंपि'** तथा एतदपि अधिकृतं वेदितव्यमिति गाथार्थः ।। १४७३ ।।

**अव०** अधुना स्वरूपतः कायिकं मानसं च ध्यानमावेदयन्नाह–

**मा मे एजउ काउत्ति अचलओ काइअं हवइ झाणं ।**
**एमेव य माणसियं निरुद्धमणसो हवइ झाणं ।।१४७४।।**

**वृ०** **'मा मे एजउ काउत्ति'** एजतु-कम्पतां कायो' देह इति, एवम् **अचलत** एकाग्रतया स्थितस्येति भावना, किम् ? कायेन निर्वृत्तं **कायिकं भवति ध्यानम्, एवमेव मानसं निरुद्धमनसो भवति ध्यान**मिति गाथार्थः ।। १४७४।।

**अव०** इत्थं प्रतिपादिते सत्याह चोदकः–

**जह कायमणनिरोहे झाणं वायाइ जुज्जइ न एवं ।**
**तम्हा वई उ झाणं न होइ को वा विसेसुत्थ? ।। १४७५।।**

**वृ०** **'जह कायमणनिरोहे'** ननु यथा कायमनसोर्निरोधे **ध्यानं** प्रतिपादितं भवता **'वायाइ जुज्जइ न एवं'**ति वाचि युज्यते नैवेति, कदाचिदप्रवृत्त्यैव निरोधाभावात्, तथाहि- न कायमनसी यथा सदा प्रवृत्ते तथा वागिति **'तम्हा वती उ झाणं न होइ'** तस्माद् वाग् ध्यानं न भवत्येव, तुशब्दस्यैवकारार्थत्वात् व्यवहितप्रयोगाच्च, **'को वा विसेसोऽत्थ'**त्ति को वा विशेषोऽत्र? येनेत्थमपि व्यवस्थिते सति वाग् ध्यानं भवतीति गाथार्थः ।।१४७५।।

**अव०** इत्थं चोदकेनोक्ते सत्याह गुरुः-

**मा मे चलउत्ति तणू जह तं झाणं निरेइणो होइ ।**
**अजयाभासविवज्जस्स वाइअं झाणमेव तु ।। १४७६ ।।**

**वृ०** **'मा मे चलउ त्ति'** मा मे चलतु-कम्पतामितिशब्दस्य व्यवहितः प्रयोगस्तं च दर्शयिष्यामः, **तनुः** शरीरमिति-एवं चलनक्रियानिरोधेन **यथा तद् ध्यानं** कायिकं **'निरेइणो'** निरेजिनो-निष्प्रकम्पस्य **भवति 'अजताभासविवज्जिस्स वाइयं झाणमेव तु'** अयताभाषाविवर्जिनो-दुष्टवाक्यपरिहर्त्तुरित्यर्थः, वाचिकं ध्यानमेव यथा कायिकम्, तुशब्दोऽवधारणार्थ इति गाथार्थः ।। १४७६ ।।

**अव०** साम्प्रतं स्वरूपत एव वाचिकध्यानमुपदर्शयन्नाह–

**एवंविहा गिरा मे वत्तव्वा एरिसा न वत्तव्वा ।**
**इय वेयालियवक्कस्स भासओ वाइयं झाणं ।। १४७७ ।।**

**वृ०** **'एवंविहा गिरा'** एवंविधेति निरवद्या गीः-वागुच्यते **'मे'**त्ति मया **वक्तव्या 'एरिस'**त्ति ईदृशी सावद्या **न वक्तव्या, एवमे**काग्रतया **विचारितवाक्यस्य** सतो **भाषमाणस्य वाचिकं ध्यान**मिति गाथार्थः ।। १४७७ ।।

**अव०** एवं तावद् व्यवहारतो भेदेन त्रिविधमपि ध्यानमावेदितम्, अधुनैकदैव एकत्रैव त्रिविधमपि दर्श्यते–

**मणसा वावारंतो कायं वायं च तप्परीणामो ।**
**भंगिअसुअं गुणंतो वट्टइ तिविहेवि झाणंमि ।। १४७८ ।।**

**वृ०** **'मणसा वावारंतो'** मनसा-अन्तःकरणेनोपयुक्तः सन् व्यापारयन् **कायं**-देहं **वाचं** भारतीं **च 'तप्परीणामो'** तत्परिणामो विवक्षितश्रुतपरीणामः, अथवा तत्परिणामो-योगत्रयपरिणामः स तथाविधः शान्तो

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

योगत्रयपरिणामो यस्यासौ तत्परिणामः, **भङ्गिकश्रुतं** दृष्टिवादान्तर्गतमन्यद् वा तथाविधं '**गुणंतो**'त्ति गुणयन् **वर्त्तते त्रिविधेऽपि ध्याने** मनोवाक्कायव्यापारलक्षणे इति गाथार्थः ।। १४७८ ।।

**—आव. नि. हा. ।।**

C जीवस्स एगग्गे जोगाभिनिवेसो झाणं, अंतोमुहुत्तं तीव्रजोगपरिणामस्यावस्थानमित्यर्थः, तस्य सत्त भंगा-मानसं १, अहवा वाइयं २, अहवा कायिगं ३, अहवा माणसं वाइयं च ४, अहवा वाइगं कायिगं च ५, अहवा माणसं कायिगं च ६, अहवा मणवयणकायिगं ति ७।

एत्थ पढमो भंगो छउमत्थाणं सम्मद्दिट्ठिमिच्छादिट्ठीणं सरागवीतरागाणं भवति, बितितो तेसिं चेव छदुमत्थाणं सजोगिकेवलीणं च धम्मं कथेन्ताणं, काइगं तेसिं चेव छदुमत्थाणं सजोगिकेवलीणं च चरमसमयसजोगित्ति ताव भवति, चउत्थो पंचमो य जथा पढमो, छट्ठो जथा सजोगिकेवलीणं, सत्तमो जथा पढमो । **—आवश्यकचूर्णौ ।।**

D एकालम्बनसंस्थस्य, सदृशप्रत्ययस्य च । प्रत्ययान्तरनिर्मुक्तः, प्रवाहो ध्यानमुच्यते ।।

**—षोडशक, १२/१४ वृत्तौ ।।**

E **शुभैकालम्बनं चित्तं, ध्यानमाहुर्मनीषिणः ।**
**स्थिरप्रदीपसदृशं, सूक्ष्माभोगसमन्वितम् ।। ३६२ ।।**

**वृ० शुभैकालम्बनं** प्रशस्तैकार्थविषयं **चित्तं ध्यानं** धर्मध्यानादि । **आहुर्मनीषिणः स्थिरप्रदीपसदृशं** निर्वातगृहोदरज्वलत्प्रदीपप्रतिमम् । **सूक्ष्माभोगसमन्वितम्**उत्पादादिविषयसूक्ष्मोपयोगयुतम् ।। ३६२ ।।

**अविद्याकल्पितेषूच्चै-रिष्टानिष्टेषु वस्तुषु ।**
**संज्ञानात्तद्व्युदासेन, समता समतोच्यते ।। ३६४ ।।**

**वृ० अविद्याकल्पितेष्व**नादिवितथवासनावशोत्पन्नविकल्पकल्पितशरीरेषु । **उच्चैर**तीव । **इष्टानिष्टेष्वि**न्द्रियमनःप्रमोदप्रदायिषु तदितरेषु च **वस्तुषु** शब्दादिषु **संज्ञानात्** । "तानेवार्थान् द्विषतस्तानेवार्थान् प्रलीयमानस्य । निश्चयतोऽनिष्टं वा न विद्यते किञ्चिदिष्टं वा ।।" [प्रश. ५२] इत्यादिभावनारूपाद्विवेकात् **तद्व्युदासेने**ष्टानिष्टवस्तुपरिहारेण या **समता** तुल्यरूपता मनसः, सा **समता** प्रागुपन्य**स्तोच्यते** ।। ३६४ ।।

**अन्यसंयोगवृत्तीनां, यो निरोधस्तथा तथा ।**
**अपुनर्भावरूपेण, स तु तत्संक्षयो मतः ।। ३६६ ।।**

**वृ०** इह स्वभावत एव निस्तरङ्गमहोदधिकल्पस्यात्मनो विकल्परूपाः परिस्पन्दरूपाश्च वृत्तयः सर्वा अन्यसंयोगनिमित्ता एव । तत्र विकल्परूपास्तथाविधमनोद्रव्यसंयोगात्, परिस्पन्दरूपाश्च शरीरादिति । ततो**ऽन्यसंयोगेन** या **वृत्तयस्तासां यो निरोधः** । **तथा तथा** केवलज्ञानलाभकालेऽयोगिकेवलिकाले च **अपुनर्भावरूपेण** पुनर्भवनपरिहाररूपेण । **स तु** स पुनः **तत्संक्षयो** वृत्तिसंक्षयो **मत** इति ।। ३६६ ।।

**—योगबिन्दौ ।।**

F **उपयोगे विजातीय-प्रत्ययाऽव्यवधानभाक् ।**
**शुभैकप्रत्ययो ध्यानं, सूक्ष्माऽऽभोगसमन्वितम् ।। ११ ।।**

Jain Education International 2010_02	For Private & Personal Use Only	www.jainelibrary.org

भाव्यत इति भावना ध्यानाभ्यासक्रियेत्यर्थः[३], वा विभाषायाम् **अनुप्रेक्षा वा** इति अनु-पश्चाद्भावे प्रेक्षणं प्रेक्षा सा च स्मृतिध्यानाद्[४] भ्रष्टस्य चित्तचेष्टेत्यर्थः, वा पूर्ववद् **अथवा चिन्ता** इति अथवाशब्दः प्रकारान्तरप्रदर्शनार्थः चिन्तेति या खलूक्तप्रकारद्वयरहिता चित्रा मनश्चेष्टा सा चिन्तेति[५] गाथार्थः ।।२।।

---

वृ० **उपयोग इति** । **उपयोगे** स्थिरप्रदीपसदृशे धारालग्रे ज्ञाने **विजातीयप्रत्ययेन** तद्विच्छेदकारिणा विषयान्तरसञ्चारेणालक्ष्यकालेनाऽपि **अव्यवधानभाग्** अनन्तरितः **शुभैकप्रत्ययः** प्रशस्तैकार्थबोधो **ध्यानमु-च्यते** । **सूक्ष्माभोगेन** उत्पातादिविषयसूक्ष्माऽऽलोचनेन **समन्वितं** सहितम् ।। ११ ।।

**—द्वात्रिंशद्द्वात्रिंशिकायां, १८ ।।**

G x x x । **ध्यानं चैकाग्र्यसंवित्तिः, समापत्तिस्तदेकता ।। २ ।। —ज्ञानसारे, ३०।।**

H **ध्यानं, परमध्यानम्, शून्यं** x x x ।।

वृ० तत्र ध्यानं- चिन्ता-भावनापूर्वकः स्थिरोऽध्यवसायः ।
द्रव्यतश्चार्त्त-रौद्रे, भावतस्तु आज्ञाऽपायविपाकसंस्थानविचयमिदं धर्मध्यानम् ।।१।।
परमध्यानं-शुक्लस्य प्रथमो भेदः पृथक्त्ववितर्कसविचारम् ।।२।। **—ध्यानविचारे ।।**

३ **अभ्यासोऽस्यैव विज्ञेयः, प्रत्यहं वृद्धिसङ्गतः ।**
**मनःसमाधिसंयुक्तः, पौनःपुन्येन भावना ।। ३६०।।**

वृ० **अभ्यासो**ऽनुवर्तनम् । **अस्यैवा**ध्यात्मस्य **विज्ञेयः** । **प्रत्यहं** प्रतिदिवसम् **वृद्धिसङ्गतः** समुत्कर्षमनुभवन्। **मनःसमाधिसंयुक्तश्चि**त्तनिरोधयुक्तः, कथमित्याह-**पौनःपुन्येन** भूयो भूय इत्यर्थः, **भावना** द्वितीयो योगभेद इति ।। ३६०।। **—योगबिन्दौ।।**

४ अनुप्रेक्षा ध्यानादवतीर्णस्य, सा च द्वादशधाऽनित्यादिभेदात् 'पढमं अणिच्चभावं०' इत्यादि।। **-ध्यानविचारे।।**

५ A [घटतेऽयं शुभध्यानापेक्षया]
**औचित्याद् वृत्तयुक्तस्य वचनात्तत्वचिन्तनम् ।**
**मैत्र्यादिसारमत्यन्त-मध्यात्मं तद्विदो विदुः।। ३५८ ।।**

वृ० **औचित्यादु**चितप्रवृत्तिरूपाद् **वृत्तयुक्तस्याणु**व्रतमहाव्रतसमन्वितस्य **वचनाज्जि**नप्रणीतात् । **तत्वचिन्तनं** जीवादिपदार्थसार्थपर्यालोचनम्। **मैत्र्यादिसारं** मैत्रीप्रमोदकरूणामाध्यस्थ्यप्रधानं सत्त्वादिषु विषयेषु । **अत्यन्तम**तीव । किमित्याह- **अध्यात्मं** योगविशेषम्, **तद्विदः** अध्यात्मज्ञातारो **विदु**र्जानते ।। ३५८।। **—योगबिन्दौ।।**

B तत्र चिन्ता भावनाऽनुप्रेक्षाव्यतिरिक्तं चलं चित्तम् । सा च सप्तधा-
प्रथमा तत्त्वचिन्ता-परमतत्त्वचिन्तारूपा । तत्राद्या जीवाऽजीवादीनाम् ९ । द्वितीया ध्यानादीनामेव २४ भेदानाम् ।।१ ।।
द्वितीया मिथ्यात्व-सास्वादन-मिश्रदृष्टिगृहस्थरूपा । अत्रैतेषां स्वरूपं विपर्यस्तादिरूपं चिन्त्यम् ।।२।।
तृतीया चतुर्विधानाम्-क्रिया(१८०)-अक्रिया(८४)-अज्ञान(६७)-विनय(३२)-वादिनां(३६३) पाखण्डिनां स्वरूपचिन्ता ।।३।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

इत्थं ध्याना[a]ध्यानलक्षणमोघतोऽभिधायाधुना ध्यानमेव काल-स्वामिभ्यां निरूपयन्नाह-

**अंतोमुहुत्तमेत्तं चित्तावत्थाणमेगवत्थुंमि ।**
**छउमत्थाणं झाणं जोगनिरोहो जिणाणं तु ।।३।।**

**अंतो० गाहा** ।। इह मुहूर्तः सप्तसप्ततिलवप्रमाणः कालविशेषो भण्यते, उक्तं च-

"कालो परमनिरुद्धो अविभज्जो तं तु जाण समयं तु ।
समया य असंखेज्जा भवंति ऊसास-नीसासा ।।१।।

हट्ठस्स अणवगल्लस्स णिरुवकिट्ठस्स जंतुणो ।
एगे ऊसास-नीसासे एस पा[b]णुत्ति वुच्चइ ।।२।।

सत्त पाणूणि से थोवे सत्त थोवाणि से ल[c]वो ।
लवाणं सत्तहत्तरीए एस मुहुत्ते वियाहिए ।।३।।" [ ]

अन्तर्मध्यकरणे, **ततश्चान्तर्मुहूर्तमात्रं** कालमिति गम्यते[१], मात्रशब्दस्तदधिक कालव्यवच्छेदार्थः, ततश्च भिन्नमुहूर्तमेव कालम् । किम् ? **चित्तावस्थानम्** इति चित्तस्य मनसः अवस्थानं चित्तावस्थानम्, अवस्थितिः-अवस्थानम् निष्प्रकम्पतया वृत्तिरित्यर्थः ।

क्व ? **एकवस्तुनि** एकम् अद्वितीयम्, वसन्त्यस्मिन् गुण-पर्याया इति वस्तु चेतनादि, [d]एकं च तद्वस्तु च एकवस्तु, तस्मिन् २, **छद्मस्थानां ध्यानम्** इति तत्र छादयतीति छद्म पिधानम्, तच्च ज्ञानादीनां गुणानामावारकत्वाज्ज्ञानावरणादिलक्षणं घातिकर्म, छद्मनि स्थिताश्छद्मस्था

पार्श्वस्थादिस्वयूथ्यस्वरूपचिन्ता ।।४।।
नारक-तिर्यङ्-नरा-ऽमराणामविरतसम्यग्दृष्टीनां स्वरूपचिन्ता ।।५।।
मनुष्याणां देशविरतसम्यग्दृष्टीनां स्वरूपचिन्ता ।।६।।
प्रमत्तादि-अयोगिपर्यन्तानां नवानां सर्वविरतानां सिद्धानां १५ चानन्तरपरम्परगतभेदानां स्वरूपचिन्तनम् ।।७।।
**-ध्यानविचारे ।।**

१ A **अव०** सम्प्रति ध्यानकालप्रमाणनिरूपणायाह-
**मू० आ मुहूर्तात् ।।९-२८।।**
**भा० तद्ध्यानमामुहूर्ताद्भवति परतो न भवति दुर्ध्यानत्वात् ।।२८।।**

**वृ० आ मुहूर्तादिति** । घटिकाद्वयं मुहूर्तः । अभिविधा**वाङ्** । अन्तर्मुहूर्तपरिमाणं न परतो मुहूर्तादित्यर्थः। **तद्ध्यानमित्यादि**। तदेतत् सामान्यलक्षणोक्तं ध्यानं चतुर्विध**मप्यामुहूर्ताद्भवति, परतो न भवत्यशक्तेरेव**। यस्मान्मोहनीयकर्मानुभावात् संक्लेशाद् वा विशोध्य वान्तर्मुहूर्तात् परावर्तते । उक्तं च-

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अकेवलिन इत्यर्थस्तेषां छद्मस्थानाम्, ध्यानं प्रागवत्। ततश्चायं समुदायार्थः- अन्तर्मुहूर्तकालं यच्चित्तावस्थानमेकस्मिन् वस्तुनि तच्छद्मस्थानां ध्यानमिति।

---

"नान्तर्मुहूर्तकालं, व्यतीत्य शक्यं हि जगति सङ्क्लेष्टुम् ।
नापि विशोद्धुं शक्यं, प्रत्यक्षो ह्यात्मनः सोऽर्थः ।।"

किं पुनः कारणं परतो न ध्यानमस्तीत्याह-**दुर्ध्यानत्वात्**। दुरितिशब्दो वैकृते वर्तते । विकृतो वर्णो दुर्वर्ण इति यथा, एवं विकृतं ध्यानं विकारान्तरमापन्नं दुर्ध्यानमिति । अथवा व्यृद्धौ दुःशब्दः, ऋद्धिवियुक्ता यवना दुर्यवनं दुष्कं (ष्टं?) बीजमिति, एवं ध्यानलक्षणविनिर्मुक्तं दुर्ध्यानम् । अनीप्सायां वा दुःशब्दः, अनीप्सितोऽस्या भग इति दुर्भगा कन्या, एवमनीप्सितं दुर्ध्यानमिति तद्भावो दुर्ध्यानत्वं तस्माद् दुर्ध्यानत्वान्न परतो ध्यानमस्ति ।।२८।। **—तत्त्वार्थ. सिद्ध. वृत्तौ ।**

B **चतारि झाणा पं० x x x ।।सू. २४७।।**

**वृ०** x x x सुगमं चैतन्नवरं-ध्यातयो ध्यानानि, अन्तर्मुहूर्तमात्रं कालं चित्तस्थिरतालक्षणानि.... ।।

**—स्थानाङ्गसूत्रवृत्तौ ।।**

२ A **मू० उत्तमसंहननस्यैकाग्रचिन्तानिरोधो ध्यानम् ।।९-२७।।**

**भा० उत्तमसंहननं वज्रर्षभनाराचं वज्रनाराचं नाराचं अर्धनाराचं च तद्युक्तस्यैकाग्रचिन्तानिरोधश्च ध्यानम् ।।२७।।**

**वृ० उत्तमं-** प्रकृष्टं **संहननम्**-अस्थ्नां बन्धविशेषः। उत्तमं संहननमस्येत्युत्तमसंहननम्, तदुत्तमसंहननं चतुर्विधं-**वज्रर्षभनाराचम्, वज्रनाराचम्, नाराचम्, अर्धनाराचम्** । वज्रं-कीलिका, ऋषभः-पट्टः, नाराचो-मर्कटबन्धः। प्रथमं त्रितययुक्तम् । द्वितीयसंहनने पट्टो नास्ति । तृतीये वज्रर्षभौ न स्तः । ततो वज्रर्षभम् अर्धवज्रर्षभं नाराचं चेत्यनेन चत्वारो भेदाः प्रतिपाद्या उत्तमसंहननवाच्याः। उत्तमसंहननग्रहणं निरोधे कार्ये प्रतिविशिष्टसामर्थ्यप्रतिपादनार्थम् । तस्योत्त**मसंहननस्य एकाग्रचिन्तानुरोधो ध्यानम्**। अग्रम्-आलम्बनम्, एकं च तदग्रं चे**त्येकाग्रम्,**, एकालम्बनमित्यर्थः। एकस्मिन्नालम्बने चिन्तानिरोधः। चलं चित्तमेव **चिन्ता,** तन्निरोधस्तस्यैकत्रावस्थापनमन्यत्राप्रचारो **निरोधः**। अतो निश्चलं स्थिरमध्यवसानमेकालम्बनं छद्मस्थविषयं **ध्यानम्**। केवलिनां पुनर्वाक्काययोगनिरोध एव ध्यानम्, अभावान्मनसः। न ह्यवाप्तकेवलस्य मनोव्यापारः समस्ति, सकलकरणग्रामनिरपेक्षत्वादिति। तद्युक्तस्येति तेन प्रतिविशिष्टेन संहननत्रयेणाद्येन चतुर्विधेन वा युक्तस्य-सम्पन्नस्य। एकाग्रचिन्तानिरोधः। चशब्दाद् वाक्-कायनिरोधश्च ध्यानम् । अत्र च ध्याता संसार्यात्मा ध्यानस्वरूपमेकाग्रचिन्तानिरोधः। ध्यातिर्ध्यानमिति भावसाधनः। कालतो मुहूर्तमात्रं चतुःप्रकारमार्तादिभेदेन। ध्येयप्रकारास्त्वमनोज्ञविषयसंप्रयोगादयः। शोकाक्रन्दनविलपनादिलक्षणमार्तम्, उत्सन्नबद्धादिलक्षणं रौद्रम्, जिनप्रणीतभावश्रद्धानादिलिङ्गं धर्म्यम्, अबाधाऽसम्मोहादिलक्षणं शुक्लम्। फलं पुनस्तिर्यङ्-नरक-देवगत्यादि-मोक्षाख्यमिति क्रमेण उत्तमसंहननपदार्थलभ्यो ध्याता अभिहितः। ध्यानस्वरूपं भावसाधनता च विज्ञेया ।।२७।। **—तत्त्वार्थ. सिद्ध. वृत्तौ ।।**

B **एकाग्रचिन्तारोधो यः, परिस्पन्देन वर्जितः।**
**तद्ध्यानं निर्जराहेतुः, संवरस्य च कारणम् ।।५६।।**
**एकं प्रधानमित्याहु-रग्रमालम्बनं मुखम् । चिन्तां स्मृतिं निरोधं तु, तस्यास्तत्रैव वर्त्तनम् ।।५७।।**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**योगनिरोधो जिनानां तु** इति तत्र **योगाः** तत्त्वत औदारिकादिशरीरसंयोगसमुत्था आत्मपरिणामविशेषव्यापारा एव, यथोक्तम्-औदारिकादिशरीरयुक्तस्याऽऽत्मनो वीर्यपरिणतिविशेषः काययोगः, तथौदारिकवैक्रियाहारकशरीरव्यापाराहृतवाग्द्रव्यसमूहसाचिव्याज्जीवव्यापारो वाग्योगः, तथौदारिकवैक्रियाहारकशरीरव्यापाराहृतमनोद्रव्यसमूहसाचिव्याज्जीवव्यापारो मनोयोग[३] इति, अमीषां निरोधो योगनिरोधः, निरोधनं **निरोधः**, प्रलयकरणमित्यर्थः, केषाम् ? **जिनानां** केवलिनाम्, **तु**शब्द एवकारार्थः, स चावधारणे, योगनिरोध एव न तु चित्तावस्थानम्, चित्तस्यैवाभावाद्, अथवा योगनिरोधो जिनानामेव ध्यानं नान्येषाम्, अशक्यत्वादित्यलं विस्तरेण। यथा चायं योगनिरोधो जिनानां ध्यानं यावन्तं च कालमेतद्भवत्येतदुपरिष्टाद्वक्ष्याम इति गाथार्थः[४] ।।३।।

साम्प्रतं छद्मस्थानामन्तर्मुहूर्तात् परतो यद्भवति तदुपदर्शयन्नाह–

**अंतोमुहुत्तपरओ चिंता झाणंतरं व होज्जाहि ।**
**सुचिरंपि होज्ज बहुवत्थुसंकमे झाणसंताणो ।।४।।**

---

द्रव्य-पर्याययोर्मध्ये, प्राधान्येन यदर्पितम्। तत्र चिन्तानिरोधो यस्तद्ध्यानं बभणुर्जिनाः ।।५८।।
एकाग्रग्रहणं चात्र, वै व्यग्रविनिवृत्तये । व्यग्रं ह्यज्ञानमेव स्या-द्ध्यानमेकाग्रमुच्यते ।।५९।।
प्रत्याहृत्य यदा चिन्तां, नानालम्बनवर्त्तिनीम् ।
एकालम्बन एवैनां, निरुणद्धि विशुद्धधीः ।।६०।।
तदास्य योगिनो योगश्चिन्तैकाग्रनिरोधनम् ।
प्रसंख्यानं समाधिः स्याद्ध्यानं स्वेष्टफलप्रदम् ।।६१।।
अथवाङ्गति ज्ञानाती-त्यग्रमात्मा निरुक्तितः। तत्त्वेषु चाग्रगण्यत्वा-दसावग्रमिति स्मृतः ।।६२।।
द्रव्यार्थिकनयादेकः, केवलो वा तथोदितः। अन्तःकरणवृत्तिस्तु, चिन्तारोधो नियन्त्रणा ।।६३।।
अभावो वा निरोधः स्यात्, स च चिन्तातरव्ययः।
एकचिन्तात्मको यद्वा, स्वसंविच्चिन्तयोज्झितः ।।६४।।
तत्रात्मन्यसहाये य-च्चिन्तायाः स्यान्निरोधनम् ।
तद्ध्यानं तदभावो वा, स्वसंवित्तिमयश्च सः ।।६५।। —तत्त्वानुशासने ।।

C दृढसंहननस्यापि, मुनेरान्तर्मुहूर्तिकम् ।
ध्यानमाहुरथैकाग्रचिन्तारोधो जिनोत्तमाः ।।६४।।
छद्मस्थानां तु यद्ध्यानं भवेदान्तर्मुहूर्तिकम् ।
योगरोधो जिनेन्द्राणां ध्यानं कर्मौघघातकम् ।।६५।। —ध्यानदीपिकायाम् ।।

३ अहवा तणुजोगाहिअवइदव्वसमूहजीववावारो ।
सो वइजोगो भण्णइ वाचा निसिरिज्जए तेणं ।।३६३।।
तह तणुवावाराहिअमणदव्वसमूहजीववावारो ।
सो मणजोगो भण्णइ भण्णइ नेयं जओ तेणं ।।३६४।। —विशेषावश्यके ।।

४ अव० इदानीं ध्यानस्य स्वरूपं व्याख्यायते -

**अंतो० गाहा ।। अन्तर्मुहूर्तात्**[१] **परतः** इति भिन्नमुहूर्तादूर्ध्वम्, **चिन्ता** प्रागुक्तस्वरूपा तथा **ध्यानान्तरं वा भवेत्** तत्रेह न ध्यानादन्यद् ध्यानं ध्यानान्तरं परिगृह्यते। किं[२] तर्हि? भावनानुप्रेक्षात्मकं चेत इति, इदं च ध्यानान्तरं तदुत्तरकालभाविनि ध्याने सति

---

**मुहूर्त्तान्तर्मनःस्थैर्यं, ध्यानं छद्मस्थयोगिनाम् ।**
**धर्म्यं शुक्लं च तद् द्वेधा, योगरोधस्त्वयोगिनाम् ।।११५।।**

**वृ०** इह द्वये ध्यातारः सयोगा अयोगिनश्च । सयोगा अपि द्विविधाः- छद्मस्थाः केवलिनश्च । तत्र **छद्मस्थयोगिनां ध्यानस्य** लक्षणमेतद् यदु**तान्तर्मुहूर्त्तं** कालमेकस्मिन्नालम्बने चेतसः स्थितिः, यदाह- "उत्तमसंहननस्यैकाग्रचिन्तानिरोधो ध्यानम्, आमुहूर्त्तात्" [तत्त्वा. ९/२७-२८] **तच्च** छद्मस्थयोगिनां ध्यानं **द्वेधा-धर्म्यं शुक्लं च।** तत्र धर्माद् दशविधानपेतं धर्मेण प्राप्यं वा धर्म्यम्। शुक्लं शुचि निर्मलं सकलकर्ममलक्षयहेतुत्वात् । यद्वा शुग् दुःखं तत्कारणं वाऽष्टविधं कर्म, शुचं क्लमयतीति शुक्लम् । **अयोगिनां तु** अयोगिकेवलिनां ध्यानं **योगनिरोधः,** योगानां मनोवाक्कायानां निरोधो निग्रहः । सयोगिकेवलिनां तु योगनिरोधकाल एव ध्यानसम्भव इति पृथग् नोक्तम्, ते हि देशोनपूर्वकोटीं यावन्मनोवाक्कायव्यापारयुक्ता एव विहरन्ति । अपवर्गकाले तु योगनिरोधं कुर्वन्तीति ।।११५।। **—योगशास्त्रे, प्र. ४ ।।**

१ A **अव०** ननु छद्मस्थयोगिनां यदि मुहूर्तकालं ध्यानं तर्हि ततः परं किं स्यादित्याह-

**मुहूर्त्तात् परतश्चिन्ता, यद्वा ध्यानान्तरं भवेत्।**
**बह्वर्थसङ्क्रमे तु स्या-द्दीर्घाऽपि ध्यानसन्ततिः ।।११६।।**

**वृ०** **मुहूर्त्तात् परतो** मुहूर्तोत्तरणकालं **चिन्ता** भवेत्, **यद्वा ध्यानान्तरम्** आलम्बनभेदेन भिन्नं ध्यानं **भवेत्,** न पुनरेकमेव ध्यानं मुहूर्त्तात् परतो भवति तत्स्वाभाव्यादिति । एवं चैकस्मादर्थाद् द्वितीयमर्थमालम्बमानस्य पुनस्तृतीयं चतुर्थं च **दीर्घाऽपि** दीर्घकालाऽपि **ध्यानसन्ततिर्भवेत्,** मुहूर्तान्तरं च प्रथमे ध्याने समाप्तप्रायःये आलम्बनान्तरे तद्विवृद्ध्यर्थं ध्यानभावनाः कुर्वीत।।११६।।

**अव०** तदेवाह-

**मैत्री-प्रमोद-कारूण्य-माध्यस्थ्यानि नियोजयेत् ।**
**धर्म्यध्यानमुपस्कर्तुं तद्धि तस्य रसायनम् ।।११७।।**

**वृ०** x x x तानि आत्मनि नियोजयेत् । किमर्थम् ? **धर्म्यध्यानमुपस्कर्तुं** त्रुट्यतो ध्यानस्य पुनर्ध्यानान्तरेण सन्धानं कर्तुम् । कुतः ? इत्याह- **तद्धि तस्य रसायनम्,** तन्मैत्र्यादिनियोजनं हिर्यस्मात्तस्य ध्यानस्य जराजर्जरस्येव शरीरस्य त्रुट्यतो रसायनमिव रसायनम् ।।११७।। x x x

**अव०** अथ यदुक्तं 'धर्मध्यानमुपस्कर्तुम्' (४/११७) इति तद्विवेचयति-

**आत्मानं भावयन्नाभि-र्भावनाभिर्महामतिः ।**
**त्रुटितामपि संधत्ते, विशुद्धध्यानसन्ततिम् ।।१२२।।** **—योगशास्त्रे, प्र. ४।।**

B **मुहूर्त्ताऽन्तर्भवेद् ध्यान-मेकार्थे मनसः स्थितिः ।**
**बह्वर्थसङ्क्रमे दीर्घा-ऽप्यच्छिन्ना ध्यानसन्ततिः ।।२।।** **—अध्यात्मसारे, अ. १६ ।।**

२ **किं तर्हि ? - भावनानुप्रेक्षात्मकं चेत इति** । एतदुक्तं भवति-यदा धर्म्मध्यानादवतरति तदा

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

भवति[3], तत्राप्ययमेव न्याय इतिकृत्वा ध्यानसन्तानप्राप्तिर्यतः अतस्तमेव कालमानं वस्तुसङ्क्रमद्वारेण निरूपयन्नाह –

**सुचिरमपि** प्रभूतमपि, कालमिति गम्यते, **भवेद् बहुवस्तुसङ्क्रमे** सति **ध्यानसन्तानो** ध्यानप्रवाह इति, तत्र बहूनि च तानि वस्तूनि **बहुवस्तुनि** आत्मगत-परगतानि गृह्यन्ते, तत्रात्मगतानि मनःप्रभृतीनि परगतानि द्रव्यादीनीति, तेषु **सङ्क्रमः** सञ्चरणमिति गाथार्थः ।।४।।

इत्थं तावत् सप्रसङ्गं ध्यानस्य सामान्येन लक्षणमुक्तम्, अधुना विशेषलक्षणाभि-धित्सया ध्यानोद्देशं विशिष्टफ[a]लहेतुत्वं च संक्षेपतः प्रदर्शयन्नाह –

**अट्टं[1] रुद्दं धम्मं सुक्कं झाणाइ तत्थ अंताइं ।**
**निव्वाणसाहणाइं भवकारणमट्ट-रुद्दाइं ।।५।।**

---

a. एकोऽहमशरणश्चेत्याद्या इहैव वक्ष्यमाणा अनुप्रेक्षा विभावयति, पुनरपि च धर्म्मध्यानादिध्यानमारुरुक्षुर्भावनाः- ज्ञानदर्शनाद्या वक्ष्यमाणस्वरूपाः परिभावयति, एतद्ध्यानान्तरमुच्यते, न पुनरेकस्माद् ध्यानादवतीर्यानन्तर-मेवान्यद् ध्यानं प्रतिपद्यते अनुप्रेक्षाभावनान्तरितं तु प्रतिपद्यते ततोऽप्युत्तीर्णस्यायमेव क्रम इत्येवं ध्यानसन्तानो भवत्यपीति । **-आवश्यकटिप्पनके ।।**

3 **अव०** स्याद् बुद्धिः केयं पुनर्ध्यानान्तरिका ? इति उच्यते-
**अन्नतरझाणऽतीतो, बिइयं झाणं तु सो असंपत्तो ।**
**झाणंतरम्मि वट्टइ, बिपहे व विकुंचियमईओ ।।१६४३।।**

**वृ०** **अन्यतरस्माद्** द्रव्याद्यन्यतरवस्तुविषयाद् **ध्यानादतीतः** अतिक्रान्तो यः कश्चिदद्यापि **द्वितीयं ध्यानं न सम्प्राप्नोति स** द्वितीयं ध्यानमसम्प्राप्तः सन् यद् **ध्यानान्तरे वर्त्तते** सा ध्यानान्तरिका भवतीति शेषः। इयमत्र भावना- द्रव्यादीनामन्यतमं ध्यातवतो यदा चित्तमुत्पद्यते 'सम्प्रति शेषाणां ध्यातव्यानां कतरद् ध्यायामि ?' इत्येवंविधो विमर्शो ध्यानान्तरिकेत्युच्यते । दृष्टान्तोऽत्र **'बिपहे व विकुंचियमतीउ'** त्ति द्विपथं-मार्गद्वयस्थानम्, ततो यथा कश्चिदेकेन पथा गच्छन् पुरस्ताद् 'द्विपथे' मार्गद्वये दृष्टे सति 'विकुञ्चितमतिकः' 'अनयोर्मार्गयोः कतरेण व्रजामि?' इति विमर्शाकुलबुद्धिं सन्नपान्तराले वर्त्तते, एवमेषोऽपि ध्यानान्तरे इति ।।१६४३।। **—बृहत्कल्पसूत्रे ।।**

1 A **आर्त्तं रौद्रं च धर्मं च, शुक्लं चेति चतुर्विधम् ।**
**तत् स्याद् भेदाविह द्वौ, कारणं भवमोक्षयोः ।। ३ ।।** **—अध्यात्मसारे, अ.१६।।**

B **आर्त्तं रौद्रं च दुर्ध्यानं, प्रत्येकं तच्चतुर्विधम् ।**
**अर्त्ते भवमथार्त्तं स्याद्, रौद्रं प्राणातिपातजम् ।। ६९ ।।**
**ध्यानं चतुर्विधं ज्ञेयं, धर्मं शुक्लं च नामतः ।**
**प्रत्येकं तच्छ्रयेत् योगी, विरक्तः पापयोगतः ।। १०५ ।।** **—ध्यानदीपिकायाम् ।।**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**अट्टं० गाहा ५। आर्तं[२] रौद्रं धर्म्यं शुक्लम्,** तत्र ऋतं दुःखम् तन्निमित्तो दृढाध्य-

२ A **से किं तं झाणे ? झाणे चउव्विहे पन्नत्ते, तंजहा - अट्टे झाणे, रोद्दे झाणे, धम्मे झाणे, सुक्के झाणे** x x x ।। **– भग.सू.८०३, औप.सू.२०, स्था.सू.२४७।।**

B **अव०** सामान्येन ध्यानलक्षणमभिधाय सम्प्रति भेदकथनायाह-

**मू०** **आर्त-रौद्र-धर्म्य-शुक्लानि ।। ९-२९ ।।**

**भा०** **- तच्चतुर्विधं भवति । तद्यथा – आर्तम्, रौद्रम्, धर्म्यम्, शुक्लमिति ।। २९ ।।**

**वृ०** - कृतद्वन्द्वान्यार्तादीनि नपुंसकबहुवचनेन निर्दिष्टानि-तच्चतुर्विधं भवतीत्यादि । **तद्ध्यानं** सामान्येन लक्षितं **चतुर्विधं भवति** - चतुर्धा भिद्यते चतस्रो विधा यस्य तच्चतुर्विधम् । विधाप्रदर्शनायाह **- तद्यथेति । आर्तम्, रौद्रम्, धर्म्यम्, शुक्लमिति।** तत्रार्तस्य शब्दनिर्भेदाभिधानम्। ऋतशब्दो दुःखपर्याय-वाच्याश्रीयते । अर्तेर्गमिक्रियापरिस्पन्दिनो निष्ठाप्रत्ययान्तः। तस्मादागतार्थे तद्धितप्रत्ययो णित्। **आर्तं** दुःखभवं दुःखानुबन्धि चेति । तथा चामनोज्ञविषयप्रयोगो दुःखम् । वेदना च नेत्र-शिरोदशनादिका दुःखमेव । तथा मनोज्ञविषयविप्रयोगोऽशर्मैव। निदानमपि चित्तदुःखासिकयैव क्रियत इत्युपपन्नः प्रत्ययार्थः। तथा रोदयत्यपरानिति रुद्रो दुःखस्य हेतुः, तेन कृतं तत्कर्म वा **रौद्रं** प्राणिवधबन्धपरिणत आत्मैव रुद्र इत्यर्थः। धर्मः क्षमादिदशलक्षणकस्तस्मादनपेतं **धर्म्यम्। शुक्लं** शुचि निर्मलं सकलकर्मक्षयहेतुत्वादिति। शुग्वा दुःखमष्टप्रकारं कर्म तां च शुचं क्लमयति-ग्लपयति निरस्यति शुक्लम् इत्येतावदेव ध्यानं चतुर्विधमिति ।। २९ ।।

**–तत्त्वार्थ. सिद्ध. वृत्तौ** ।।

C **चत्तारि झाणा पं० तं. अट्टज्झाणे रूद्दज्झाणे धम्मज्झाणे सुक्कज्झाणे** x x x ।। सू. ४।।

**वृ०** x x x अन्तर्मुहूर्त्तं यावच्चित्तस्यैकाग्रता योगनिरोधश्च ध्यानम्,
तत्रार्त्तं मनोज्ञामनोज्ञेषु वस्तुषु वियोगसंयोगादिनिबन्धनचित्तविक्लवलक्षणम्,
रौद्रं हिंसानृतचौर्यधनसंरक्षणाभिसन्धानलक्षणम्,
धर्म्यमाज्ञादिपदार्थस्वरूपपर्यालोचनैकाग्रता,
शुक्लं पूर्वगतश्रुतावलम्बनेन मनसोऽत्यन्तस्थिरता योगनिरोधश्चेति x x x ।।४।। **–समवायाङ्गसूत्रे ।।**

D **तं झाणं चतुव्विधं- अट्टं रुद्दं धम्मं सुक्कं च ।**
आर्तभावं गतो आर्त्तः आर्तस्य ध्यानम् आर्तध्यानम्, रौद्रभावं गतो रौद्रः, धर्मभावं गतो धर्मः, शुक्लभावं गतः शुक्लः । उक्तं च-

"हिंसाणुरंजितं रौद्रं, अट्टं कामाणुरंजितं । धम्माणुरंजितं धम्मं, शुक्लं झाणं निरंजणं ।। १ ।।"
एगेगस्स असंखेज्जाइं ठाणाइं, एतेसु ठाणेसु जीवो अरहट्टघटीविय आएति य जाति य।

**–आवश्यकचूर्णौ** ।।

E सम्प्रति ध्यानमाह– ऋतं-दु-खम्, उक्तं हि- "ऋतशब्दो दुःखपर्यायवाच्याश्रीयते," ऋते भवमार्तम्, तथा

रोदयत्यपरानिति रुद्रः- प्राणिवधादिपरिणत आत्मैव तस्येदं कर्म रौद्रम्, आर्त्तं च रौद्रं च आर्त्तरौद्रे, प्राकृतत्वाञ्च बहुवचननिर्देशः, वर्जयित्वा-हित्वा ध्यायेत्सुसमाहितः प्राग्वत्, किमित्याह- धर्मः-क्षमादिदशलक्षणस्तस्मादनपेतं धर्म्यम्, शुक्लं-शुचि-निर्मलं सकलमिथ्यात्वादिमलविलयनाद् यद्वा शुगिति—दुःखमष्टप्रकारं वा कर्म ततः शुचं क्लमयति— निरस्यतीति शुक्लमनयोर्द्वन्द्वस्ततो धर्म्यशुक्लध्याने स्थिराध्यवसानरूपे, उक्तं हि [ध्यानशतके-२]— "जं थिरमज्झवसाणं तं झाणं जं चलं तयं चित्तं"ति, ध्यानं-ध्यानाख्यं तपस्तत् तुशब्दस्यैवकारार्थत्वात्तदेव बुधाः 'वयंति' वदन्ति ५।। **—उत्तराध्ययने अ. ३०, पाइअटीकायाम् ।।**

F **दो चेव रागदोसे दुन्नि य झाणाइ अट्टरोद्दाइं ।**
**परिवज्जंतो गुत्तो रक्खामि महव्वए पंच ।।३।।**

वृ० x x x तथा **द्वे च** द्विसंख्ये च ध्यायते-चिन्त्यते वस्त्वाभ्यामिति **ध्याने**, ध्यातिर्वा ध्याने, अन्तर्मुहूर्त्तमात्रकालमेकाग्रचित्ताध्यवसाने, यदाह— [ध्यानशतके]

"अंतोमुहुत्तमित्तं चित्तावत्थाणमेगवत्थुंमि । छउमत्थाणं ज्झाणं जोगनिरोहो जिणाणं तु ।।३।।"

ते एव नामग्राहमाह- आर्त्तं च रौद्रं **चार्त्तरौद्रे,** तत्र ऋतं दुःखं तस्य निमित्तम्, तत्र वा भवम्, ऋते वा पीडिते प्राणिनि भवमार्त्तम्,, तञ्चामनोज्ञानां शब्दरूपरसगन्धस्पर्शलक्षणानां विषयाणां तदाश्रयभूतवायसादिवस्तूनां वा समुपनतानां विप्रयोगप्रणिधानम्, भाविनां वाऽसम्प्रयोगचिन्तनम् (१),

एवं शूलशिरोरोगादिवेदनाया अपि विप्रयोगप्रार्थनम् (२),

इष्टशब्दादिविषयाणां सातवेदनायाश्चावियोगसम्प्रयोगप्रार्थनम् (३),

देवेन्द्रचक्रवर्त्यादिसम्बन्ध्यृद्धिप्रार्थनं च (४) ।

शोकाक्रन्दनस्वदेहताडनविलपनादिलक्षणलक्ष्यं तिर्यग्गतिगमनकारणं विज्ञेयम् ।

तथा रोदयतीति रुद्र आत्मैव तस्य कर्म्म रौद्रम्, तदपि सत्त्वेषु वधवेधबन्धनदहनाङ्कनमारणादिप्रणिधानम् (१), पैशुन्यासभ्यासद्भूतभूतघातादिवचनचिन्तनम् (२), तीव्रकोपलोभाकुलं भूतोपघातपरायणं परलोकापायनिरपेक्षं परद्रव्यहरणप्रणिधानम् (३), सर्वाभिशङ्कनपरं परोपघातपरायणं शब्दादिविषयसाधकद्रव्यसंरक्षणप्रणिधानम् (४)। उत्सन्नवधादिगम्यं नरकगतिगमनकारणं समवसेयम् । एते च किमित्याह-**परिवर्ज्जयन् गुप्तः** सन् **रक्षामि महाव्रतानि पञ्चे**ति । तथा-

**दुविहं चरित्तधम्मं दुन्नि य ज्झाणाइ धम्मसुक्काइं ।**
**उवसंपन्नो जुत्तो रक्खामि महव्वए पंच ।।४।।**

वृ० x x x **द्वे च ध्याने** प्रणिधाने धर्म्यं शुक्लं च **धर्म्यशुक्ले** । तत्र श्रुतचरणधर्मादनपेतं धर्म्यं तच्च सर्वज्ञाज्ञानुचिन्तनम् (१), रागद्वेषकषायेन्द्रियवशजन्त्वपायविचिन्तनम् (२), ज्ञानावरणा-

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

दिशुभाशुभकर्म्मविपाकसंस्मरणम् (३), क्षिति-वलय-द्वीप-समुद्रप्रभृति-वस्तुसंस्थानादिधर्म्मालोचनात्मकम् (४)। जिनप्रणीतभावश्रद्धानादिचिह्नगम्यं देवगत्यादिफलसाधकं ज्ञातव्यम् ।

तथा शोधयत्यष्टप्रकारं कर्म्ममलं शुचं वा शोकं क्लमयत्यपनयतीति निरुक्तविधिना शुक्लम् । एतदपि पूर्वगतश्रुतानुसारि नानानयमतैकद्रव्योत्पत्ति-स्थिति-भङ्गादिपर्यायानुस्मरणादिस्वरूपम् । अवधासम्मोहादिलिङ्गगम्यं मोक्षादिफलप्रसाधकं विज्ञेयम्। शेषं प्राग्वत् ज्ञेयमिति ।।४।।

**-पाक्षिकसूत्रे ।।**

G **पायच्छित्तं विणओ वेयावच्चं तहेव सज्झाओ ।**
**झाणं उस्सग्गोऽवि च अब्भिंतरओ तवो होइ ।। २७१ ।।**

**वृ०** x x x **'झाण'** मिति ध्यायते-चिन्त्यते वस्त्वनेनेति ध्यातिर्वा ध्यानम्-अन्तर्मुहूर्तमात्रकाल-मेकाग्रचित्ताध्यवसानम्, यदाहुः- [ध्यानशतके]

"अंतोमुहुत्तमेत्तं चित्तावत्थाणमेगवत्थुंमि । छउमत्थाणं झाणं जोगनिरोहो जिणाणं तु ।। ३ ।।" तच्चतुर्धा-आर्त्तरौद्रधर्म्यशुक्लभेदात्, तत्र ऋतं-दुःखं तस्य निमित्तं तत्र वा भवं ऋते वा-पीडिते प्राणिनि भवमार्त्तम्, तच्चामनोज्ञानां शब्दरूपरसस्पर्शगन्धलक्षणानां विषयाणां तदाश्रयभूतवायसादिवस्तूनां वा समुपनतानां विप्रयोगप्रणिधानं भाविनां वाऽसम्प्रयोगचिन्तनम् १, एवं शूलशिरोरोगादिवेदनाया अपि विप्रयोगासंप्रयोग- प्रार्थनम् २, इष्टशब्दादिविषयाणां सातवेदनायाश्चाविप्रयोगसम्प्रयोगप्रार्थनम् ३, देवेन्द्रचक्रवर्तित्वादिप्रार्थनं च ४। शोकाक्रन्दनस्वदेहताडनविलपनादिलक्षणलक्ष्यं तिर्यग्गतिगमनकारणं विज्ञेयम् **१।**

तथा रोदयत्यपरानिति रुद्रम्ः-प्राणिवधादिपरिणत-आत्मैव तस्येदं कर्म रौद्रम्, तदपि सत्त्वेषु वधवेधबन्धनदहना-ङ्कनमारणादिप्रणिधानम् १, पैशून्यासभ्यासद्भूतभूतघातादिवचनचिन्तनम् २, तीव्रकोपलो-भाकुलं भूतोपघातपरायणं परलोकापायनिरपेक्षं परद्रव्यहरणप्रणिधानम् ३, सर्वाभिशङ्कनपरंपरोपघात-परायणशब्दादिविषयसाधकद्रव्यसंरक्षणप्रणिधानं च ४। उत्सन्नवधादिलिङ्गगम्यं नरकगति-गमनकारणमवसेयम् **२** ।

तथा धर्मः- क्षमादिदशलक्षणस्तस्मादनपेतं धर्म्यम्, तच्च सर्वज्ञाऽऽज्ञानुचिन्तनम् **१,** रागद्वेषकषायेन्द्रिय-वशजन्तूनामपायविचिन्तनम् २, ज्ञानावरणादिशुभाशुभकर्मविपाकसंस्मरणम् ३, क्षितिवलयद्वीपसमुद्रप्रभृति-वस्तुसंस्थानादिधर्मालोचनात्मकम् ४। जिनप्रणीतभाव-श्रद्धानादिचिह्नगम्यं देवगत्यादिफलसाधकं ज्ञातव्यम् **३।**

तथा शोधयत्यष्टप्रकारं कर्ममलं शुचं वा- शोकं क्लमयति-अपनयतीति निरुक्तविधिना शुक्लम्, एतदपि पूर्वगतश्रुतानुसारिनानानयमतैकद्रव्योत्पत्तिस्थिति-भङ्गादिपर्यायानुस्मरणादिस्वरूपम् ४ अवधासम्मोहादि-लिङ्गगम्यं मोक्षादिफलप्रसाधकं विज्ञेयम् **४।** अत्र च धर्मशुक्ले एव तपसी निर्जरार्थत्वात्, नार्तरौद्रे बन्धहेतुत्वादिति ११ । **—प्रवचनसारोद्धारवृत्तौ ।।**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

वसायः, ऋते भवमार्त्तं क्लिष्टमित्यर्थः[३], हिंसाद्यतिक्रौर्यानुगतं **रौद्रम्**[४], श्रुतचरणधर्मानुगतं **धर्म्यम्**[५], शोधयत्यष्टप्रकारं कर्ममलं शुचं वा क्लमयतीति **शुक्लम्**[६], अमूनि **ध्यानानि** वर्तन्ते।

अधुना फलहेतुत्वमुपदर्शयति - **तत्र** ध्यानचतुष्टये **अन्त्ये** चरमे सूत्रक्रमप्रामाण्याद्धर्मशुक्ले इत्यर्थः, किम् ? **निर्वाणसाधने** इह निर्वृतिर्निर्वाणं सामान्येन सुखमभिधीयते, तस्य **साधने** कारणे इत्यर्थः[७], ततश्च-

---

[३] A x x x राज्योपभोगशयनासनवाहनेषु, स्त्रीगन्धमाल्यमणिरत्नविभूषणेषु ।
इच्छाभिलाषमतिमात्रमुपैति मोहाद्, ध्यानं तदार्त्तमिति तत्प्रवदन्ति तज्ज्ञाः ॥ १ ॥
**—दशवैकालिक अ.१, हा.वृत्तौ ॥**

B **आर्त्तं रौद्रमपध्यानं पापकर्मोपदेशिता** । x x x ॥ **७३** ॥

**वृ०** अपकृष्टं ध्यान**मपध्यानम्**, तदनर्थदण्डस्य प्रथमो भेदः । तच्च द्वेधा - **आर्त्तं रौद्रं** च, तत्र ऋतं दुःखम्, तत्र भवमार्त्तम्, यदि वा अर्त्तिः पीडा याचनं च तत्र भवमार्त्तम् । x x x **—योगशास्त्रे, प्र. ३ ॥**

C **वृ०** उक्तं सप्तमं व्रतमथानर्थदण्डपरिहाराख्यमष्टमम् x x x
स चापध्यान १, पापोपदेश २, हिंस्रप्रदान ३, प्रमादाचरित ४ भेदाच्चतुर्द्धा, तत्रापध्यानम्- आर्त्तरौद्रभेदाद्- द्विधा- तत्राप्या**र्त्तं** चतुर्द्धा-अनिष्टशब्दादीनां कालत्रयेऽप्यत्यन्तविप्रयोगचिन्ता १, एवं रोगादिवेदनाया विप्रयोगचिन्ता २, इष्टशब्दादीनां कालत्रयेऽप्यत्यर्थं संयोगाध्यवसायः ३, दिव्यभोगर्द्धिराज्यादि- निदानाध्यवसायश्चेति ४ ।
**रौद्रम**पि चतुर्द्धा- हिंसानुबन्धि १, मृषानुबन्धि २, स्तेयानुबन्धि ३, विषयसंरक्षणानुबन्धि च ४ । तत्राद्यमतिक्रोधादिना द्वेष्यं प्रति वध-बन्धना-ऽङ्कन-हिंसन-पुरदेशभङ्गादिचिन्ता १, द्वितीयं पिशुनासभ्यासद्भूतघातकादिवाक्प्रणिधानम् २, तृतीयं परस्वहरणचिन्ता ३, तुर्यं शब्दादिविषय- साधनधनरक्षार्थं सर्वेषामविश्वसनेनोपघात एव श्रेयानिति दुर्ध्यानम् ४ ॥
**—श्राद्धप्रति. सूत्र, अर्थदीपिकाटीकायाम्, गा. २४॥**

[४] A संछेदनैर्दहनभञ्जनमारणैश्च, बन्धप्रहारदमनैर्विनिकृन्तनैश्च ।
यो याति रागमुपयाति च नानुकम्पां ध्यानन्तु रौद्रमिति तत्प्रवदन्ति तज्ज्ञाः ॥ २ ॥
**—दशवैकालिक, अ. १. हा. वृत्तौ ॥**

B रोदयत्यपरानिति रुद्रो दुःखहेतुः, तेन कृतं तस्य वा कर्म **रौद्रम्**।.... ॥७३॥ **—योगशास्त्रे, प्र. ३ ॥**

[५] सूत्रार्थसाधनमहाव्रतधारणेषु, बन्धप्रमोक्षगमनागमहेतुचिन्ता ।
पञ्चेन्द्रियव्युपरमश्च दया च भूते, ध्यानं तु धर्ममिति तत्प्रवदन्ति तज्ज्ञाः ॥ ३ ॥ **— दशवै. अ.१, हा. वृत्तौ ॥**

[६] यस्येन्द्रियाणि विषयेषु पराङ्मुखानि, सङ्कल्पकल्पनविकल्पविकारदोषैः ।
योगैः सदा त्रिभिरहो निभृतान्तरात्मा, ध्यानोत्तमं प्रवरशुक्लमिदं वदन्ति ॥ ४ ॥... ॥
**—दशवैकालिक अ. १, हा. वृत्तौ ॥**

[७] अव. तेषामित्यनेन सूत्रं सम्बध्नाति-

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अट्टेण तिरिक्खगई रुद्दज्झाणेण गम्मती नरयं।

धम्मेण देवलोयं सिद्धिगई सुक्कझाणेणं ।।१।। [द.वै. चूर्णि, अ. १/१]

इति यदुक्तं तदपि न विरुध्यते, देवगति-सिद्धिगत्योः सामान्येन सुखसिद्धेरिति, अथापि निर्वाणं मोक्षस्तथापि पारम्पर्येण धर्मध्यानस्यापि तत्साधनत्वादविरोध इति। तथा **भवकारणमार्त-रौद्रे** इति तत्र भवन्त्यस्मिन् कर्मवशवर्तिनः प्राणिन इति **भवः** संसार एव, तथाऽप्यत्र व्याख्यानतो विशेषप्रतिपत्तेस्तिर्यग्नरकभवग्रह इति गाथार्थः ।।५।।

---

मू० **परे मोक्षहेतू ।। ९-३० ।।**

भा० **तेषा चतुर्णां ध्यानानां परे धर्म्य-शुक्ले मोक्षहेतू भवतः ।**

**पूर्वे त्वार्तरौद्रे संसारहेतू इति ।। ३० ।।**

वृ० **तेषां चतुर्णामित्यादि** । यानि प्रस्तुतानि ध्यानानि **तेषामार्त**-रौद्र-धर्म-शुक्लानां **चतुर्णां ध्यानानां** सूत्रसन्निवेशमाश्रित्य **परे धर्म्य-शुक्ले मोक्षहेतू** मुक्तेः कारणतां प्रतिपद्येते । तत्रापि साक्षान्मुक्तेः कारणीभवतः पाश्चात्यौ शुक्लध्यानभेदौ सूक्ष्मक्रियमप्रतिपाति व्युपरतक्रियां वा निवर्ति, धर्म्यध्यानं पुनराद्याभ्यां सह शुक्लभेदाभ्यां पारंपर्येण मोक्षस्य कारणं भवति, न साक्षादिति । ततश्चैतद्धर्म्यध्यानादि देवगतेर्मुक्तेश्च कारणम्, न मुक्तेरेव । अर्थादिदमगम्यमानमाह- **पूर्वे त्वार्तरौद्रे संसारहेतू इति** । आर्त-रौद्रयोः संसारहेतुतैव, न जातुचिन्मुक्तिहेतुता। **संसारश्च** नारकादिभेदश्चतुर्गतिक इति । परमार्थतस्तु रागद्वेषमोहाः संसारहेतवः। तदनुगतं चार्तरौद्ररूपमपि प्रकृष्टतमरागद्वेषमोहभाजः, अतः संसारपरिभ्रमणहेतुता तयोरिति ।। ३० ।। **—तत्त्वार्थ. सिद्ध. वृत्तौ ।।**

८ **अव०** अथ ध्यानस्यैव भेदानाह -

**कायादि तिहिक्किक्कं, चित्तं तिव्व मउयं च मज्झं च ।**

**जह सीहस्स गतीओ, मंदा य पुता दुया चेव ।। १६४२ ।।**

वृ० तत् पुनर्दृढाध्यवसायात्मकं **चित्तं** त्रिधा - **कायिकं वाचिकं मानसिकं च** । कायिकं नाम यत् कायव्यापारेण व्याक्षेपान्तरं परिहरन्नुपयुक्तो भङ्गकचारणिकां करोति, कूर्मवद्वा संलीनाङ्गोपाङ्गस्तिष्ठति । वाचिकं तु 'मयेदृशी निरवद्या भाषा भाषितव्या, नेदृशी सावद्या' इति विमर्शपुरस्सरं यद्भाषते, यद्वा विकथादिव्युदासेन श्रुतपरावर्त्तनादिकमुपयुक्तः करोति तद् वाचिकम् । मानसं त्वेकस्मिन् वस्तुनि चित्तस्यैकाग्रता । **पुनरेकैकं त्रिविधम् - तीव्रं मृदुकं च मध्यं च** । तत्र तीव्रम् - उत्कटम्, मृदुकं च - मन्दम्, मध्यं च- नातितीव्रं नातिमृदुकमित्यर्थः । **यथा सिंहस्य गतयस्तिस्रो** भवन्ति । तद्यथा - **मन्दा च प्लुता च द्रुता चैव** । तत्र मन्दा-विलम्बिता, प्लुता-नातिमन्दा नातित्वरिता, द्रुता च - अतिशीघ्रवेगा ।। १४६२।। **—बृहत्कल्पसूत्रे ।।**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# [अथ आर्त्तध्यानम्]

साम्प्रतं यथोद्देशस्तथा निर्देश इति न्यायादार्तध्यानस्य स्वरूपाभिधानावसरः, तच्च स्वविषय-लक्षणभेदतश्चतुर्द्धा । उक्तं च भगवता **वाचकमुख्येन**-"आर्तममनोज्ञानां सम्प्रयोगे तद्विप्रयोगाय स्मृतिसमन्वाहारः ।। वेदनायाश्च ।। विपरीतं मनोज्ञादीनाम् [मनोज्ञानाम्]।। निदानं च ।।" [तत्त्वार्थ, ९/ ३१-३४] इत्यादि । तत्राऽऽद्यभेदप्रतिपादनायाह-

**अमणुण्णाणं सद्दाइविसयवत्थूण दोसमइलस्स ।**
**धणियं विओगचिंतणमसंपओगाणुसरणं च ।।६।।**

**अमणु० गाहा ।।** [१]**अमनोज्ञानाम्** इति मनसोऽनुकूलानि मनोज्ञानि इष्टानीत्यर्थः, न मनोज्ञानि अमनोज्ञानि तेषाम् । केषामिति अत आह-**शब्दादिविषयवस्तूनाम्**[a] शब्दादयश्च ते[b] विषयाश्च शब्दादिविषयाः, आदिग्रहणाद्वर्णादिपरिग्रहो विषीदन्ति एतेषु सक्ताः प्राणिन इति विषया इन्द्रियगोचरा[c], वस्तूनि तु तदाधारभूतानि रासभादीनि, ततश्च शब्दादिविषयाश्च वस्तूनि चेति विग्रहस्तेषाम्, किम् ? सम्प्राप्तानां सतां **'धणियं'** अत्यर्थं **वियोगचिन्तनं** विप्रयोगचि[d]-न्तेति योगः, कथं नु नाम ममैभिर्वियोगः स्यादिति भावः, अनेन वर्त्तमानकालग्रहः।

---

१ A **अव० भा० - अत्राह- किमेषां लक्षणमिति ? । अत्रोच्यते -**

वृ० सम्प्रति ध्येयप्रकारा विषयविषयिविकल्पनिमित्तभेदेनोच्यन्ते-अत्राहेत्यादि । सम्बन्धो लक्ष्येन येन तल्लक्षणं विलापशोकादि। अमनोज्ञविषयसम्बन्धे क्रन्दति शोचतीति लक्ष्यते आर्तध्यायी ।।

मू० **आर्तममनोज्ञानां सम्प्रयोगे तद्विप्रयोगाय स्मृतिसमन्वाहारः ।। ९-३१ ।।**

भा० **अमनोज्ञानां विषयाणां सम्प्रयोगे तेषां विप्रयोगार्थं यः स्मृतिसमन्वाहारो भवति तदार्तध्यानमित्याचक्षते ।।३१।। किञ्चान्यत्-**

वृ० **आर्तममनोज्ञानामित्यादि** । आर्तशब्दः पूर्ववद् व्याख्येयः । अयं चापरप्रकारः । अर्तिर्धातुर्दुःखार्थः। तस्यार्तिरिति रूपम्। अर्तिश्च-दुःखं शारीरं मानसं चानेकप्रकारम्, तस्यां भवमार्तं ध्यानम् । **अमनोज्ञा** अनिष्टाः शब्दादयः तेषां सम्बन्धे इन्द्रियेण सह सम्पर्के सति चतुर्णां शब्द-स्पर्श-रस-गन्धानामेकस्य च योग्यदेशावस्थितस्य द्रव्यादेस्तेन विषयिणा ग्राह्यग्राहकलक्षणे **सम्प्रयोगे** सति **तद्विप्रयोगोयेति** । तदित्यमनोज्ञविषयाभिसम्बन्धः। तेषाममनोज्ञानां शब्दादिनां विप्रयोगोऽपगमस्तदर्थं विप्रयोगा-यानिष्टशब्दादिविषयपरिहाराय यः **स्मृतिसमन्वाहारस्तदार्तम्** । स्मृतिसमन्वाहारो नाम तद्विप्रयोगादेवानुग्रहप्रतिपत्तीच्छया य आत्मनः प्रणिधानविशेषः स समन्वाहारः स्मृतेः कथमहमस्मादमनोज्ञविषयसम्प्रयोगाद् विमुच्येयेति । स्मर्यतेऽनेनेति स्मृतिर्मनोऽभिधीयते।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तथा सति च वियोगेऽ**सम्प्रयोगानुस्मरणम्** कथमेभिः सदैव सम्प्रयोगाभाव इति, अनेन चानागतकालग्रहः, **चशब्दात्** [२]पूर्वमपि वियुक्तासंयुक्तयोर्बहुमतत्वेनातीतकालग्रहः । [e] [f]

किंविशिष्टस्य सत इदं वियोगचिन्तनाद्यत आह-**द्वेषमलिनस्य** जन्तोरिति गम्यते, तत्राप्रीतिलक्षणो द्वेषस्तेन मलिनस्तस्य तदाक्रान्तमूर्तेरिति गाथार्थः ।।६।।

उक्तः **प्रथमभेदः**[a], अधुना[b] **द्वितीयम**भिधित्सुराह-

**तह सूल-सीसरोगाइवेयणाए विजोगपणिहाणं ।**
**तदसंपओगचिंता तप्पडियाराउलमणस्स ।।७।।**

---

स्मृतिहेतुत्वाद् वा स्मृतिर्मनः । तस्याः स्मृतेः प्रणिधानरूपायाः समन्वाहरणं समन्वाहारः । अमनोज्ञविषयविप्रयोगोपाये व्यवस्थापनं मनसो निश्चलमार्तध्यानं केनोपायेन वियोगः स्यादित्येकतानमनोनिवेशनमार्तध्यानमित्यर्थः ।। ३१।। **—तत्त्वार्थ. सिद्ध. वृत्तौ ।।**

B **ज्वलन-वन-विषास्त्रव्यालशार्दूलदैत्यैः, स्थलजलबिलसत्त्वैर्दुर्जनारातिभूपैः ।**
**स्वजनधनशरीरध्वंसिभिस्तैरनिष्टै-र्भवति यदिह योगादाद्यमार्त्तं तदेतत् ।। २५ ।।**

**तथा चरस्थिरैर्भावै-रनेकैः समुपस्थितैः ।**
**अनिष्टैर्यन्मनः क्लिष्टं, स्यादार्त्तं तत्प्रकीर्तितम् ।। २६ ।।**

**श्रुतैर्दृष्टैः स्मृतैर्ज्ञातैः, प्रत्यासत्तिं च संसृतैः ।**
**योऽनिष्टार्थैर्मनःक्लेशः, पूर्वमार्त्तं तदिष्यते ।। २७ ।।**

**अशेषानिष्टसंयोगे, तद्वियोगानुचिन्तनम् ।**
**यत्स्यात्तदपि तत्त्वज्ञैः, पूर्वमार्त्तं प्रकीर्तितम् ।। २८ ।।** **—ज्ञानार्णवे, सर्ग-२५ ।।**

C **विषदहनवनभुजङ्गमहरिशस्त्रारातिमुख्यदुर्जीवैः ।**
**स्वजनतनुघातकृद्भिः सह योगेनार्त्तमाद्यं च ।। ७१ ।।**

**श्रुतैर्दृष्टैः स्मृतैर्ज्ञातैः, प्रत्यासत्तिसमागतैः ।**
**अनिष्टार्थैर्मनःक्लेशे, पूर्वमार्त्तं भवेत्तदा ।। ७२ ।।** **—ध्यानदीपिकायाम् ।।**

२ **पूर्वमपि वियुक्तासंयुक्तयोर्बहुमतत्वेनेत्यादि** । यदतीतकाले ममामुकः संयुज्य वियुक्तः आदित एव वा न संयुक्तस्तत्सुन्दरमभूद् इत्यतीतमनुमोदमानस्यातीतकालविषयमप्यार्त्तं भवतीति ।
**—आवश्यकटिप्पनके ।।**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**तह० गाहा** ।। **तथा**[1] इति धणियम्-अत्यर्थमेव, **शूल-शिरोरोगवेदनाया** इत्यत्र शूल-शिरोरोगौ प्रसिद्धौ, आदिशब्दाच्छेषरोगातङ्कपरिग्रहः, ततश्च शूल-शिरोरोगादिभ्यो वेदना शूल-शिरोरोगादिवेदना, वेद्यत इति वेदना[c] तस्याः, किम् ? **वियोगप्रणिधानं** वियोगे[d] दृढाध्यवसाय इत्यर्थः, अनेन वर्तमानकालग्रहः ।

अनागतमधिकृत्याह-**तदसम्प्रयोगचिन्ता** इति तस्याः-वेदनायाः कथञ्चिदभावे सत्यसम्प्रयोगचिन्ता-कथं पुनर्ममानया आयत्यां सम्प्रयोगो न स्यात् ? इति, चिन्ता[e] चात्र ध्यानमेव गृह्यते, अनेन च वर्तमानानागतकालग्रहेणा[f]तीतकालग्रहोऽपि कृत एव वेदितव्यः, तत्र च भावनाऽनन्तरगाथायां कृतैव।

किंविशिष्टस्य सत इदं वियोगप्रणिधानाद्यत आह-**तत्प्रतिकारे** वेदनाप्रतिकारे चिकित्सायाम**आकुलं** व्यग्रं **मनः** अन्तःकरणं यस्य स तथाविधस्तस्य, वियोगप्रणिधानाद्यार्त-ध्यानमिति गाथार्थः ।।७।।

उक्तो **द्वितीयो**[a] **भेदः**, अधुना[b] **तृतीयमु**पदर्शयन्नाह-

**इट्ठाणं विसयाईण वेयणाए य रागरत्तस्स ।**
**अवियोगऽज्झवसाणं तह संजोगाभिलासो य ।।८।।**

---

[१] A **अव०** प्रकारान्तरमन्यदस्यार्तस्यास्तीत्याह-
**मू०** **वेदनायाश्च ।। ९-३२ ।।**
**वृ०** वेदनं-वेदनाया अनुभवः । अनन्तरसूत्रमनुवर्तते तदभिसम्बध्नन् भाष्यकृदाह-
**भा०** **वेदनायाश्चामनोज्ञायाः सम्प्रयोगे तद्विप्रयोगाय स्मृतिसमन्वाहार आर्तमिति ।। ३२ ।। किञ्चान्यत् -**
**वृ०** **वेदनाया अमनोज्ञाया इत्यादि** । सुखा दुःखा चोभयी **वेदना** । तत्रा**मनोज्ञायाः सम्प्रयोगे** वेदनायाः प्रकुपितपवनपित्तश्लेष्मसन्निपातनिमित्तैरुपजातायाः शूलशिरःकम्पज्वराक्षिश्रवणदशनादिकायास्**तद्विप्रयोगाय स्मृतिसमन्वाहारो** ध्यानमार्तमेष द्वितीयो विकल्पः । **—तत्त्वार्थ. सिद्ध. वृत्तौ ।।**

B **कासश्वासभगन्दरोदरजराकुष्ठातिसारज्वरैः,**
**पित्तश्लेष्ममरूत्प्रकोपजनितै रोगैः शरीरान्तकैः ।**
**स्यात्सत्त्वप्रबलैः प्रतिक्षणभवैर्यद् व्याकुलत्वं नृणाम्;**
**तद्रोगार्त्तमनिन्दितैः प्रकटितं दुर्वारदुःखाकरम् ।। ३२।।**
**स्वल्पानामपि रोगाणां, माभूत्स्वप्नेऽपि सम्भवः ।**
**ममेति या नृणां चिन्ता, स्यादार्त्तं तत्तृतीयकम् ।। ३३।।** **—ज्ञानार्णव सर्ग-२५ ।।**

C **अल्पानामपि रोगाणां, मा भूत्स्वप्नेऽपि सङ्गमः ।**
**ममेति या नृणां चिन्ता, स्यादार्त्तं तत्तृतीयकम् ।। ७६।।** **—ध्यानदीपिकायाम् ।।**

**इट्ठाणं० गाहा** ।। **इष्टानां**[१] मनोज्ञानां **विषयादीनामि**ति विषयाः पूर्वोक्ताः, आदिशब्दाद् वस्तुपरिग्रहः, तथा **वेदनायाश्च** इष्टाया इति वर्तते, किम्? **अवियोगाध्यवसानमि**ति योगः, अविप्रयोगदृढाध्यवसाय इति भावः, अनेन वर्तमानकालग्रहः।

**तथा संयोगाभिलाषश्चे**ति तत्र तथेति धणियमित्यनेनात्यर्थप्रकारोपदर्शनार्थः, संयोगाभिलाषः-कथं ममैभिर्विषयादिभिरायत्यां सम्बन्ध इतीच्छा, अनेन किलानागतकालग्रह इति वृद्धा व्याचक्षते, **च**शब्दात् पूर्ववदतीतकालग्रह इति ।

किंविशिष्टस्य सत इदमवियोगाध्यवसानाद्यत आह - **रागरक्तस्य,** जन्तोरिति गम्यते, तत्राभिष्वङ्गलक्षणो रागस्तेन रक्तस्य तद्भावितमूर्तेरिति गाथार्थः ।।८।।

---

१ A **अव०** किञ्चान्यदित्यार्तप्रकारान्तरं दर्शयति-

**मू०** **विपरीतं मनोज्ञानाम्** ।। ९-३३ ।।

**भा०** **मनोज्ञानां विषयाणां मनोज्ञायाश्च वेदनाया विप्रयोगे तत्सम्प्रयोगाय स्मृतिसमन्वाहार आर्तम्** ।। ३३ ।। **किञ्चान्यत्-**

**वृ०** **मनोज्ञा** अभिरुचिता इष्टां प्रीतिहेतवस्तेषां **विपरीतं** संयोजनं कार्यम् । **मनोज्ञानामित्यादि । मनोज्ञानां विषयाणां वेदनायाश्च मनोज्ञाया** विपरीतप्रधानार्थाभिसम्बन्धो विपरीतशब्देन क्रियत इत्याह– **विप्रयोगे तत्सम्प्रयोगायेत्यादि** । तत्सम्प्रयोगार्थस्तत्सम्प्रयोगाय सम्प्रयोगप्रयोजनः **स्मृतेः समन्वाहारः** । कथं नु नाम भूयोऽपि तैः सह मनोज्ञविषयैः सम्प्रयोगः स्यान्ममेति । एवं प्रणिधत्ते दृढं मनस्तदप्या**र्तमि**ति ।। ३३ ।। **—तत्त्वार्थ. सिद्ध. वृत्तौ** ।।

B इष्टविषयोपनीतं ध्यानमेव सर्वकार्यकरमित्युक्तं निराकर्त्तुमाह—

**इट्ठविसयाणुगाण य, झाणं कलुसाहमं विणिद्दिट्ठं ।**
**सूअगडे मंसट्ठिअ-जीवाणं मच्छझाणं व ।। ६१ ।।**

**वृ०** **'इट्ठविसय'**त्ति । **इष्टविषयानुगानां च** मनोज्ञभोजनादिविषयासक्तानां च **ध्यानं कलुषाधमम्** आर्त्तरौद्ररूपतया मलिनं चाधमं **तद् विनिर्दिष्टं** प्रतिपादितं **सूत्रकृते** द्वितीयाङ्गे **मांसार्थिनां जीवानां मत्स्यध्यानमिव,** विषयस्वाभाव्यादेव हीष्टविषयप्राप्तिर्धर्मध्यानं प्रतिबन्धात्यधर्मं चाधत्ते, विषयद्वेषजनितं वैराग्यं विनाऽर्थप्राप्यापीच्छानिवृत्त्यसिद्धेरध्यात्ममतपरीक्षायां व्यवस्थापितत्वात् । तथा च मनोज्ञभोजनादि-सेविनामनभ्यस्तचरणानां ध्यानमप्यशुभमेवेति भावः, तथा च **सूत्रकृतग्रन्थः—**

"तमेव अविजाणंता, अबुद्धा बुद्धमाणिणो । बुद्धामु त्ति य मण्णंता, अंतए ते समाहिए ।।१।।

ते य बीओदगं चेव, तमुद्दिस्स जयं कडं । भुच्चा झाणं झियायंति, अखेअण्णाऽसमाहिआ ।।२।।

जहा ढंका य कंका य, कुलला मणुका सिही । मच्छेसणं झियायंति, झाणं ते कलुसाहमं ।।३।।

एवं तु समणा वेगे, मिच्छद्दिट्ठी अणारिआ । विसएसणं झियायंति, कंका वा कलुसाहमा ।।४।।"

इति ।।६१।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

उक्तस्तृतीयो भेदः, साम्प्रतं **चतुर्थम**भिधित्सुराह-

एतदेव भावयति—

**घरखित्तनयरगोउलदासाईणं परिग्गहो जेसिं ।**
**गारवतियरसिआणं सुद्धं झाणं कओ तेसिं ।।६२।।**

वृ॰ **'घर'** त्ति । **गृहक्षेत्रनगरगोकुलदासादीनां येषां** शाक्यादीनां **परिग्रहस्तेषां गारवत्रिकरसिकानाम्** ऋद्धिरससातगौरवासक्तमनसां सङ्घभक्तादिक्रियया मनोज्ञं भोजनमवाप्य तदवाप्तिकृते आर्त्तध्यानं ध्यायतां **कुतः शुद्धं** धर्म्यं **ध्यानं** स्यात्, **तदुक्तम्**—

**"ग्रामक्षेत्रगृहादीनां, गवां प्रेष्यजनस्य च ।**
**यस्मिन् परिग्रहो दृष्टो, ध्यानं तत्र कुतः शुभम् ।।१।।" इति ।। ६२।।**

**गिहिदिसबंधरयाणं, असुद्धआहारवसइसेवीणं ।**
**पासत्थाणं झाणं, नियमेणं दुग्गइनियाणं ।।६३।।**

वृ॰ **'गिहि'** त्ति । **गृहिणां** यो **दिग्बन्धः** स्वायत्तकरणं यद्बलात्तेषां तत्पुत्रादीनां च संविग्नानां समीपे धर्मोपदेशश्रवणप्रव्रज्यादानादिकं निषिध्यते तत्र प्रवचनप्रतिषिद्धेऽपि **रतानाम्** आसक्तानाम् **अशुद्धाहारवसतिसेविनां पार्श्वस्थानां ध्यानं नियमेन दुर्गतिनिदानम्,** आर्त्तरौद्ररूपत्वादिति ।।६३।।

इष्टविषयानुगानां नास्त्येव शुभध्यानमित्युक्तम्, अतस्तद्विरक्तानामेव तत्सम्भवतीत्याह—

**विसयविरत्तमईणं, तम्हा सव्वासवा णियत्ताणं ।**
**झाणं अकिंचणाणं, णिसग्गओ होइ णायव्वं ।।६४।।**

वृ॰ **'विसय'** त्ति । **तस्माद्** उक्तहेतो**र्विषयविरक्तमतीनां सर्वाश्रवान्निवृत्तानाम् अकिञ्चनानाम्** परद्रव्यप्रतिबन्धत्यागेनात्मस्वभावाचरणप्रतिबद्धानां **निसर्गतः** स्वभावतः **ध्यानं** धर्मशुक्ललक्षणं **ज्ञातव्यं भवति,** गगनेऽभ्रनिवृत्तौ विधोस्तेज इव विषयनिवृत्तावात्मनो ध्यानस्य स्वतः प्रसरणशीलत्वादिति ।।६४।।

**—गुरुतत्वविनिश्चये, उल्लास-४ ।।**

C **राज्यैश्वर्यकलत्रपुत्रविभवक्षेत्रस्वभोगात्यये,**
**चित्तप्रीतिकरप्रशस्तविषयप्रध्वंसभावेऽथवा ।**
**सत्रासभ्रमशोकमोहविवशैर्यं चिन्त्यतेऽहर्निशम्,**
**तत्स्यादिष्टवियोगजं तनुमतां ध्यानं मनोदुःखदम् ।। ७३ ।।**
**दृष्टश्रुतानुभूतैस्तैः, पदार्थैश्चित्तरञ्जकैः ।**
**वियोगे यन्मनःक्लेशः, स्यादार्त्तं चेष्टहानिजम् ।। ७४ ।।**
**मनोज्ञवस्तु विध्वंसे, पुनस्तत्सङ्गमार्थिभिः ।**
**क्लिश्यन्ते यत् तदेतत्स्याद्, द्वितीयार्त्तस्य लक्षणम् ।। ७५ ।।—ज्ञानार्णवे ध्यानदीपिकायां च ।।**

D ममत्वपरिणामलक्षणा मूर्च्छा,ममत्वपरिणामश्च नाज्ञानलक्षणः, तस्य ज्ञानादेव नाशात्, किन्तु प्राप्तेष्टवस्त्ववियोगाध्यवसानाऽप्राप्ततदभिलाषलक्षणार्त्तध्यानस्वरूपः ।।—**अध्यात्ममतपरीक्षायाम्, गा. ६ ।।**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**देविंद-चक्कवट्टित्तणाइगुण-रिद्धिप[a]त्थणामईयं ।**
**अहमं नियाणचिंतणमण्णाणाणुगयमच्चंतं ।।९।।**

**देविंद० गाहा** ।। [१]दीव्यन्तीति देवाः-भवनवास्यादयस्तेषामिन्द्राः–प्रभवो **देवेन्द्राः** चमरादयस्तथा चक्रं-प्रहरणं तेन विजयाधिपत्ये वर्तितुं शीलमेषामिति **चक्रवर्तिनो** भरतादयः, आदिशब्दाद् बलदेवादिपरिग्रहः, अमीषां **गुण[b]र्द्धी** देवेन्द्रचक्रवर्त्यादिगु[c]णर्द्धी, तत्र गुणाः सुरूपादयः, ऋद्धिस्तु विभूतिः, **तत्प्रार्थनात्मकं** तद्याञ्चामयमित्यर्थः,

---

[१] A अव० किञ्चान्यदिति तुरीयमार्तप्रकारं दर्शयति—

मू० **निदानं च ।। ९-३४ ।।**

वृ० निपूर्वाद् दातेर्लवनार्थस्य ल्युटि रूपम् । निदायते-लूयते लुप्यते येनात्महितमैकान्तिकात्यन्तिकानाबाध-सुखलक्षणं **तन्निदानमिति**। **चशब्दः** समुच्चये । एष चार्तप्रकार इत्यर्थः ।

भा० **कामोपहतचित्तानां पुनर्भवविषयसुखगृद्धानां निदानमार्तध्यानं भवति ।। ३४ ।।**

वृ० **कामोपहतचित्तानामित्यादि । काम** इच्छाविशेषः शब्दाद्युपयोगविषयः । अथवा मदनः कामश्चिरमुग्रतपोनिष्ठाय कर्मक्षपणक्षमदीर्घदर्शितया खल्वस्य विनश्वरस्यावितृप्तिकारिणः सुरमनुजसुखैश्वर्य-सौभाग्यादेः कृते तत्रैव कृतदृढप्रणिधाना बह्वविनश्वरं सतततृप्ति-कारणमुक्तिसुखमनुपममवमन्य, प्रवर्तमानाः **कामोपहतचेतसः पुनर्भवविषयगृद्धा** विदधति **यन्निदानं तदार्तध्यानं** निदानरूपम् । एष एवार्थो विभक्त्यन्तरेण प्रतिपादितः। कामोपहतचित्तानां पुनर्भवविषयसुखगृद्धानां निदानमार्तध्यानं भवतीति। तस्य एतस्य x x x **—तत्त्वार्थ. सिद्ध. वृत्तौ ।।**

B **भोगा भोगीन्द्रसेव्यास्त्रिभुवनजयिनी रुपसाम्राज्यलक्ष्मी,**
**राज्यं क्षीणारिचक्रं विजितसुखधूलास्य-लीलायुवत्यः ।**
**अन्यच्चानन्दभूतं कथमिह भवतीत्यादि चिन्तासुभाजाम्;**
**यत्तद्भोगार्त्तमुक्तं परमगुणधरैर्जन्मसन्तानमूलम् ।। ३४ ।।**

**पुण्यानुष्ठानजातैरभिलषति पदं यज्जिनेन्द्रामरणाम्,**
**यद्वा तैरेव वाञ्छत्यहितकुलकुजच्छेदमत्यन्तकोपात् ।**
**पूजा-सत्कार-लाभप्रभृतिकमथवा याचते यद्विकल्पैः;**
**स्यादार्त्तं तन्निदानप्रभवमिह नृणां दुःखदावोग्रधाम ।। ३५ ।।**

**इष्टभोगादिसिद्ध्यर्थं, रिपुघातार्थमेव वा ।**
**यन्निदानं मनुष्याणाम्, स्यादार्त्तं तत्तुरीयकम् ।। ३६ ।।** **—ज्ञानार्णवे, सर्ग. २५ ।।**

C **राज्यं सुरेन्द्रता भोगाः, खगेन्द्रत्वं जयश्रियः ।**
**कदा मेऽमी भविष्यन्ति, भोगार्त्तं चेति सङ्गतम् ।। ७७ ।।**
**पुण्यानुष्ठानजातैरभिलषति पदं यज्जिनेन्द्रामराणाम्,**
**यद्वा तैरेव वाञ्छत्यहितजनकुलच्छेदमत्यन्तकोपात् ।**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

किं तत् ? अधमं[२] जघन्यं **निदानचिन्तनं** निदानाध्यवसायः, अहमनेन तपस्त्यागादिना देवेन्द्रः स्यामित्यादिरूपः, आह - किमितीदमधमम् ? उच्यते - यस्माद**ज्ञानानुगतमत्यन्तम्,** तथा च **नाज्ञानिनो विहाय सांसारिकेषु सुखेष्वन्येषामभिलाष उपजायते**, उक्तं च–

"अज्ञानान्धाश्चटुलवनितापाङ्गविक्षेपितास्ते,
कामे सक्तिं दधति विभवाभोगतुङ्गार्जने वा।
विद्वच्चित्तं भवति हिं[d] महन्मोक्षकाङ्क्षैकतानम्,
नाल्पस्कन्धे विटपिनि कषत्यंसभित्तिं गजेन्द्रः ।।१।।" [ ] इति गाथार्थः ।।९।।

उक्त**श्चतुर्थभेदः**[a], साम्प्रतमिदं यथाभूतस्य भवति यद्वर्द्धनं चेदमिति तदेतदभिधातुकाम आह–

**एयं चउव्विहं राग-दोस[b]-मोहंकियस्स जीवस्स ।**
**अट्टज्झाणं संसारवद्धणं तिरियगइमूलं ।।१०।।**

**एयं० गाहा ।। एतद्** अनन्तरोदितं **चतुर्विधं** चतुष्प्रकारं **राग-द्वेष-मोहाङ्कितस्य** रागादिलाञ्छितस्येत्यर्थः, कस्य ? **जीवस्य** [c]आत्मन **आर्तध्यानमि**ति, [d]गाथाचतुष्टयस्यापि क्रिया, किंविशिष्टमिदमिति ? अत आह-**संसारवर्द्धनमोघतस्तिर्यग्गतिमूलं** विशेषत इति गाथार्थः[१] ।।१०।।

---

**पूजा-सत्कार-लाभादिकसुखमथवा याचते यद्विकल्पैः,**
**स्यादार्त्तं तन्निदानभवमिह नृणां दुःखदं ध्यानमार्त्तम् ।।७८।। —ध्यानदीपिकायाम् ।।**

२ **मू० जीवितमरणाशंसामित्रानुरागसुखानुबन्धनिदानकरणानि** ।।७-३२।।
**वृ०** x x x निदानकरणमिति । **निदानम्** अवखण्डनं तपसश्चारित्रस्य वा, यदि अस्य तपसो ममास्ति फलं ततो जन्मान्तरे चक्रवर्ती स्यामर्धभरताधिपतिर्महामण्डलिकः सुभगो रूपवानित्यादि । एतच्चात्यन्ताधममनन्तसंसारानुबन्धित्वात् परित्याज्यम् । **—तत्त्वार्थ. सिद्ध. वृत्तौ ।।**

१ A **चत्तारि झाणा पं x x x अट्टे झाणे चउव्विहे पं. तं. अमणुन्नसंपओगपउत्ते तस्स विप्पओगसतिसमण्णागते यावि भवति १, मणुन्नसंपओगसंपउत्ते तस्स अविप्पओगसतिसमण्णागते यावि भवति २, आयंकसंपओगसंपउत्ते तस्स विप्पओगसतिसमण्णागते यावि भवति ३, परिजुसितकामभोगसंपओगसंपउत्ते तस्स अविप्पओगसतिसमण्णागते यावि भवति ४ x x x ।।**

**– स्था. सू. २४७, भग. सू. ८०३, औप. सू. २० ।।**

**वृ०** सुगमं चैतन्नवरं-ध्यातयो ध्यानानि, x x x तत्र ऋतं दुःखं तस्य निमित्तं तत्र वा भवम् ऋते वा पीडिते भवमार्त्तं ध्यानं-दृढोऽध्यवसायः, हिंसाद्यतिक्रौर्यानुगतं रौद्रम्, श्रुतचरणधर्म्मादनपेतं धर्म्यम्, शोधयत्यष्टप्रकारं कर्म्ममलं शुचं वा क्लमयतीति शुक्लम्, **चउव्विहे** त्ति चतस्रो विधा-भेदा यस्य तत्तथा, **अमनोज्ञस्य** अनिष्टस्य, असमणुन्नस्स त्ति पाठान्तरे अस्वमनोज्ञस्य-अनात्मप्रियस्य शब्दादिविषयस्य तत्साधनवस्तुनो वा **सम्प्रयोगः** सम्बन्धस्तेन **सम्प्रयुक्तः** सम्बद्धः अमनोज्ञसम्प्रयोगसम्प्रयुक्तोऽस्व-

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

मनोज्ञसम्प्रयोगसम्प्रयुक्तो वा य इति गम्यते **तस्येति** अमनोज्ञशब्दादेर्**विप्रयोगाय** विप्रयोगार्थं **स्मृतिश्चि**न्ता तां **समन्वागतः** समनुप्राप्तो **भवति** यः प्राणी सोऽभेदोपचारादार्त्तमिति, चापीतिशब्द उत्तरविकल्पापेक्षया समुच्चयार्थः, अथवा **अमनोज्ञसम्प्रयोगसम्प्रयुक्तो** यः प्राणी **तस्य** प्राणिनो **विप्रयोगे** प्रक्रमादमनोज्ञशब्दादिवस्तूनां वियोजने **स्मृतिश्चि**न्तनं तस्यां **समन्वागतं** समागमनं समन्वाहारो विप्रयोगस्मृतिसमन्वागतम्, चापीति तथैव, **भवति** आर्त्तध्यानमिति प्रक्रमः, अथवा **अमनोज्ञ-सम्प्रयोगसम्प्रयुक्ते** प्राणिनि **तस्येति** अमनोज्ञशब्दादे**र्विप्रयोगस्मृतिसमन्वागतमा**र्त्तध्यानमिति, उक्तं च- -"आर्त्तममनोज्ञानां सम्प्रयोगे तद्विप्रयोगाय स्मृतिसमन्वाहारः" [तत्त्वार्थ० ९/३१] इति प्रथममेवमुत्तरत्रापि, नवरं **मनोज्ञं** वल्लभं धनधान्यादि **अविप्रयोगः** अवियोग इति द्वितीयमार्त्तमिति, तथा **आतङ्को**-रोग इति तृतीयम्, तथा **'परिजुसिय'त्ति** निषेविताः ये **कामाः** कमनीयाः **भोगाः** शब्दादयोऽथवा **कामौ** शब्दरूपे **भोगाः** गन्धरसस्पर्शाः कामभोगाः कामानां वा-शब्दादीनां यो भोगस्तैस्तेन **वा सम्प्रयुक्तः**, पाठान्तरे तु तेषां तस्य वा **सम्प्रयोगस्तेन सम्प्रयुक्तो** यः स तथा, अथवा **'परिझुसिय'**त्ति परिक्षीणो जरादिना स चासौ **कामभोगसम्प्रयुक्तश्च** यस्तस्य तेषामे**वाविप्रयोगस्मृतेः समन्वागतः** समन्वाहारः, तदपि **भवत्यार्त्त**ध्यानमिति चतुर्थम्, द्वितीयं वल्लभधनादिविषयं चतुर्थं तत्सम्पाद्यशब्दादिभोगविषयमिति भेदोऽनयोर्भावनीयः, शास्त्रान्तरे तु द्वितीयचतुर्थयोरेकत्वेन तृतीयत्वम्, चतुर्थं तु तत्र निदानमुक्तम्, उक्तं च- [ध्यानशतके]

"अमणुन्नाणं सद्दाइविसयवत्थूण दोसमइलस्स । धणियं वियोगचिंतणमसंपओगाणुसरणं च ।।६।।
(वस्तूनि-शब्दादिसाधनानि दोसोत्ति द्वेषः)
तह सूलसीसरोगाइवेयणाए विओगपणिहाणं । तयसंपओगचिंता तप्पडियाराउलमणस्स ।।७।।
इट्ठाणं विसयाईण वेयणाए य रागरत्तस्स । अविओगज्झवसाणं तह संजोगाभिलासो य ।।८।।
देविंदचक्कवट्टित्तणाइगुणरिद्धिपत्थणामइअं । अहमं नियाणचिंतणमन्नाणाणुगयमच्चंतं ।।९।। इति... ।।

**—स्थानाङ्गसूत्रवृत्तौ ।।**

B **तत्थ संखेवतो अट्टं चउव्विहं-**

अमणुण्णाणं संजोगाणं वियोगं चिंतेति-काए वेलाए विमुच्चेज्जामि ?, अणागतेऽवि असंप्रयोगाणुसरणं, अतीतेऽवि वियोगं बहु मण्णति (१)
एवं बीयं मणुण्णाणं वियोगं नेच्छति (२)
एवं ततियं आयंकस्स केण उवाएण सचित्तादिणा दव्वजातेण तिगिच्छं करेमित्ति चिंतेति (३)
चउत्थं परिहीणो वित्तेण तं पत्थेंतो वित्तं झायति, दुब्बलो थेरो असमत्थो वा भोत्तुं आहारं इत्थिं वा कदा भुंजेज्जामित्ति य चिंतेति (४)। **गाहाओ—**

अमणुण्णसंपयोगे मणुण्णवग्गस्स विप्पओगे वा । वियणाए अभिभूतो परइड्ढीओ य दट्ठूणं ।। १।।
सद्दा रूवा गंधा रसा य फासा य जे तु अमणुण्णा । बंधववियोगकाले अट्टज्झाणं झियायंति ।। २।।
एवं मणुण्णविसए इड्ढीओ चक्कवट्टिमाणदीणं । गहिते विम्हितमनसे पत्थेमाणे झियाएज्जा ।। ३।।
मित्तयनातिवियोगे वित्तविण्णासे तह य गोमहिसे । अट्टं झाणं झायति परितप्पंते सिदंते य ।। ४।।
किण्हा नीला काऊ अट्टज्झाणस्स तिण्णि लेसाओ । उव्वज्ञति तिरिएसुं भावेण य तारिसेणं तु ।। ५ ।।
अट्टं झाणं झियायंतो, किण्हलेसाए वट्टती । उक्किट्ठगंमि ठाणंमि, अचरित्ती असंजतो ।। ६ ।।
अट्टं झाणं झियायंतो, नीललेसाए वट्टती । मज्झिल्लगंमि ठाणंमि, अचरित्ती असंजतो ।। ७ ।।
अट्टं झाणं झियायंतो, काऊलेसाए वट्टती । कणिट्ठगंमि ठाणंमि, अचरित्ती असंजतो ।। ८ ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तिव्वकोधोदयाविट्ठो, किण्हलेसाणुरंजितो । अट्टं झाणं झियायंतो तिरिक्खत्तं निगच्छती ।। ९ ।।
एवं चत्तारिवि कसाया भाणितव्वा ।
मज्झिमकोधोदयाविट्ठो, नीललेसाणुरंजितो । अट्टं झाणं झियायंतो, तिरिक्खत्तं निगच्छति ।। १० ।।
एवं चतारिवि कसाया ।
मंदकोधोदयाविट्ठो, काउलेसाणुरंजितो । अट्टज्झाणं झियायंतो, तिरिक्खत्तं निगच्छति ।। ११ ।।
एवं चत्तारिवि कसाया । **—आवश्यकचूर्णौ।।**

C वृ० x x x अप्रशस्तश्च आत्मपरिणामो द्विविधः आर्त-रौद्रभेदात् । आमुहूर्तस्थायी आक्रन्दन-विलपन-परिदेवन-शोचन-परविभवविस्मय-विषयसङ्गादिकश्च स्वसंवेद्य आत्मनः अनुमेयश्च परेषाम्, क्लिष्टः परिणामविशेष आर्तध्यानशब्दवाच्यो बाह्यः आभ्यन्तरश्च, अमनोज्ञसंप्रयोगानुत्पत्त्यध्यवसानम् उत्पन्नस्य च विनाशाध्यवसायः मनोज्ञसंप्रयोगस्य उत्पत्तिकल्पनाध्यवसायः उत्पन्नस्य अविनाश-संकल्पाध्यवसानम् इत्येतत् चतुर्विधमार्तध्यानम् । अमनोज्ञसंप्रयोगश्च बाह्याध्यात्मजत्वेन द्विधा । शीता-ऽऽतप-व्यालादिजनितो बाह्यः । वात-पित्त-श्लेष्मादिप्रादुर्भूतोऽभ्यन्तरः शारीरः, भय-विषादा-ऽरति-शोक-जुगुप्सा-दौर्मनस्यादिप्रभवो मानसः । अयममनोज्ञसंप्रयोगः कथं नाम मे न संपद्यत इति सङ्कल्पप्रबन्धः । आर्तध्यानं कृष्ण-नील-कापोतलेश्याबलाधायकं प्रमादाधिष्ठानम् आप्रमत्तगुणस्थानात् तिर्यग्-मनुष्यगतिनिर्वर्तकम् उत्कर्षाऽपकर्षभेदात् क्षायोपशमिकभावरूपं परोक्षज्ञानरूपत्वात् । x x x ।।६३।। **—सम्मतिवृत्तौ, का. ३ ।।**

D **परिचत्तअट्टरूद्दे मणंमि समभावभाविए सम्मं ।**
**वरधम्मसुक्कझाणाण संकमो रुंकमो होइ मणगुत्ती ।।४८४।।**

वृ० xxx परित्यक्तार्त्तरौद्रे । तत्रार्त्तं चतुर्द्धा-अमनोज्ञानां शब्दादिविषयवस्तूनां सम्प्रयोगे तद्विप्रयोगाय स्मृतिसमन्वाहारः । कथं नु नाम ममैभिर्वियोगः स्यादिति चिन्तनं प्रथमो भेदः । तथा द्यूते शीर्षादिवेदनाघाताद् विप्रयोगप्रणिधानम्, कथं पुनर्ममानया आयत्यां सम्प्रयोगो न स्यादित्यनागताध्यवसायात् प्रतीकाराकुलत्वं च द्वितीयः । तथा इष्टानां शब्दादिविषयाणां सम्प्रयोगे तदविप्रयोगचिन्तनम्, कथं ममैभिर्मनोज्ञविषयादिभिरायत्यां सम्बन्धः स्यादिति योगाभिलाषश्च तृतीयः । तथा देवेन्द्रचक्रवर्त्यादीनां स्वरूपादिगुणावभूतिप्रार्थनात्मकम्, अहमनेन तपस्त्यागादिना देवेन्द्रश्चक्रवर्ती वा स्यामित्यधमं निदानचिन्तनं चतुर्थः । x x x ।।४८४।।

**—हितोपदेशवृतौ ।।**

E **रागद्वेषपरिगतो मिथ्यात्वोपहतकलुषया दृष्ट्या ।**
**पञ्चाश्रवमलबहुलार्त्तरौद्रतीव्राभिसन्धानः ।।२०।।**

वृ० x x x आर्त्तं चतुर्धा । अमनोज्ञविषयसंप्रयोगे सति तद्वियोगैकतानः, तथा सद्वेदनायाः, तथा मनोज्ञविषयसंप्रयोगे तदविप्रयोगैकतानश्चित्तनिरोधस्तृतीयमार्तम्, चक्रवर्त्यादीनामृद्धिदर्शनान्ममाप्यमुष्य तपसः फलमेवंविधमेव स्यादन्यजन्मनीति चित्तनिरोधश्चतुर्थमार्तं निदानकरणमात्रमिति । ऋतमिति दुःखं संक्लेशस्तत्र भवमार्तमिति x x x ।।२०।। **—प्रशमरतिवृत्तौ ।।**

F **शब्दादीनामनिष्टानाम्, वियोगासम्प्रयोगयोः ।**
**चिन्तनं वेदनायाश्च, व्याकुलत्वमुपेयुषः ।।४।।**
**इष्टानां प्रणिधानं च, सम्प्रयोगावियोगयोः ।**
**निदानचिन्तनं पाप-मार्त्तमित्थं चतुर्विधम् ।।५।।** **—अध्यात्मसारे, अ. १६ ।।**

G **प्रिययोगा-ऽप्रियायोग-पीडा-लक्ष्मीविचिन्तनम् ।**
**आर्त्तं चतुर्विधं ज्ञेयं तिर्यग्गतिनिबन्धनम् ।।११।।** **—अमि. श्रावकाचारे, परि. १५ ।।**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

आह–साधोरपि शूलवेदनाभिभूतस्यासमाधानात् तत्प्रतिकारकरणे च तद्विप्रयोगप्रणिधानापत्तेस्तथा तपःसंयमासेवने च नियमतः सांसारिकदुःखवियोगप्रणिधानादार्तध्यानप्राप्तिरिति ? अत्रोच्यते - रागादिवशवर्तिनो[१] भवत्येव, न पुनरन्यस्येति, आह च ग्रन्थकारः–

**मज्झत्थस्स उ मुणिणो सकम्मपरिणामजणियमेयंति ।**
**वत्थुस्सहा[a]वचिंतणपरस्स [b]सम्मं सहंतस्स ।।११।।**

**मज्झत्थस्स० गाहा** ।। मध्ये तिष्ठतीति मध्यस्थः, राग-द्वेषयोरिति गम्यते, तस्य **मध्यस्थस्य, तु**शब्द एवकारार्थः, स चावधारणे, मध्यस्थस्यैव नेतरस्य, मन्यते [c]जगतस्त्रिकालावस्थामिति मुनिस्तस्य **मुनेः** साधोरित्यर्थः, **स्वकर्मपरिणामजनितमेतत्** [d]शूलादि, यच्च प्राक्कर्मविपरिणामिदैवादशुभमापतति न तत्र परितापाय भवन्ति सन्तः।

उक्तं च परम[e]गुरुभिः–

"[f]पुव्विं च खलु भो ! कडाणं कम्माणं दुच्चिण्णाणं दुप्पडिक्कंताणं [g]वेयइत्ता मोक्खो, नत्थि अवेदइत्ता, तवसा वा झोसइत्ते"त्यादि [दशवैकालिक, प्रथमचूलिकायाम्] [h]इत्येवं **वस्तुस्वभावचिन्तनपरस्य सम्यक्** [i]शोभनेनाध्यवसानेन **सहमानस्य** सतः कुतोऽसमाधानम् ? अपि तु धर्म्यमनिदानमिति वक्ष्यतीति गाथार्थः ।।११।।

परिहृत आशङ्कागतः [a]प्रथमपक्षः, द्वितीय-तृतीयावधिकृत्याह–

---

[१] **अव०** एवं चाहारसंज्ञैव प्रकर्षप्राप्ता तृष्णेति व्यवस्थितम् । अथास्या एवार्त्तध्यानहेतुत्वमुद्घोषयति-

**आहारचिंतणुब्भवमेयं आहारसण्णमासज्ज । वड्ढइ अट्टज्झाणं इट्ठालाभेण मूढाणं ।। ८५ ।।**

**वृ०** निरन्तराहारचिन्तनसूतया खल्वाहारसंज्ञचेष्टाभिलाषरूपमार्त्तध्यानं वर्द्धते, तदप्राप्तौ च दुःखवेगमसहमानानामरतिमहोदयपारवश्याद्वेदनावियोगप्रणिधानरूपं तत्प्रवर्धत इति । इदं च रागादिवशवर्त्तिन एव, न तु मध्यस्थस्य, यदागमः- [ध्यानशतके]

"मज्झत्थस्स उ मुणिणो कम्मपरिणामजणियमेयंति । वत्थुस्सहावचिंतणपरस्स सम्मं सहंतस्स ।। ११ ।।
कुणओ व पसत्थालंबणस्स पडिआरमप्पसावज्जं । तवसंजमपडियारं च सेवओ धम्ममणियाणं ।। १२ ।।"

एवमपि ज्ञायते प्रशस्तचेतोवृत्त्या भोजनादौ प्रवर्तमानानामप्यार्त्तध्यानाभावान्नाहारसंज्ञेति सत्ता तु तस्या आर्त्तध्यानस्येव रागादिपारवश्यदशायां यतीनामुपयुज्यत इति ।। ८५ ।।

**–अध्यात्ममतपरीक्षावृत्तौ ।।**

Jain Education International 2010_02    For Private & Personal Use Only    www.jainelibrary.org

**कुणओ व पसत्थालंबणस्स पडियारमप्पसावज्जं ।**
**तव-संजमपडियारं च सेवओ धम्ममणियाणं ।।१२।।**

**कुणउ व० गाहा ।। कुर्वतो वा**, कस्य ? **प्रशस्तं** ज्ञानाद्युपकारकम्, आलम्ब्यत इत्या**लम्बनं** प्रवृत्तिनिमित्तं शुभमध्यवसानमित्यर्थः । उक्तं च –

"काहं [b]अछित्तिं अदुवा अहीहं, तवोवहाणेसु व उज्जमिस्सं ।
गणं च णीती अणुसारवेस्सं, सालंबसेवी समुवेइ मोक्खं ।।१।।[व्य. भा. १/८३]"

इत्यादि, यस्यासौ प्रशस्तालम्बनस्तस्य । किं कुर्वतः? इत्यत आह – **प्रतीकारं** चिकित्सालक्षणम् । किंविशिष्टम् ? **अल्पसावद्यम्** अवद्यं-पापम् [c]सहावद्येन सावद्यम्, अल्पशब्दोऽभाव[d]वचनः स्तोकवचनो वा, अल्पं सावद्यं यस्मिन्नसावल्पसावद्यस्तम्, धर्म्यमनिदानमेवेति योगः ।

कुतः ? निर्दोषत्वात्, निर्दोषत्वं च वचनप्रामाण्यात् । उक्तं च - "गीयत्थो जयणाए कडजोगी कारणंमि निद्दोसो त्ति", [बृहत्कल्पभाष्ये, ४९४६] इत्याद्यागमस्योत्सर्गापवादरूपत्वात्, अन्यथा परलोकस्य साधयितुमशक्यत्वात्, साधु चैतदिति ।

तथा **तपःसंयम[e]प्रतीकारं च सेवमानस्य** इति तपःसंयमावेव प्रतीकारस्तपःसंयमप्रतीकारः, सांसारिकदुःखानामिति गम्यते, तं च सेवमानस्य, **च**शब्दात्पूर्वोक्तप्रतिकारं च । किम् ? **धर्म्यं** धर्मध्यानमेव भवति । कथं सेवमानस्य ? **अनिदानम्** इति क्रियाविशेषणम्, देवेन्द्रादिनिदानरहितमित्यर्थः।

आह-**कृत्स्नकर्मक्षयान्मोक्षो** भवत्वितीदमपि निदानमेव ? उच्यते-सत्यमे[f]तदपि हि निश्चयतः प्रतिषिद्धमेव । कथम् ?

मोक्षे भवे च सर्वत्र, निःस्पृहो मुनिसत्तमः । प्रकृत्याऽभ्यासयोगेन, यत उक्तो जिनागमे ।।१।।

इति । तथापि तु भावनायामपरिणतं सत्त्वमङ्गीकृत्य व्यवहारत इदमदुष्टमेव, अनेनैव प्रकारेण तस्य चित्तशुद्धेः क्रियाप्रवृत्तियोगाच्चेत्यत्र बहुवक्तव्यं तत्तु नोच्यते, ग्रन्थविस्तारभयादिति गाथार्थः ।।१२।।

अन्ये पुनरिदं गाथाद्वयं चतुर्भेदमप्यार्तध्यानमधिकृत्य साधोः प्रतिषेधरूपतया व्याचक्षते, न च तदत्यन्तसुन्दरम्, प्रथम-तृतीयपक्षद्वये सम्यगाशङ्काया [a]एवानुपपत्तेरिति । आह-उक्तं

भवताऽऽर्तध्यानं संसारवर्द्धनमिति, तत्कथम् ? उच्यते-बीजत्वात् । बीजत्वमेव दर्शयन्नाह-

**रागो दोसो मोहो य जेण संसारहेयवो भणिया ।**
**अट्टंमि य ते तिण्णि वि तो तं संसारतरुबीयं ।।१३।।**

**रागो० गाहा ।। रागो द्वेषो मोहश्च येन** कारणेन **संसारहेतवः** संसारकारणानि **भणिता** उक्ताः परममुनिभिरिति गम्यते, **आर्ते च** आर्तध्याने च **ते त्रयोऽपि** रागादयः सम्भवन्ति, यत एवं **ततस्तत् संसारतरुबीजं** भववृक्षकारणमित्यर्थः ।

आह - यद्येवमोघत एव संसारतरुबीजम्, ततश्च तिर्यग्गतिमूलमिति किमर्थमभिधीयते ? उच्यते - तिर्यग्गतिगमननिबन्धनत्वेनैव संसारतरुबीजमिति । अन्ये तु व्याचक्षते - तिर्यग्गतावेव प्रभूतसत्त्वसम्भवात् *स्थितिबहुत्वाच्च संसारोपचार इति गाथार्थः ।।१३।।

इदानीमार्त्तध्यायिनो **लेश्याः** प्रतिपाद्यन्ते –

**[१]कावोय-नील-कालालेस्साओ णाइसंकिलिट्ठाओ ।**
**अट्टज्झाणोवगयस्स कम्मपरिणामजणिआओ ।।१४।।**

**कावोय० गाहा ।। कापोत-नील-कृष्णलेश्याः**, किम्भूताः ? **नातिसङ्क्लिष्टा** रौद्रध्यानलेश्यापेक्षया नातीवाशुभानुभावा भवन्तीति क्रिया, कस्येत्यत आह-**आर्तध्यानोपगतस्य,** जन्तोरिति गम्यते, किंनिबन्धना एताः ? इत्यत आह-**कर्मपरिणामजनिताः**, तत्र–

"कृष्णादिद्रव्यसाचिव्यात्, परिणामो य आत्मनः ।
स्फटिकस्येव तत्रायं, लेश्याशब्दः प्रयुज्यते ।।१।।"

[a]एताश्च कर्मोदयायत्ता इति गाथार्थः ।।१४।।

आह कथं पुनरोघत एवाऽऽर्त्तध्यायी[a] ज्ञायत इति ? उच्यते - लिङ्गेभ्यः, तान्येवोपदर्शयन्नाह–

---

* **स्थितिबहुत्वादिति** निगोदादीनामिति दृश्यम् । **–ध्यानशतकवृत्तिविषमपदपर्याये ।।**

[१] **लेश्यात्रयं च कृष्णादि, नातिसंक्लिष्टकं भवेत् । आर्त्तध्यानगतस्याथ, लिङ्गान्येतानि चिन्तयेत् ।। ७९ ।।**
**–ध्यानदीपिकायाम् ।।**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**[१]तस्सऽक्कंदण-सोयण-परिदेवण-ताडणाइं लिंगाइं ।**
**इट्ठाऽणिट्ठविओगाऽविओग-वियणानिमित्ताइं ।।१५।।**

**निंदइ य नियकयाइं पसंसइ सविम्हओ विभूईओ ।**
**पत्थेइ तासु रज्जइ तयज्जणपरायणो होइ ।।१६।।**

**सद्दाइविसयगिद्धो सद्धम्मपरम्मुहो पमायपरो ।**
**जिणमयमणवेक्खंतो वट्टइ अट्टंमि झाणंमि ।।१७।।**

**तस्स० गाहा ।। तस्य** आर्तध्यायिन आक्रन्दनादीनि लिङ्गानि, तत्राऽऽ**क्रन्दनं** महता शब्देन विरवणम्, **शोचनं** त्वश्रुपरिपूर्णनयनस्य दैन्यम्, **परिदेवनं** पुनः पुनः क्लिष्टभाषणम्, **ताडनम्** उरःशिरःकुट्टन-केशलुञ्चनादि, एतानि **लिङ्गानि** चिह्नानि ।

अमूनि च **इष्टानिष्टवियोगावियोगवेदनानिमित्तानि,** तत्रेष्टवियोगनिमित्तानि तथाऽनिष्टावियोगनिमित्तानि तथा वेदनानिमित्तानि चेति गाथार्थः ।।१५।। किञ्चान्यत्–

**निंदइ० गाहा ।। निन्दति च** कुत्सति च **निजकृतानि** आत्मकृतानि अल्पफल-विफलानि कर्म-शिल्प-कला-वाणिज्यादीन्येतद् गम्यते, तथा **प्रशंसति** स्तौति-बहुमन्यते **सविस्मयः** साश्चर्यो **विभूतीः** परसम्पद इत्यर्थः, तथा **प्रार्थयते** अभिलषति परविभूतीरिति,

---

[१] A **अट्टस्स णं झाणस्स चत्तारि लक्खणा पं० तं०- कंदणता-सोतणता-तिप्पणता-परिदेवणता ।**
**–स्था. सू. २४७, भग. सू. ८०३, औप. सू. २० ।।**

वृ० xxx **आर्त्तध्यानलक्षणान्याह**-लक्ष्यते-निर्णीयते परोक्षमपि चित्तवृत्तिरूपत्वादार्त्तध्यानमेभिरिति लक्षणानि, तत्र **क्रन्दनता** महता शब्देन विरवणं **शोचनता** दीनता **तेपनता** तिपेः क्षरणार्थत्वादश्रुविमोचनं **परिदेवनता** पुनः पुनः क्लिष्टभाषणमिति, एतानि चेष्टवियोगानिष्टसंयोगरोगवेदनाजनितशोकरूपस्यैवार्त्तस्य लक्षणानि, यत आह –**[ध्यानशतके]**

"तस्सक्कंदणसोयणपरिदेवणताडणाइं लिंगाइं । इट्ठाणिट्ठवियोगावियोगवियणानिमित्ताइं ।। १५ ।।" इति निदानस्यान्येषां च लक्षणान्तरमस्ति, आह च–

"निंदइ नियकयाइं पसंसइ सविम्हओ विभूईओ । पत्थेइ तासु रज्जइ तयज्जणपरायणो होइ ।।" १६ ।। xxx।।

**- स्थानाङ्गसूत्रवृत्तौ ।।**

**तासु रज्यते** तास्विति प्राप्तासु विभूतिषु रागं [b]करोति, तथा **तदर्जनपरायणो भवति** तासां विभूतीनामर्जने-उपादाने परायणः-उद्युक्तस्तदर्जनपरायण इति, ततश्चैवम्भूतो भवति, असावप्यार्तध्यायीति गाथार्थः ।।१६।। किञ्च –

**सद्दाइ० गाहा ।। शब्दादयश्च** ते [c]**विषयाश्च** शब्दादिविषयास्तेषु **गृद्धो** मूर्च्छितः कांक्षावानित्यर्थः, तथा **सद्धर्मपराङ्मुखः प्रमादपरः,** तत्र दुर्गतौ प्रपतन्तमात्मानं धारयतीति धर्मः, सँश्चासौ धर्मश्च सद्धर्मः- क्षान्त्यादिकश्चरणधर्मो गृह्यते, [d]तत्पराङ्मुखः, **प्रमादपरो** मद्यादिप्रमादासक्तो, **जिनमतमनपेक्षमाणो वर्त्तते आर्तध्याने** इति तत्र जिनाः-तीर्थंकराः, तेषां मतम् आगमरूपं प्रवचनमित्यर्थः, तदनपेक्षमाणस्तन्निरपेक्ष इत्यर्थः । किम् ? वर्तते आर्त्तध्याने इति गाथार्थः ।।१७।।

---

B **अट्टस्स लक्खणाणि**-कंदणता, सोयणता, तिप्पणता, परिदेवणता। तत्थ कंदणता- हा मात! हा पितेत्यादि, सोयणता- करतलपल्हत्थमुहो दीणदिट्ठी झायति, तिप्पणता-तिहिं जोगेहिं तप्पति, परिदेवणता- एरिसा मम माता वा २ लोगस्स साहति, अहवा वेमाए वायं जोएति वा, अहवा परि २ तप्पति, सरित्ता मातुगुणे सयणवत्थाणि वा घरं वा दमं २ तप्पति-
इंदियगारवसंण्णा उस्सेय रती भयं च सोगं च । एते तु समाहारा भवंति अट्टस्स झाणस्स ।। १ ।।
**—आवश्यकचूर्णौ ।।**

C मू० निदानं च ।। ९-३४ ।।
**वृ०** x x x तस्यैतस्यार्तध्यानस्य चतुःप्रकारस्यापि शोकादीनि लक्षणानि भवन्ति । यैरार्तध्यायी लक्ष्यते करतलपर्याप्तप्रम्लानवदनः शोचति क्रन्दति विलपति हा हा अहो धिक् कष्टं हुं मानस्योरस्ताडं परिदेवते दीर्घं निश्वसिति कवोष्णं शून्यव्याक्षिप्तचित्त इवोपलक्ष्यते । तथा कलहमायामात्सर्यासूयास्तथा अरतिः स्त्रीभोजनकथा-सुहृत्स्वजनानुरागाश्च तस्य लक्षणानि भवन्ति परिस्फुटानीति ।। ३४ ।। -
**-तत्त्वार्थ. सिद्ध. वृत्तौ ।।**

D **मूर्च्छा-कौशील्य-कैनाश्य-कौसीद्या-न्यतिगृध्नुता । भयोद्वेगानुशोकाश्च, लिङ्गान्यार्त्ते स्मृतानि वै ।। ४० ।।**
**—आदिपुराणे, पर्व-२१ ।।**

E **क्रन्दनं रुदनं प्रोच्चैः, शोचनं परिदेवनम् । ताडनं लुञ्चनं चेति, लिङ्गान्यस्य विदुर्बुधाः ।। ७ ।।**
**मोघं निन्दन् निजं कृत्यम्, प्रशंसन् परसम्पदः । विस्मितः प्रार्थयन्नेताः, प्रसक्तश्चैतदर्जने ।। ८ ।।**
**प्रमत्तश्चेन्द्रयार्थेषु, गृद्धो धर्मपराङ्मुखः । जिनोक्तमपुरस्कुर्व-न्नार्तध्याने प्रवर्त्तते ।। ९ ।।**
**—अध्यात्मसारे, अ. १६ ।।**

F **शोकाक्रन्दौ मूर्च्छा, मस्तकहृदयादिताडनं चिन्ता ।**
**आर्त्तगतस्य नरस्य हि, लिङ्गान्येतानि बाह्यानि ।। ८० ।। —ध्यानदीपिकायाम् ।।**

साम्प्रतमिदमार्तध्यानं सम्भवमधिकृत्य यदनुगतं यदनर्हं वर्तते तदेतदभिधित्सुराह –

**[१] तदविरय-देसविरया[a]-पमायपरसंजयाणुगं[b] झाणं ।**
**सव्वप्पमायमूलं वज्जेयव्वं जइजणेणं ।।१८।।**

**तद० गाहा ।। तद्** आर्तध्यानमिति योगः, **अविरत-देशविरत-प्रमादपर-संयतानुगम्**[c] इति **तत्राविरता** मिथ्यादृष्टयः सम्यग्दृष्टयश्च, **देशविरता** एक-

---

[१] A **अव०** इत्थमार्तध्यानं सभेदकमभिधायाऽधुनास्यैव ध्यातारः स्वामिनो निरूप्यन्ते इति तदर्थमाह–

**मू०** **तदविरतदेशविरतप्रमत्तसंयतानाम् ।। ९-३५ ।।**

**भा०** **तदेतदार्तध्यानमविरतदेशविरतप्रमत्तसंयतानामेव भवतीति ।। ३५ ।।**

**वृ०** **तदित्यार्तमभिसम्बध्यते** । तदार्तध्यानमविरतसम्यग्दृष्ट्यादीनां त्रयाणां स्वामिनां सम्भवति । एतस्य त्रयः स्वामिनश्चतुर्थ-पञ्चम-षष्ठगुणस्थानवर्तिनः **क्रमेणाविरत-देशविरत-प्रमत्तसंयताः** । अविरतश्चासौ सम्यग्दृष्टिश्चेति अविरतसम्यग्दृष्टिः प्रत्याख्यानावरणोदये सति विरतिलक्षणस्य संयमस्याभावादविरतसम्यग्दृष्टिः । आह च–

"आवृण्वन्ति प्रत्याख्यानं स्वल्पमपि येन जीवस्य । तेनाप्रत्याख्याना-वरणास्ते नञ् हिंसोऽल्पार्थः ।। १ ।।
प्रत्याख्यानावरणसदृक्त्वाद् वा तत् तथा भवति सिद्धम् । न त्वब्राह्मणवचने, तत्सदृशः पुरुष एवेष्टः ।। २ ।।"

औपशमिक-क्षायोपशमिक-क्षायिकभेदाच्च त्रिविधं सम्यग्दर्शनम्, तद्योगात् सम्यदृष्टिः देशविरतः संयतासंयतः हिंसादिभ्यो देशतो विरतत्वात् संयतः, अन्यतः सावद्ययोगादनिवृत्त इति स एवासंयतः, सोऽविरतसम्यग्दृष्टिस्थानादसंख्येयानि विशोधिस्थानानि गत्वा अप्रत्याख्यानावरणकषायेषु क्षयोपशमं नीतेषु प्रत्याख्यानावरणकषायोदयात् कृत्स्नप्रत्याख्यानाभावाद् देशविरतः । आह च-

"तस्मादविरतसम्यग्-दृष्टिस्थानाद् विशोधिमुपगम्य । स्थानान्तराण्यनेका-न्यारोहति पूर्वविधिनैव ।। १ ।।
क्षपयत्युपशमयति वा, प्रत्याख्यानावृतः कषायांस्तान् । सततोदयेन भवेत् त-स्य विरमणे बुद्धिरल्पेऽल्पा ।। २ ।।
तस्य तथैव विशोधि-स्थानान्यारोहतोऽतिसङ्ख्यानि । गच्छन्ति सर्वथाऽपि, प्रकर्षतस्ते क्षयोपशमम् ।। ३ ।।
श्रावकधर्मो द्वादश-भेदः सञ्जायते ततस्तस्य । पञ्चत्रिचतुःसङ्ख्य-व्रतगुणशिक्षामयः शुद्धः ।। ४ ।।
सर्वं प्रत्याख्यानम्, येनावृण्वन्ति तदभिलषतोऽपि । तेन प्रत्याख्याना-वरणास्ते निर्विशेषोक्ताः ।। ५ ।।"

इदानीं प्रमत्तसंयतः । तस्मादसङ्ख्येयानि विशोधिस्थानान्यारोहतस्तृतीयकषायेषु प्रकर्षात् क्षयोपशमं गतेषु सर्वसावद्ययोगप्रत्याख्यानविरतिर्भवति । उक्तं च-

"देशविरतोऽपि ततः, स्थानात् स विशोधिमुत्तमां प्राप्य । स्थानान्तराणि पूर्व-विधिनैव संयात्यनेकानि ।। १ ।।
क्षपयत्युपशमयति वा, प्रत्याख्यानावृतः कषायांस्तान् ।
सततोदयेन भवेत्, तस्य विरमणे सर्वतोऽपि मतिः ।। २ ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

d
द्व्याद्यणुव्रतधरादिभेदाः **श्रावकाः, प्रमादपराः** प्रमादनिष्ठाश्च ते **संयताश्च** प्रमादपरसंयतास्ताननुगच्छतीति विग्रहः, नैवाप्रमत्तसंयतानिति भावः।

इदं च स्वरूपतः **सर्वप्रमादमूलं** वर्तते, यतश्चैवमतो **वर्जयितव्यम्** परित्यजनीयम्, केन ? **यतिजनेन** साधुलोकेन, उपलक्षणत्वात् श्रावकजनेन च[e] परित्यागार्हत्वादेवास्येति गाथार्थः ।।१८।।

---

छेदोपस्थाप्यं चा-वृत्तं सामायिकं चरित्रं वा । स ततो लभते प्रत्या-ख्यानावरणक्षयोपशमात् ।। ३ ।।" तस्येदानीं महाव्रतगुप्तिसमितियुक्तस्य कषायनिग्रहाद् इन्द्रियदमाच्च निरुद्धाश्रवस्य निर्वेदादिवैराग्यभावनाभिः स्थिरीकृतसंवेगस्य यथोक्तद्वादशप्रकारतपोयोगात् सञ्चितानि कर्माणि निर्जरयतः सूत्रानुसाराद् यतमानस्यापि मोहनीयकर्मानुभावात् सङ्क्लेशाद् वा विशोध्या वाऽन्तमुहूर्तात् परावर्तते । ततः सञ्ज्वलनकषायोदयाद्, इन्द्रियविकथाप्रमादाद्, योगदुष्प्रणिधानाद्, कुशलेष्वनादराच्च प्रमत्तसंयतो भवति, तस्माद् सङ्क्लेशाद्धायां वर्तमानः प्रमत्तसंयतः । एते त्रयोऽप्यार्तध्यायिनो भवन्ति, आर्तध्यानस्वामिन इत्यर्थः । एतदार्तध्यानमविरतादीनामेव भवति, नाप्रमत्तसंयतादीनामित्यर्थः । तदेतदार्तं नातिसंक्लिष्टकापोत-नील-कृष्णलेश्यानुयायि द्रष्टव्यमिति ।। ३५ ।।

**—तत्त्वार्थ. सिद्ध. वृत्तौ ।।**

B **तदविरतदेशविरतप्रमत्तसंयतानाम् ।। ९/३४ ।।**

वृ० x x x तत्राविरतदेशविरतानां चतुर्विधमप्यार्तं भवति, असंयमपरिणामोपेतत्वात् । प्रमत्तसंयतानां तु निदानवर्ज्यमन्यदार्तत्रयं प्रमादोद्रेकात्कदाचित्स्यात् । **—तत्वार्थ. सर्वार्थ. वृत्तौ** ।।

C वृ० x x x कदाचित् प्राच्यमार्त्तध्यानत्रयं प्रमत्तानाम्, निदानं वर्जयित्वा अन्यदार्त्तत्रयं प्रमादोदयोद्रेकात् कदाचित्प्रमत्तसंयतानां भवति।

**—तत्वार्थवार्त्तिके, ९/३४ ।।**

D **छ कप्पस्स पलिमंथू पं. तं. कोकुतिते संजमस्स पलिमंथू १, x x x भिज्झाणिताणकरणे मोक्खमग्गस्स पलिमंथू ६, सव्वत्थ भगवता अणिताणता पसत्था । (सू. ५२९)**

वृ० कल्पाधिकारे सूत्रद्वयम्- **छ कप्पेत्यादि, षट् कल्पस्य** कल्पोक्तसाध्वाचारस्य परिमन्थन्तीति **परिमन्थवः,** उणादित्वात्, पाठान्तरेण परिमन्था वाच्या घातका इत्यर्थः x x x **भिज्झत्ति** लोभस्तेन **यन्निदानकरणं** चक्रवर्त्तीन्द्रादिऋद्धिप्रार्थनं तन्**मोक्षमार्गस्य** सम्यग्दर्शनादिरूपस्य **परिमन्थु** आर्तध्यानरूपत्वात्, भिध्याग्रहणाद् यत्पुनरलोभस्य भवनिर्वेदमार्गानुसारितादिप्रार्थनं तन्न मोक्षमार्गस्य परिमन्थुरिति दर्शितमिति । ननु तीर्थकरत्वादिप्रार्थनं न राज्यादि प्रार्थनवद्दुष्टमतस्तद्विषयं निदानं मोक्षस्यापरिमन्थुरिति, नैवम्, यत आह-**सव्वत्थेत्यादि सर्वत्र** तीर्थकरत्वचरमदेहत्वादिविषयेऽपि आस्तां राज्यादौ **भगवता** जिनेन **अनिदानता** अप्रार्थनमेव **पसत्थत्ति प्रशंसिता** श्लाघितेति, तथा च- "इहलोगनिमित्तं अवि तित्थगरत्तचरमदेहत्तं । सव्वत्थेसु भगवया अणियाणत्तं पसत्थं तु ।।" एवमेव हि सामायिकशुद्धिः स्यादिति, उक्तं च-

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

"पडिसिद्धेसु अ दोसे विहिएसु य ईसि रागभावे वि । सामाइयं असुद्धं सुद्धं समवाए दोण्हं पि ।।" त्ति ।

अयं चान्तिमपरिमन्थयोर्विशेषः-

"आहारोवहिदेहेसु, इच्छालोभो उ सज्जई । नियाणकारी संगं तु, कुरूते उद्धदेहिकम् ।।"

**—स्थानाङ्गसूत्रवृत्तौ** ।।

E **एवं खलु समणाउसो निग्गंथे निदाणं किच्चा तस्स ट्ठाणस्स अणालोइयऽपडिक्कंते कालमासे कालं किच्चा अण्णतरेसु देवलोगेसु देवताए उववत्तारो भवंति** x x x **तं एवं खलु समणाउसो तस्स णिदाणस्स इमेतारूवे फलविवागे जं णो संचाएति केवलिपन्नत्तं धम्मं पडिसुणित्तए ।।१।।**

**—दशाश्रुतस्कन्धे,** अ. १० ।।

F अन्ये पुनरिदं गाथाद्वयं चतुर्भेदमप्यार्तध्यानमधिकृत्य साधोः प्रतिषेधरूपतया व्याचक्षते, न च तदत्यन्तसुन्दरम्, प्रथमतृतीयपक्षद्वये सम्यगाशङ्काया एवानुपपत्तेरिति । x x x **—ध्यानशतक, गा. १३ वृत्तौ** ।।

G **अव०** अथ देशविरतौ ध्यानसम्भवमाह-

**आर्त्तं रोद्रं भवेदत्र, मन्दं धर्म्यं तु मध्यमम् । षट्कर्मप्रतिमाश्राद्ध-व्रतपालनसम्भवम् ।। २५ ।।**

**वृ०** **अत्र** देशविरतिगुणस्थानके अनिष्टयोगार्त्तम्, इष्टवियोगार्त्तम्, रोगार्त्तम्, निदानार्त्तमिति चतुष्पाद**मार्त्तध्यानम्, रौद्रध्यानं** च हिंसानन्दरौद्रम्, मृषावादानन्दरौद्रम्, चौर्यानन्दरौद्रम्, संरक्षणानन्दरौद्रं चेति चतुष्पादं रौद्रध्यानं च **मन्दं भवति,** कोऽर्थः? यथा यथा देशविरतिरधिकाऽधिकतरा च भवति, तथा तथाऽऽर्त्तरौद्रध्याने मन्दे मन्दतरे च स्याताम् x x x ।। **—गुणस्थानकक्रमारोहे** ।।

H **अव०** अथ प्रमत्तसंयतगुणस्थाने ध्यानसम्भवमाह-

**अस्तित्वान्नोकषायाणामत्रार्त्तस्यैव मुख्यता । आज्ञाद्यालम्बनोपेतधर्मध्यानस्य गौणता ।। २८ ।।**

**वृ०** **अत्र** प्रमत्तगुणस्थानके **मुख्यता** मुख्यत्वम् **आर्त्तस्य** ध्यानस्यैवोपलक्षणत्वाद्रौद्रस्यापि कस्मात्? **नोकषायाणां** हास्यषट्कादीनाम् **अस्तित्वाद्** विद्यमानत्वात्, x x x ।।

**—गुणस्थानकक्रमारोहे** ।।

I **प्रमत्तान्तगुणस्थाना-नुगतं तन्महात्मना । सर्वप्रमादमूलत्वा-त्त्याज्यं तिर्यग्गतिप्रदम् ।। १० ।।**

**—अध्यात्मसारे,** अ. १६ ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**तात्पर्यार्थः**

**आर्तध्यानस्वामिविचारणा**

दर्शितं चतुर्भेदमप्यार्त्तध्यानं षष्ठगुणस्थानकपर्यन्तं विशिष्टविवक्षारहितं **तत्वार्थसिद्धसेनीयवृत्ति-हारिभद्रियवृत्ति-अध्यात्मसारादिषु** ।

वर्णितं तद् पञ्चमगुणस्थानके मन्द-मन्दतरतया बृहत्कल्पसूत्रवर्णितध्यानभेदाश्रिततया **गुणस्थानक-क्रमारोहे** । सञ्ज्वल्नकषायमति प्रमत्तगुणस्थानके तु नोकषायस्य सत्त्वेन मन्दतमस्यापि तस्यैव मुख्यता, न तु धर्मध्यानस्य ।

ज्ञापितमनिदानमार्त्तत्रयं प्रमतसंयतानां कदाचित् प्रमादोदयोद्रेकाद् दिगम्बराम्नायानुसारिणोः **तत्वार्थसर्वार्थसिद्धिवृत्ति-वार्तिकयोः** ।

**स्थानाङ्गाद्यागमग्रन्थेषु** तु लोभमूलकनिदानस्यार्त्तध्यानरूपत्वेन सम्यग्दर्शनादिमोक्षमार्गस्य घातकतया निरूपितम्, तत्र षष्ठगुणसम्भवि । किन्तु निर्लोभमूलकं भवनिर्वेदमार्गानुसारिविषयकम् निदानं न मोक्षमार्गस्य घातकम्, तद् षष्ठगुणस्थानकेऽपि भवति। अर्थात् प्रमत्तगुणस्थानके निश्चयेन निदाने सत्यपि व्यवहारनयेन न इति आपतितम् ।

**ध्यानशतक** गा-११ अवतरणिकानुसारेण रागादिवशवर्तिनः साधोराश्रित्य रोगचिन्ता-निदानरूपे आर्त्तध्याने दर्शिते । गा. १२ वृत्यनन्तरेण "अन्ये... एवानुपपत्तेरिति" कथितेन चतुष्प्रकारमप्यार्त्तध्यानं साधुसम्भवित्वेन कथितम् । विशेषस्तु सांसारिकदुःखप्रतिकाररूपेण तपःसंयमासेवनस्य निश्चयेन निदानत्वे सत्यपि भावनायां तथाप्रकारसत्त्वाभावत्वेन व्यवहारनयेन न निदानमिति प्रकटितम् ।

**तस्मात्** प्रमत्तगुणस्थानके यदि साधु रागादिवशवर्ती तर्हि भविष्यति चतुर्विधमपि आर्त्तध्यानम्, यदि स रागादिवशवर्ती न तर्हि आर्त्तध्यानमपि न । तत्र च निश्चयनयेन मोक्षेच्छारूपे निदाने भवत्यपि व्यवहारनयेन न, भावनायां तथाप्रकारसत्त्वाभावत्वात् ।

विशेषस्तु, रागादिवशवर्ती साधु यदा निदानं करिष्यति तदा तस्य षष्ठगुणस्थानपरिणामात् पतनं भविष्यति, स्थानाङ्गाद्यागमेषु लोभमूलकनिदानस्यार्त्तध्यानत्वेन सम्यग्दर्शनादिमोक्षमार्गस्य घातकतया निरूपितत्वात् ।

यत्तु तत्त्वार्थसर्वार्थसिद्धिवृत्ति-वार्तिकयोः प्रमत्तानां निदानरूपार्त्तस्याभावो दर्शितः स कथं घटते तद्विचारणीयः ।

—**सम्पा०** ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# [अथ रौद्रध्यानम्]

उक्त**मार्तध्यानम्**, साम्प्रतं **रौद्रध्यानावसरः**, तदपि चतुर्विधमेव, तद्यथा-हिंसानुबन्धि मृषानुबन्धि स्तेयानुबन्धि विषयसंरक्षणानुबन्धि च । उक्तं [a]च भगवतोमास्वातिवाचकेन- "हिंसा-ऽनृत-स्तेय-विषयसंरक्षणेभ्यो रौद्रम्" इत्यादि **[त. सू. ९-३६]**। तत्राऽऽद्य**भेद**-प्रतिपादनायाह-

**[१]सत्तवह-वेह-बंधण-[b]डहणंऽकण-मारणाइपणिहाणं ।**
**अइकोहग्गहघत्थं निग्घिणमणसोऽ[c]धमविवागं ।।१९।।**

**सत्त० गाहा ।। सत्त्वा** एकेन्द्रियादयस्तेषां **वध-वेध-बन्धन-दहना-ऽङ्कन-मारणादिप्रणिधानम्**, तत्र **वधः** ताडनं कर-कशलतादिभिः, **वेधस्तु** नासिकादिवेधनं [d]कीलकादिभिः, **बन्धनं** संयमनं रज्जु-निगडादिभिः, **दहनं** प्रतीतमुल्मुकादिभिः, **अङ्कनं** लाञ्छनं श्व-शृगालचरणादिभिः, **मारणं** प्राणवियोजनमसि-शक्ति-कुन्तादिभिः, **आदि**शब्दा-दागाढपरितापन-पाटनादिपरिग्रहः, [e]तेषु **प्रणिधानम्** अकुर्वतोऽपि करणं प्रति दृढाध्यवसानमित्यर्थः, प्रकरणाद् *रौद्रध्यानमिति गम्यते । किंविशिष्टं प्रणिधानम् ? **अतिक्रोधग्रहग्रस्तम्** अतीवोत्कटो यः क्रोधः- रोषः, स एवापायहेतुत्वाद् ग्रह इव ग्रहस्तेन ग्रस्तम्-अभिभूतम्, क्रोधग्रहणाच्च [f]मानादयोऽपि गृह्यन्ते ।

किंविशिष्टस्य सत इदमिति ? अत आह - **निर्घृणमनसो** निर्घृणं-निर्गतदयं मनः-चित्तमन्तःकरणं यस्य स निर्घृणमनास्तस्य, तदेव विशिष्यते – **अधमविपाकम्** इति अधमः जघन्यो नरकादिप्राप्तिलक्षणो विपाकः-परिणामो यस्य तत्तथाविधमिति गाथार्थः ।।१९।।

---

* **रौद्रध्यानमिति** भवतीति योगः । —ध्यानशतकवृत्ति-विषमपदपर्याये ।।

[१] A **हते निष्पीडिते ध्वस्ते, जन्तुजाते कदर्थिते । स्वेन चान्येन यो हर्ष-स्तद्धिंसारौद्रमुच्यते ।। ४ ।।**
**अनारतं निष्करूणस्वभावः, स्वभावतः क्रोधकषायदीप्तः ।**
**मदोद्धतः पापमतिः कुशीलः, स्यान्नास्तिको यः स हि रौद्रधामा ।। ५ ।।**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

हिंसाकर्मणि कौशलं निपुणता पापोपदेशे भृशं, दाक्ष्यं नास्तिकशासने प्रतिदिनं प्राणातिपाते रतिः ।
संवासः सह निर्दयैर्विरतं नैसर्गिकी क्रूरता; यत्स्याद्देहभृतां तदत्र गदितं रौद्रं प्रशान्ताशयः ।। ६ ।।
केनोपायेन घातो भवति तनुमतां कः प्रवीणोऽत्र हन्ता,
हन्तुं कस्यानुरागः कतिभिरिह दिनैर्हन्यते जन्तुजातम् ।
हत्वा पूजां करिष्ये द्विजगुरुमरुतां कीर्तिशान्त्यर्थमित्थम्;
यत्स्याद्धिंसाभिनन्दो जगति तनुभृतां तद्धि रौद्रं प्रणीतम् ।। ७ ।।
गगनवनधरित्रीचारिणां देहभाजां, दलनदहनबन्धच्छेदघातेषु यत्नम् ।
दृति नख-कर-नेत्रोत्पाटने कौतुकं यत्; तदिह गदितमुच्चैश्चेतसां रौद्रमित्थम् ।। ८ ।।
अस्य घातो जयोऽन्यस्य, समरे जायतामिति । स्मरत्यङ्गी तदप्याहू, रौद्रमध्यात्मवेदिनः ।। ९ ।।
श्रुते दृष्टे स्मृते जन्तु-वधाद्युरूपराभवे । यो हर्षस्तद्धि विज्ञेयम्, रौद्रं दुःखानलेन्धनम् ।। १०।।
अहं कदा करिष्यामि, पूर्ववैरस्य निष्क्रयम् । अस्य चित्रैर्वधैश्चेति, चिन्ता रौद्राय कल्पिता ।। ११ ।।
किं कुर्मः शक्तिवैकल्या-ज्जीवन्त्यद्यापि विद्विषः । तर्ह्यमुत्र हनिष्यामः, प्राप्य कालं तथा बलम् ।। १२ ।।
अभिलषति नितान्तं यत्परस्यापकारं, व्यसनविशिखभिन्नं वीक्ष्य यत्तोषमेति ।
यदिह गुणगरिष्ठं द्वेष्टि दृष्ट्वान्यभूतिं, भवति हृदि सशल्यस्तद्धि रौद्रस्य लिङ्गम् ।। १३ ।।
हिंसानन्दोद्भवं रौद्रं वक्तुं कस्यास्ति कौशलम् । जगज्जन्तुसमुद्भूतविकल्पशतसम्भवम् ।। १४ ।।
—ज्ञानार्णवे, सर्ग - २६।।

B वधबन्धाभिसन्धान-भङ्गच्छेदोपतापने । दण्डपारुष्यमित्यादि,हिंसानन्दः स्मृतो बुधैः ।। ४५ ।।
हिंसानन्दं समाधाय, हिंस्रः प्राणिषु निर्घृणः ।
हिनस्त्यात्मानमेव प्राक्, पश्चाद् हन्यान्न वा परान् ।। ४६ ।।
सिक्यमत्स्यः किलैकोऽसौ, स्वयम्भूरमणाम्बुधौ ।
महामत्स्यसमान्दोषा-नवाप स्मृतिदोषतः ।। ४७ ।।
पुरा किलारविन्दाख्यः, प्रख्यातः खचराधिपः ।
रुधिरस्नानरौद्राभि-सन्धिः श्वाभ्रीं विवेश सः ।। ४८ ।। —आदिपुराणे, पर्व-२१ ।।

C निर्दयं वधबन्धादि-चिन्तनं निबिडक्रुधा । x x x ।।११।। —अध्यात्मसारे, अ. १६ ।।

D पीडिते च तथा ध्वस्ते जीवौघेऽथ कदर्थिते । स्वेन वान्येन यो हर्षस्तद् हिंसारौद्रमुच्यते ।। ८३ ।।
निरन्तरं निर्दयतास्वभावः, स्वभावतः सर्वकषायदीप्तः ।
मदोद्धत्तः पापमतिः कुशीलः, स्यान्नास्तिको यः स हि रौद्रगेहम् ।। ८४।।
जीवानां मारणोपायान्, चिन्तयेत् पूजनं तथा । गोत्रदेवीद्विजादीनां, मेषादिप्राणघातनैः ।। ८५ ।।
जलस्थलखगादीनां, गलनेत्रादिकर्त्तनम् ।
जीवानां प्राणघातादि, कुर्वन् रौद्रं गतो भवेत् ।। ८६ ।। —ध्यानदीपिकायाम् ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

a b
उक्तः **प्रथमभेदः**, साम्प्रतं **द्वितीयम**भिधातुकाम आह –

**पिसुणासब्भासब्भूय-भूयघायाइवयणपणिहाणं[१] ।**
**मायाविणोऽइसंधणपरस्स पच्छन्नपावस्स ।।२०।।**

**पिसुण० गाहा ।। पिशुना-ऽसभ्या-ऽसद्भूत-भूतघातादिवचनप्रणिधानम्**
c
इत्यत्रानिष्टस्य सूचकं **पिशुनं** 'पिशुनमनिष्टसूचकं विदुः' इति वचनात् । सभायां साधु सभ्यं न सभ्य**मसभ्यं** जकार-मकारादि।

न[२] सद्भूत**मसद्भूत**मनृतमित्यर्थः, तच्च व्यवहारनयदर्शनेनोपाधिभेदतस्त्रिधा, तद्यथा- अभूतोद्भावनं भूतनिह्नवोऽर्थान्तराभिधानं चेति । तत्राभूतोद्भावनं यथा

---

[१] A **असत्यकल्पनाजाल-कश्मलीकृतमानसः । चेष्टते यज्जनस्तद्धि, मृषारौद्रं, प्रकीर्तितम् ।। १६ ।।**
**विधाय वञ्चकं शास्त्रं मार्गमुद्दिश्य निर्दयम् । प्रपात्य व्यसने लोकं, भोक्ष्येऽहं वाञ्छितं सुखम् ।। १७ ।।**
**असत्यचातुर्यबलेन लोकाद्वित्तं ग्रहीष्यामि बहुप्रकारम् ।**
**तथाश्वमातङ्गपुराकराणि कन्यादिरत्नानि च बन्धुराणि ।। १८ ।।**
**असत्यवाग्वञ्चनया नितान्तं प्रवर्त्तयत्यत्र जनं वराकम् ।**
**सद्धर्ममार्गादतिवर्त्तनेन मदोद्धतो यः स हि रौद्रधामा ।। १९ ।।**
**असत्यसामर्थ्यवशादरातीन् नृपेण वान्येन च घातयामि ।**
**अदोषिणां दोषचयं विधाय चिन्तेति रौद्राय मता मुनीन्द्रैः ।। २० ।।**
**पातयामि जनं मूढं, व्यसनेऽनर्थसंकटे । वाक्कौशल्यप्रयोगेण, वाञ्छितार्थप्रसिद्धये ।। २१ ।।**
**इमान् जडान् बोधविचारविच्युतान् प्रतारयाम्यद्य वचोभिरून्नतैः ।**
**अमी प्रवर्त्स्यन्ति मदीयकौशलादकार्यवर्येष्विति नात्र संशयः ।। २२ ।।**
**अनेकासत्यसंकल्पै-र्यः प्रमोदः प्रजायते । मृषानन्दात्मकं रौद्रं तत्प्रणीतं पुरातनैः ।। २३ ।।**
**–ज्ञानार्णवे, सर्ग - २६ ।।**

B **x x x । पिशुनाऽसभ्यमिथ्यावाक्, प्रणिधानं च मायया ।। ११ ।। –अध्यात्मसारे, अ. १६ ।।**

C **विधाय वञ्चकं शास्त्रं मार्गमुद्दिश्य हिंसकम् । प्रपात्य व्यसने लोकं, भोक्ष्येऽहं वाञ्छितं सुखम् ।। ८७ ।।**
**असत्यकल्पनाकोटि-कश्मलीकृतमानसः । चेष्टते यज्जनस्तद्धि-मृषानन्दं हि रौद्रकम् ।। ८८ ।।**
**–ध्यानदीपिकायाम् ।।**

[२] **भा० अत्राह-अथानृतं किमिति ? अत्रोच्यते –**

**वृ०** अत्राहेत्यादिना सम्बन्धं व्याचिख्यासते-अथानृतं किमिति । अथेति हिंसानन्तरमनृतं निर्दिष्टं प्राक्, तत् किंलक्षणमित्यजानानः प्रश्नयति। आचार्यस्तु तल्लक्षणं वक्तुकाम आह-अत्रोच्यत इति। अत्र

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सर्वगतोऽयमात्मेत्यादि, भूतनिह्नवस्तु नास्त्येवात्मेत्यादि, गामश्वमित्यादि ब्रुवतोऽर्थान्तराभिधानमिति ।

भूतानां सत्वानामुपघातो यस्मिन् तद् **भूतोपघातम्** छिन्द्धि भिन्द्धि व्यापादय

---

प्रश्नेऽभिधीयत इति । एतदुक्तं भवति- अभिहितहिंसालक्षणानन्तरोद्दिष्टमनृतं किंलक्षणमित्यत्रोच्यते- नानाप्रकारं परपीडापादनसमर्थम्—

**मू०** - **असदभिधानमनृतम्** ।।७-९।।

**वृ०** x x x प्रमत्तयोगादित्यनुवर्तते अतो वाक्यार्थः- प्रमत्तयोगादसदभिधानमनृतमिति। प्रमत्तो यः कायवाङ्मनोयोगैर**सदभिधानं** प्रयुङ्क्ते यत् **तदनृतम्** । भावसाधनः करणसाधनो वाऽभिधानशब्दः। अव्ययम्। ऋतमिति सत्यार्थे । न ऋतमनृतम्। मिथ्याऽनृतमिति सूत्रविन्यासो युक्तो लघुत्वादिति चेत् तन्न । सत्याभासस्य परपीडाकारिणो वचसः पापादानहेतुकस्य प्रतिषेधाय कौशिकादिवाक्यस्येवासदभिधानग्रहणम्। एवंविधे च सूत्रविन्यासे पर्यायमात्रमित्युक्तं स्यात्, न तु लक्षणं मृषावादस्येत्यसद्ग्रहणे तु सर्वमुपपद्यते । अभिधानंवाग्योगविषयः भावसाधनपक्षे प्रमत्तस्याभिनिविष्टचेतस आत्मनः कर्तुर्विवक्षितार्थप्रतिपादने साधकतममिति। कायेन हस्त-लोचनौष्ठपादाद्यवयवक्रियाभिरलीकाभिः परं वञ्चयति, वाचाऽप्यसद् ब्रवीति, मनसाऽप्यालोच्यति- एवं परः प्रतारणीय इति । **सच्छब्दः प्रशंसार्थो** लोके प्रतीतः सत्पुरुषः सज्जन इत्यादिषु प्रयोगेषु । **न सद् असद्** अप्रशस्तमाप्तप्रणीतागमनिन्दितं निषिद्धं वा । तच्च त्रिविधमसदित्यादिना भाष्यकारो दर्शयति—

**भा० असदिति सद्भावप्रतिषेधोऽर्थान्तरं गर्हा च । तत्र सद्भावप्रतिषेधो नाम भूतनिह्नवः अभूतोद्भावनं च । तद्यथा- नास्त्यात्मा नास्ति परलोक इत्यादि भूतनिह्नवः।**

**वृ०** **असदित्यस्य** शब्दस्यायमर्थः- सतो भावः **सद्भावः**। सच्च उत्पादव्ययध्रौव्यमुक्तं **[**अ०५, सू०२९**]** तस्य भावस्तदेव न तथा भवतीत्यनेकेन पर्यायरूपेणास्य **प्रतिषेधो** निराकरणं यदेतदुत्पद्यतेऽवतिष्ठते व्येति च तदेकमेवंविधं नास्तीत्यपह्नुवते। तत्र सद्भावप्रतिषेधव्याचिख्यासयेदमाह-तत्र **सद्भावप्रतिषेधो नामेति। नाम**शब्दो वाक्यालङ्कारार्थः। सद्भावप्रतिषेधो द्विविधः- भूतनिह्नवः अभूतोद्भावनं च। **भूतस्य**-विद्यमानस्य **निह्नवः**- अपलापः। **तद्यथा-नास्त्यात्मा नास्ति परलोक इति** विद्यमानस्यात्मनः कर्तुः शुभाशुभानां कर्मणामनुभवस्मरणादिक्रियाधारस्य नास्तित्वं केचिन्मोहात् प्रतिजानते। आत्माभावे च परलोकिनोऽभावात् परलोकाभाव इति सुज्ञानम्। **आदि**ग्रहणाच्छुभाशुभकर्मतदुपभोगदानफलाभावपरिग्रहः। सद्भावप्रतिषेधभेद एवाभूतोद्भावनम्। **च**शब्दः समुच्चयार्थः। यथाऽवस्थितात्मसद्भावमसंख्येयप्रदेशपरिमाणमाश्रयवशात् सङ्कोचविकासधर्मकमरूपरसगन्धस्पर्शमनेकप्रकारक्रियमवधूयाज्ञानबलेनात्मानमभूतमेवात्मतत्त्वं समुद्भावयन्ति स्वरुच्या।

**भा० श्यामाकतन्दुलमात्रोऽयमात्मा, अङ्गुष्ठपर्वमात्रोऽयमात्मा, आदित्यवर्णः, निष्क्रिय इत्येवमाद्यभूतोद्भावनम्।।**

**वृ०** **श्यामाकतन्दुलमात्रोऽयमित्यादि** । **श्यामाकः**-कुधान्यविशेषः तस्य **तन्दुलस्**तत्प्रमाणः श्यामाकतन्दुलमात्रः।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

इत्यादि, **आदिशब्दः** [d]प्रतिभेदं स्वगतानेकभेदप्रदर्शनार्थः, यथा पिशुनमनेकधा-अनिष्टसूचकमित्यादि, तत्र पिशुनादि**वचनेष्व**[e]प्रवर्तमानस्यापि प्रवृत्तिं प्रति **प्रणिधानं** दृढाध्यवसानलक्षणम्, रौद्रध्यानमिति प्रकरणाद्गम्यते ।

---

**अयमि**त्यनुभवगम्यः स्वप्रत्यक्ष **आत्मा** निर्दिश्यते । तथा **अङ्गुष्ठपर्वमात्र** इति। अङ्गुष्ठः- पाणेरवयवस्तस्य रेखाकच्छिन्न उपरितनो भागः पर्व, तत् प्रमाणमस्येति अङ्गुष्ठपर्वमात्र आत्मा । इत्थं चाभ्युपगमे तस्यात्मनः शरीरैकदेशावस्थाने सति शेषदेशानां चेतनाऽभावप्रसङ्गः। ततश्च दंशमशकमक्षिकादितोदने शस्त्रच्छेदने च तेषु देशेषु न दुःखवेदना स्यात् । चन्दनादिविलेपने च न सुखानुभवः। स्वानुभवसिद्धाश्च सुखदुःखवेदना इत्यतः प्रमाणविरुद्ध एष पन्था प्रहातव्यः। **आदित्यवर्ण** इति भास्वररूपस्तस्य चारूपादित्वादमूर्तत्वात् कुतो भास्वरता?। कर्मात्मप्रदेशानामन्योऽन्यानुगतिलक्षणपरिणामाभ्युपगमे समस्ति रुपादिमत्ता चेत् तदसत्, ज्ञानावरणादिपुद्गलानामभासुरत्वात् । तस्मादयमपि हेयः पक्षः। **निष्क्रिय** इति । आत्मा सर्वगतस्तस्य च गमनागमनवीक्षणभोजनादिका क्रिया कायवाङ्मनःकरणजनिता, तदभावान्निष्क्रिय इति व्याचक्षते, तदप्यसद् दर्शनम्, आत्मनः सर्वगतत्वे प्रमाणाभावात्। उपेत्य वाऽभिधीयते, सर्वगतात्मनः सर्वत्र सर्वोपलब्धिप्रसङ्गः। अथ यत्रैवोपभोगोपलब्ध्यधिष्ठानं शरीरमस्ति तत्रैवोपलब्धिस्तदभावान्नान्यत्र चेत् तदयुक्तम्, अन्यत्रापि शरीरकाणां सम्भवात् । निजधर्माधर्मोत्पादितं यच्छरीरकं तत्रेति चेत् तदसत्, निष्क्रियत्वाद् आत्मनस्तावेव धर्माधर्मौ कथं निजाविति निष्क्रियस्य संसारमुक्तिप्रहाणप्राप्त्युपायानुष्ठानाभावादसमीचीन एव निष्क्रियत्वपक्षः। आदिग्रहणात् क्षणविनश्वरविज्ञानमात्रतोद्भावनं स्कन्धमात्रतोद्भावनमवक्तव्यतोद्भावनं वा सर्वमनृतमिति। असत एव द्वितीयभेदव्याख्यानायाह-

भा० **अर्थान्तरं यो गां ब्रवीत्यश्वम् अश्वं च गौरिति । गर्हेति हिंसापारुष्यपैशुन्यादियुक्तं वचः सत्यमपि गर्हितमेव भवतीति।।९।।**

वृ० **अर्थान्तरमि**त्यादि। अर्थादन्योऽर्थः **अर्थान्तरम्** । तद् दर्शयति- **यो गां ब्रवीत्यश्वमिति अश्वं च गौरिति।** य इति प्रमत्तस्य कर्तुर्निर्देशः। गोशब्दः सङ्केतवशात् सास्नादिमति पिण्डे लोकेन व्यवहारार्थं प्रयुज्यत इति रूढम्। अश्वशब्दोऽप्येकशफाद्यवयवसन्निवेशविशेषे प्रसिद्धः। वक्ता तु वैपरीत्येन मौढ्यात् प्रयोगं करोत्यश्वशब्दं गवि प्रयुङ्क्ते शाठ्याद् वा, गोशब्दं चाश्व इति, एवम्, अचौरं चौर इत्यादि ।। असत एव तृतीयभेदो गर्हा । तद्विवरणायाह-**गर्हेति हिंसेत्यादि** । गर्हणं **गर्हा** कुत्सा शास्त्रप्रतिषिद्धवागनुष्ठानं गर्हितं कुत्सितमिति यावत्। **युक्त**शब्दः प्रत्येकमभिसम्बध्यते । **हिंसायुक्तं वचः** सद्भूतार्थप्रतिपत्तिकमप्यलीकमेव। यतो हिंसानिवृत्तेर्मृषावादादिनिवृत्तिः परिकरः। हिंसानिवृत्तिपरिक्षणार्थमेव हि मृषावादादिवृत्तय उपदिष्टाः। तत्र **हिंसा**-अभिहितलक्षणा येन वचसोच्यमानेन प्राणिनां परितापावद्रावणे भवतस्तद्धिंसायुक्तं वचः सत्यमप्यागमे कुत्सितत्वादनृतमेव भवति । यतः प्राणिपीडापरिरक्षणार्थं मृषावादादिनिवृत्तिरिति । तथा **पारुष्ययुक्तं** परुषो-निष्ठुरस्तद्भावः पारुष्यं-निष्ठुरवचनाभिव्यङ्ग्यमन्तर्गताशुभभावपिशुनं तदपि परपीडोत्पादहेतुत्वात् सत्यमपि गर्हितम् । तथा

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

किंविशिष्टस्य सत इति ? अत आह - माया निकृतिः, साऽस्यास्तीति मायावी तस्य **मायाविनो** वणिजादेः, तथा [f] **अतिसन्धानपरस्य** परवञ्चनाप्रवृत्तस्याऽनेनाशेषेष्वपि प्रवृत्तिमप्याह,[g] तथा **प्रच्छन्नपापस्य** कूटप्रयोगकारिणस्तस्यैव, अथवा धिग्जातिककुतीर्थिकादेरसद्भूतगुणं गुणवन्तमात्मानं ख्यापयतः, तथाहि–गुणरहितमप्यात्मानं यो गुणवन्तं ख्यापयति न तस्मादपरः प्रच्छन्नपापोऽस्तीति गाथार्थः ।।२०।।

---

**पैशुन्ययुक्तम्।** मर्मसु तुदन् परान् पिशुन उच्यते, तद्भावः पैशुन्यम्। येन येन वचसोच्चार्यमाणेन परस्य प्रीतिर्विहन्यते तत् सर्वं पैशुन्ययुक्तमिति । **आदि**शब्दाच्छलशठदम्भकल्कविकारोल्लप्ति-काकटुकसन्दिग्धाहितामिताप्रशस्तविकथाश्रितप्रवचनविरुद्धसावद्यग्रहणमिति । आगमश्चा-

"जा य सच्चा अवत्तव्वा, सच्चामोसा य जा मुसा ।
जा य बुद्धेहिं णाइण्णा, ण तं भासिज्ज पण्णवं ।।१।।" [**दशवैकालिके**, अ०७, गा० २]

वाचकेनाप्युक्तम्–

"यद् रागदोषवद् वाक्यम्, तत्त्वादन्यत्र वर्तते। सावद्यं वाऽपि यत् सत्यम्, तत् सर्वमनृतं विदुः ।।१।।"

तथा परेणाप्युक्तम्-

"अनृतमसद्वचनं स्या–च्चतुर्विधमसच्च जिनवरैर्दृष्टम्। सद्भूतप्रतिषेधो-ऽसद्भूतोद्भावनं च तथा ।।१।।"

नास्ति घटः, शशशृङ्गमस्तीति, गर्हितवचनं ह्यसत् सतोऽपि वा वचनमन्यथा यत् स्यात्, गर्हितमुपघातादि, इतरच्च गौरश्व इति वचनम्, तस्मात् प्रमत्तयोगादसदभिधानमनृतमिति व्यवस्थितम्। तच्च संक्षेपतश्चातुःस्थानसङ्गृहीतं सर्वद्रव्यविषयमन्यूनम्। द्रव्याणि च लोकालोकावच्छिन्नानि, काले रात्रिंदिवलक्षणः, भावतो रागद्वेषमोहपरिणत आत्मा। अनेनैतदपि प्रतिक्षिप्तमवसेयम्–

"न नर्मयुक्तं वचनं हिनस्ति, न स्त्रीषु राजन् ! न विवाहकाले ।
प्राणात्यये सर्वधनापहारे, पञ्चानृतान्याहुरपातकानि ।।१।।" इति ।

अपरे तु मोहादयुक्तं मृषावादलक्षणं ब्रुवते । अन्यथासंज्ञिनो वाक्यमर्थाभिज्ञे मृषावचः। यद्वचनं यमर्थं ब्रवीति तस्मिन्नन्यथासंज्ञीभवति चौरमचौरमिति, यं वाऽधिकृत्य ब्रवीति स तस्य वाक्यस्यार्थाभिज्ञो यदि भवति ततस्तद्वाक्यं मृषावादः, अर्थाभिज्ञश्चाभिज्ञातुं समर्थो यश्च उत्पन्नभावः उत्पन्ने श्रोत्रविज्ञाने, वाक्यार्थश्च मनोविज्ञानविषयो न श्रोत्रविषयश्च, अभिज्ञातुं समर्थे श्रोतरीत्येतदभ्युपेतं भवति। वाक्यार्थानभिज्ञे तु सम्भिन्नः प्रलपः स्यान्न मृषावाद इति, तदेतदयुक्तम्, प्रमत्तभाषितत्वात् । अर्थाभिज्ञोऽनभिज्ञो वा भवतु श्रोता, किं तेन बाह्येन वस्तुतो निमित्तमात्रतयोपयुज्यमानेन? स्वाश्रयोऽत्रापराध्यति । सर्वथाऽपि प्रमत्तो यः कायवाङ्मनोयोगैरसदभिधत्ते तदनृतम्, आशयस्याविशुद्धत्वात्। सम्भिन्नप्रलपश्च परिभाषान्तरमात्मरुच्या व्यवस्थापितमनृतवचनात् परमार्थतो न भिद्यत एव वाचकमुख्यप्रणीतानृतलक्ष-णादिति ।।९।।

—तत्त्वार्थ. सिद्ध. वृत्तौ ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

उक्तो [a] **द्वितीयो भेदः**, साम्प्रतं **तृतीय**मुपदर्शयति-

**तह[१] तिव्वकोह-लोहाउलस्स भूओवघायणमणज्जं ।**
**परदव्वहरणचित्तं परलोयावायनिरविक्खं[b] ।।२१।।**

**तह तिव्व० गाहा ।। तथाशब्दो** [c] दृढाध्यवसानप्रकारसादृश्योपदर्शनार्थः । तीव्रौ [d] उत्कटौ च तौ क्रोधलोभौ च **तीव्रक्रोधलोभौ** ताभ्या**माकुलोऽ**भिभूतस्तस्य, जन्तोरिति गम्यते । किम्? **भूतोपहननमनार्यम्** इति हन्यतेऽनेनेति हननम्, उप सामीप्येन हननम् उपहननम्, भूतानामुपहननं भूतोपहननम्, आराद्यातं सर्वहेयधर्मेभ्य इत्यार्यं नाऽऽर्यमनार्यम्, किं तदेवंविधमित्यत आह-**परद्रव्यहरणचित्तम्** रौद्रध्यानमिति गम्यते, परेषां द्रव्यं परद्रव्यं सचित्तादि, तद्विषयं हरणचित्तं परद्रव्यहरणचित्तम्, तदेव विशिष्यते – किम्भूतं तदिति ? अत आह – **परलोकापायनिरपेक्षम्** इति तत्र परलोकापायाः-नरकगमनादयस्तन्निरपेक्षमिति गाथार्थः ।।२१।।

---

१ A **चौर्योपदेशबाहुल्यं, चातुर्यं चौर्यकर्मणि ।**
**यच्चौर्यैकपरं चेत-स्तच्चौर्यानन्द इष्यते ।। २४ ।।**
**यच्चौर्याय शरीरिणामहरहश्चिन्ता समुत्पद्यते,**
**कृत्वा चौर्यमपि प्रमोदमतुलं कुर्वन्ति यत्संततम् ।**
**चौर्येणापि हृते परैः परधने यज्जायते संभ्रम-**
**स्तच्चौर्यप्रभवं वदन्ति निपुणा रौद्रं सुनिन्दास्पदम् ।। २५ ।।**
**कृत्वा सहायं वरवीरसैन्यं, तथाभ्युपायांश्च बहुप्रकारान् ।**
**धनान्यलभ्यानि चिरार्जितानि, सद्यो हरिष्यामि जनस्य धात्र्याम् ।।२६।।**
**द्विपदचतुष्पदसारं, धनधान्यवराङ्गनासमाकीर्णम् ।**
**वस्तु परकीयमपि, मे स्वाधीनं चौर्यसामर्थ्यात् ।। २७ ।।**
**इत्थं चुरायां विविधप्रकारः, शरीरिभिर्यः क्रियतेऽभिलाषः ।**
**अपारदुःखार्णवहेतुभूतं, रौद्रं तृतीयं तदिह प्रणीतम् ।।२८।।** **–ज्ञानार्णवे, सर्ग - २७ ।।**

B **चौर्यधीर्निरपेक्षस्य, तीव्र क्रोधाऽऽकुलस्य च । xxx ।। १२ ।। –अध्यात्मसारे, अ. १६ ।।**

C **चौर्यार्थं जीवघातादि, चिन्तार्त्तं यस्य मानसम् । कृत्वा तच्चिन्तितार्थं यत्, हृष्टस्तच्चौर्यमुदितम् ।। ८९ ।।**
**द्विपदचतुष्पदसारं, धनधान्यवराङ्गनासमाकीर्णम् ।**
**वस्तु परकीयमपि, मे स्वाधीनं चौर्यसामर्थ्यात् ।। ९० ।।**
**चौर्यं बहुप्रकारं, ग्रामाध्वदेशघातकरणेच्छा ।**
**सततमिति चौर्यरौद्रं, भवत्यवश्यं श्वभ्रगमनम् ।। ९१ ।।** **–ध्यानदीपिकायाम् ।।**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

उक्त[a]स्तृतीयो **भेदः**, साम्प्रतं [b]**चतुर्थमु**पदर्शयन्नाह –

**[१]सद्दादिविसयसाहणध[c]णसंरक्खणपरायणमणिट्ठं ।**
**सव्वाभिसंकणपरोवघायकलुसाउलं चित्तं ।।२२।।**

**सद्दादिविसय० गाहा** ।। शब्दादयश्च ते विषयाश्च शब्दादिविषयास्तेषां[d] साधनं-कारणम् **शब्दादिविषयसाधनं** तच्च त**द्धनं** च[e] शब्दादिविषयसाधनधनम्, तत्**संरक्षणे** तत्परिपालने **परायणम्** उद्युक्तमिति विग्रहः, तथाऽ**निष्टम्** सतामनभिलषणीयमित्यर्थः, इदमेव विशेष्यते- **सर्वेषामभिशङ्कनेन**[f] 'न विद्म कः किं करिष्यती'त्यादिलक्षणेन, तस्मात्सर्वेषां[g] यथाशक्त्योपघात एव श्रेयानित्येवं **परोपघातेन** च, तथा कलुषयत्यात्मानमिति **कलुषाः** कषायास्तै**श्चाकुलं** व्याप्तं यत्तत् तथोच्यते, **चित्तम्** अन्तःकरणम्, प्रकरणाद्रौद्रध्यानमिति गम्यते, इह च शब्दादिविषयसाधनं[h] धनविशेषणं किल श्रावकस्य चैत्यधनसंरक्षणे न रौद्रध्यानमिति ज्ञापनार्थमिति गाथार्थः[२] ।।२२।।

---

[१] A **बह्वारम्भपरिग्रहेषु नियतं रक्षार्थमभ्युद्यते, यत्संकल्पपरम्परां वितनुते प्राणीह रौद्राशयः ।**
**यच्चालम्ब्य महत्त्वमुन्नतमना राजेत्यहं मन्यते, तत्तुर्यं प्रवदन्ति निर्मलधियो रौद्रं भवाशंसिनाम् ।। २९ ।।**
**आरोप्य चापं निशितैः शरौघैर्निकृत्य वैरिव्रजमुद्धताशम् ।**
**दग्ध्वा पुरग्रामवराकराणि प्राप्स्येऽहमैश्वर्यमनन्यसाध्यम् ।। ३० ।।**
**आच्छिद्य गृह्णन्ति धरां मदीयां कन्यादिरत्नानि च दिव्यनारीम् ।**
**ये शत्रवः सम्प्रति लुब्धचितास्तेषां करिष्ये कुलकक्षदाहम् ।।३१।।**
**सकलभुवनपूज्यं वीरवर्गोपसेव्यं, स्वजनधनसमृद्धं रत्नरामाभिरामम् ।**
**अमितविभवसारं विश्वभोगाधिपत्यं, प्रबलरिपुकुलान्तं हन्त कृत्वा मयाप्तम् ।। ३२ ।।**
**भित्त्वा भुवं जन्तुकुलानि हत्वा प्रविश्य दुर्गाण्युदधिं विलङ्घ्य ।**
**कृत्वा पदं मूर्ध्नि मदोद्धतानां मयाधिपत्यं कृतमत्युदारम् ।।३३।।**
**जलानलव्यालविषप्रयोगै-र्विश्वासभेदप्रणिधिप्रपञ्चैः ।**
**उत्साद्य निःशेषमरातिचक्रं, स्फुरत्ययं मे प्रबलप्रतापः ।। ३४।।**
**इत्यादिसंरक्षणसन्निबन्धं सचिन्तनं यत्क्रियन्ते मनुष्यैः ।**
**संरक्षणानन्दभवं तदेतद्रौद्रं प्रणीतं जगदेकनाथैः ।। ३५ ।।** —ज्ञानार्णवे, सर्ग. २६ ।।

B x x x । **सर्वाभिशङ्काकलुषं, चित्तं च धनरक्षणे ।। १२ ।।** —अध्यात्मसारे, अ. १६।।

C **बह्वारम्भपरिग्रहसंग्रामैर्जन्तुघाततो रक्षाम् ।**
**कुर्वन् परिग्रहादेः रक्षारौद्रीति विज्ञेयम् ।। ९२ ।।** —ध्यानदीपिकायाम् ।।

[२] A **अव०** सम्प्रति रौद्रध्यानं सस्वामिकमभिधित्सुराह—
**मू०** **हिंसा-ऽनृत-स्तेय-विषयसंरक्षणेभ्यो रौद्रमविरतदेशविरतयोः ।। ९-३६ ।।**

**भा० हिंसार्थमनृतवचनार्थं स्तेयार्थं विषयसंरक्षणार्थं च स्मृतिसमन्वाहारो रौद्रध्यानम्, तदविरतदेशविरतयोरेव भवति ।। ३६ ।।**

**वृ०** हिंसा अनृतं स्तेयं विषयसंरक्षणं चेति द्वन्द्वः । ततो द्वन्द्वसमासः । लिङ्गान्यस्यो-त्सन्नबह्वज्ञानामरण-दोषाः । तत्र हिंसानन्दादीनां चतुर्णां प्रकाराणामन्यतमभेदेऽनवरतमविश्रान्त्या प्रवर्तमानस्य बहुकृत्वः सञ्चितदोष उत्सन्नशब्दवाच्यः । यथोत्सन्नकालान्तरमुपचितमिति । तथा हिंसानन्दादिषु चतुर्ष्वपि प्रवर्तमानस्याभिनिविष्टान्तःकरणस्य बहुदोषता अज्ञानदोषता तेष्वेव हिंसादिषु अधर्मकार्येष्वभ्युदय-कार्यबुद्धिव्यपाश्रयस्य चैकतानविधानावलम्बितसंसारमोचकस्येव भवति । अथवा नानाप्रकारेषु हिंसानन्दाद्युपायेषु प्रवर्तमानस्य प्रचण्डक्रोधाविष्टस्य महामोहाभिभूतस्य तीव्रवधबन्धसंक्लिष्टाध्यवसायस्य नानाविधदोषता, पाठान्तरव्याख्यानं तृतीयविकल्पस्य । तुर्यदोषस्तु मरणावस्थायामपि हिंसानन्दादिकृतः स्वल्पोऽपि पश्चात्तापो यस्य नास्ति तस्यामरणान्तदोषतेति ।। ३६ ।।—**तत्त्वार्थ. सिद्ध. वृत्तौ ।।**

B **चत्तारि झाणा पं x x x रोद्दे झाणे चउव्विहे पं. तं० - हिंसाणुबंधि मोसाणुबंधि- तेणाणुबंधि-सारक्खाणाणुबंधि** x x x ।।

**—स्था. सू. २४७, भग. सू. ८०२, औप. सू. २० ।।**

**वृ०** x x xअथ रौद्रध्यानभेदा उच्यन्ते, हिंसां-सत्त्वानां वधबन्धनादिभिः प्रकारैः पीडामनुबध्नाति-सततप्रवृत्तं करोतीत्येवंशीलं यत्प्रणिधानं हिंसानुबन्धो वा यत्रास्ति **तद्धिंसानुबन्धि** रौद्रध्यानम् इति प्रक्रम इति, उक्तं च – [ध्यानशतके]

"सत्तवहवेहबंधणडहणंकणमारणाइपणिहाणं । अइकोहग्गहगत्थं णिग्घिणमणसोऽहमविवागं ।। १९ ।।"

इति, तथा मृषा-असत्यं तदनुबध्नाति पिशुनाऽसभ्यासद्भूतादिभिर्वचनभेदैस्तन्**मृषानुबन्धि**, आह च–

"पिसुणाऽसब्भासब्भूयभूयघायाइवयणपणिहाणं । मायाविणोऽतिसंधणपरस्स पच्छन्नपावस्स ।। २०।।"

इति, तथा स्तेनस्य-चोरस्य कर्म्म स्तेयं तीव्रक्रोधाद्याकुलतया तदनुबन्धवत् **स्तेयानुबन्धि,** आह च–

"तह तिव्वकोहलोहाउलस्स भूतोवघायणमणज्जं । परदव्वहरणचित्तं परलोगावायनिरवेक्खं ।। २१ ।।"

इति, संरक्षणे-सर्वोपायैः परित्राणे विषयसाधनधनस्यानुबन्धो यत्र तत्**संरक्षणानुबन्धि,** यदाह–

"सद्दाइविसयसाहणधणसंरक्खणपरायणमणिट्ठं । सव्वाहिसंकणपरोवघायकलुसाउलं चित्तं ।। २२ ।।" इति । x x x ।।

**—स्थानाङ्गसूत्रवृत्तौ २४७ ।।**

C **रोद्दं चतुव्विधं**-हिंसाणुबंधी, मोसाणुबंधी, तेणाणुबंधी, सारक्खणाणुबंधी।

तत्थ हिंसाणुबंधी हिंसं अणुबंधति, पुणो पुणो तिव्वेण परिणामेणं तसपाणे हिंसति, अहवा पुणो पुणो भणति चिंतेति वा सुट्ठु कतं, अहवा छिद्दाणि वयराणि वा मग्गति, हिंसं अणुबंधति, ण विरमति । एवं मोसेवि, तिण्णेवि, संरक्खणो परागादीणि करोति, जो वा जोइल्लओ खाति तं मारेति, मा अण्णोवि खाहिति, दुट्ठे सासति, सव्वतो य बीभेति, पलित्तमिव मण्णति, उक्खणति, निक्खणति, सव्वं तेलोक्कं चोरमइयं मंणति, परनिंदासु व हिस्सति, रुस्सति, वसणमभिनंदति परस्स, रोद्दज्झाणमतिगतो भवति येव दुक्कडमयीयो, एवं सारक्खणाणुबंधे, सेसं तहेव। **—आवश्यकचूर्णौ ।।**

D x x x एवं रुद्रे भवं रौद्रं हिंसा-ऽनृत-स्तेय-संरक्षणाऽऽनन्दभेदेन चतुर्विधम्, हिंसायामानन्दो रुचिर्यस्मिन् तद् **हिंसानन्दम्** एवमुत्तरत्रापि योज्यम्, एतदपि बाह्याध्यात्मभेदाद् द्विविधम्, परुषनिष्ठुरवचनाक्रोश–

साम्प्रतं विशेषाभिधानगर्भमुपसंहरन्नाह[a]–

**[१] इय करण-कारणाणुमइविसयमणुचिंतणं चउब्भेयं ।**
**अविरय-देसासंजयजणमणसंसेवियमहण्णं ।।२३।।**

**इय० गाहा ।। 'इय'** एवं **करणं** स्वयमेव, **कारणमन्यै**:, कृतानुमोदन**मनुमतिः**, करणं च कारणं चानुमतिश्च करणकारणानुमतयः, एता एव **विषयो** गोचरो यस्य तत्करणकारणानुमतिविषयम्, किमिदमिति ? अत आह-**अनुचिन्तनं** पर्यालोचनमित्यर्थः । **चतुर्भेदम्** इति हिंसानुबन्ध्यादिचतुष्प्रकारम्, रौद्रध्यानमिति गम्यते ।

---

निर्भर्त्सनताडनपरदारातिक्रमाभिनिवेशादिरूपं बाह्यम्–स्वपराभ्यां स्वसंवेदनाऽनुमानगम्यं बाह्यम्; आध्यात्मिकं हिंसायां संरम्भ-समारम्भादिलक्षणायां नैर्घृण्येन प्रवर्तमानस्य संकल्पाध्यवसानम्-संकल्पश्चिन्ताप्रबन्ध-स्तस्याध्यवसानम्-तीव्रकषायानुषक्तत्वं **प्रथमं हिंसानन्दं** नाम । परेषामनेकप्रकारैर्मिथ्यावचनैर्वञ्चनं प्रति संकल्पाध्यवसानं **मृषानन्दं** नाम । परद्रव्यापहरणं प्रति अनेकोपायैर्यत् तत् **स्तेयानन्दम्** । परिग्रहे 'मम एव इदं स्वम् अहमेव अस्य स्वामी' इति अभिनिवेशस्तदपहर्तृविघातेन संरक्षणं प्रति संकल्पाध्यवसानं **संरक्षणानन्दम्** । चतुर्विधमप्येतत् कृष्णादिलेश्याबलाधायकं प्राक् प्रमत्तगुणस्थानात् प्रमादाधिष्ठानं कषायप्राधान्यादौदयिकभावरूपं नरकगतिफलनिर्वर्तकं पापध्यानद्वयमपि हेयम् । x x x ।।६३।।

**–सम्मतिवृत्तौ, का. ३ ।।**

E मू० **परिचत्तअट्टरुद्दे** x x x ।।४८४।।

वृ० x x x रौद्रमपि चतुर्द्धा-तत्र सत्त्वानां वधवेधबन्धनदहनाङ्कनमारणादि हिंसानुबन्धि प्रणिधानं प्रथमं रौद्रम् । तथा पिशुनासभ्यसद्भूतघातादिवचनप्रणिधानात्मकं मृषानुबन्धि द्वितीयम् । तथा तीव्रक्रोध- लोभाकुलस्य भूतोपमर्दनपरद्रव्यादिहरणात्मकं स्तेयानुबन्धि तृतीयम् । तथा शब्दादिविषयधनसंरक्षण-सर्वाभिशङ्कनपरोपघाताद्यात्मकं विषयसंरक्षणानुबन्धि चतुर्थम्। अत एताभ्यामपध्यानाभ्यां परित्यक्ते विरहिते चेतसि, अत एव समभावभाविते । आर्तरौद्रयोरेव चित्तविस्रोतसिकानिमित्तत्वात् । x x x ।। ४८४।।

**–हितोपदेशवृत्तौ ।।**

F **रागद्वेषपरिगतो मिथ्यात्वोपहतकलुषया दृष्ट्या ।**
**पञ्चाश्रवमलबहुलार्त्तरौद्रतीवाभिसन्धानः ।।२०।।**

वृ० x x x रुद्रः क्रूरो नृशंसस्तस्यैदं **रौद्रम्**, तदपि चतुर्धा । तत्र प्रथमं हिंसानुबन्धि । अनेनानेन चोपायेन परो वञ्चयते कूटसाक्षिदानादिना तत्रेकतानं मनोरौद्रं द्वितीयम् । तृतीयं स्तेयानुबन्धि येन येन प्रकारेण परस्वमादीयते घुर्घुरुककर्तरिकाच्छेदकक्षात्रखननादिना तत्रेकतानं मनोरौद्रम् । धनधान्यादिविषयसंरक्षणैकतानं मनो दिवानिशि तुरीयं रौद्रम् । ।।२०।। **–प्रशमरतिवृत्तौ ।।**

[१] A मू० **हिंसा-नृत-स्तेय-विषयसंरक्षणेभ्यो रौद्रमविरतदेशविरतयोः ।। ९-३६ ।।**

भा० **हिंसार्थमनृतवचनार्थं स्तेयार्थं विषयसंरक्षणार्थं च स्मृतिसमन्वाहारो रौद्रध्यानम्, तदविरतदेशविरतयोरेव भवति ।।३६।।** **–तत्त्वार्थसूत्रे ।।**

B (इमे गाथे जिनकल्पिकसामाचारीमाश्रित्य स्तः । - सम्पा०)

**अव०** ध्यानद्वारमधिकृत्याह-

**झाणंमिवि धम्मेणं, पडिवज्जइ सो पवड्ढमाणेणं ।**

**इअरेसु वि झाणेसुं, पुव्वपवण्णो ण पडिसिद्धो ।। १५०५ ।।**

**वृ०** **ध्यानेऽपि** प्रस्तुते **धर्मेण** ध्यानेन **प्रतिपद्यतेऽसौ** कल्पं **प्रवर्द्धमानेन** सता, **इतरेष्वपि ध्यानेषु** आर्त्तादिषु **पूर्वप्रतिपन्नोऽयं न प्रतिषिद्धो** भवत्यपीति गाथार्थः ।। १५०५ ।।

**एवं च कुसलजोगे, उद्दामे तिव्वकम्मपरिणामा ।**

**रोद्दट्टेसुवि भावे, इमस्स पायं निरणुबंधो ।। १५०६ ।।**

**वृ०** **एवं कुशलयोगे** जिनकल्पप्रतिपत्त्योद्दामे सति **तीव्रकर्मपरिणामौ**दयिकाद् **रौद्रार्त्तयोरपि भावोऽस्य** ज्ञेयः, स च **प्रायो निरनुबन्धः** स्वल्पत्वादिति गाथार्थः ।। १५०६ ।। **—पञ्चवस्तुनि ।।**

C **मू०** **हिंसानृतस्तेय** x x x **विरतयोः** ।।९ -३५ ।।

**वृ०** x x x अविरतस्य भवतु रौद्रध्यानम्, देशविरतस्य कथम् ? तस्यापि हिंसाद्यावेशाद्वित्तादिसंरक्षणतन्त्रत्वाञ्च कदाचिद् भवितुमर्हति। तत्पुनर्नारकादीनामकरणम्, सम्यग्दर्शनसामर्थ्यात् । संयतस्य तु न भवत्येव, तदारम्भे संयमप्रच्युतेः ।। ३५ ।। **—तत्त्वार्थ. सर्वार्थ. वृत्तौ ।।**

D **अव०** अथ देशविरतौ ध्यानसम्भवमाह-

**आर्त्तं रौद्रं भवेदत्र, मन्दं धर्म्यं तु मध्यमम्** । x x x **।। २५ ।।**

**वृ०** **अत्र** देशविरतिगुणस्थानके अनिष्टयोगार्त्तम्, इष्टवियोगार्त्तम्, रोगार्त्तम्, निदानार्त्तमिति चतुष्पाद**मार्त्तध्यानम्, रौद्रध्यानं** च हिंसानन्दरौद्रम्, मृषावादानन्दरौद्रम्, चौर्यानन्दरौद्रम्, संरक्षणानन्दरौद्रं चेति चतुष्पादं रौद्रध्यानं च **मन्दं भवति,** कोऽर्थः? यथा यथा देशविरतिरधिकाऽधिकतरा च भवति, तथा तथाऽऽर्त्तरौद्रध्याने मन्दे मन्दतरे च स्याताम् । x x x ।। २५ ।।

**अव०** अथ प्रमत्तसंयतगुणस्थाने ध्यानसंभवमाह-

**अस्तित्वान्नोकषायाणामत्रार्त्तस्यैव मुख्यता** । x x x ।। २८ ।।

**वृ०** **अत्र** प्रमत्तगुणस्थानके **मुख्यता** मुख्यत्वम् **आर्त्तस्य** ध्यानस्**यैवो**पलक्षणत्वाद्रौद्रस्यापि, कस्मात् ? **नोकषायाणां** हास्यषट्कादीनाम् **अस्तित्वाद्** विद्यमानत्वात् x x x।। २८ ।। **—गुणस्थानकक्रमारोहे ।।**

E **एतत् सदोषकरणा-कारणाऽनुमतिस्थिति । देशविरतिपर्यन्तम्, रौद्रध्यानं चतुर्विधम् ।। १३ ।।**

**—अध्यात्मसारे, अ. १६ ।।**

## तात्पर्यार्थः

## रौद्रध्यानस्वामिविचारणा

चतुष्प्रकारमपि रौद्रध्यानं भेदाविवक्षया पञ्चमगुणस्थानकपर्यन्तं **तत्त्वार्थाध्यात्मसारादिषु** ग्रन्थेषु निरूपितम् । **गुणस्थानकक्रमारोहे** परिणामविशुद्ध्या मन्द-मन्दतरं तद् देशविरतिगुणस्थानके प्ररूपितम्, तथा नोकषायाणामस्तित्वाद् सर्वविरतिगुणस्थानके आर्तस्य मुख्यता स्वीकृता, उपलक्षणाञ्च रौद्रस्यापि । **पञ्चवस्तुकग्रन्थे** तु तीव्रकर्मोदयेन जिनकल्पिकानामपि निरनुबन्धितया रौद्रध्यानं देशितम् । दिगम्बराम्नायानुसारितत्त्वार्थ-**सर्वार्थसिद्धिमध्ये** तु रौद्रस्य संयमनाशकत्वेन षष्ठगुणस्थानके सर्वथाऽभाव एव दर्शितः ।

**तस्मात् — निरनुबन्धितया षष्ठगुणस्थानपर्यन्तसंभवी अपि रौद्रध्यानं तदविवक्षया पञ्चगुणस्थानकस्थायित्वेन विवक्षितम् । यदा तद् षष्ठगुस्थानके प्रबलं भवेत् तदा संयमप्रच्युतिर्भवेद् इति ज्ञायते ।**

**—सम्पा० ।।**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अधुनेदमेव स्वामिद्वारेण निरूपयति—**अविरताः** सम्यग्दृष्टयः इतरे च, **देशासंयताः** श्रावकाः, अनेन सर्वसंयतव्यवच्छेदमाह, अविरत-देशासंयता एव **जना** अविरत-देशासंयतजनाः, तेषां **मनांसि** चित्तानि, तैः **संसेवितं** सञ्चिन्तितमित्यर्थः, [b]मनोग्रहणमत्र ध्यानचिन्तायां प्रधानाङ्गख्यापनार्थम्, **अधन्यमि**त्यश्रेयस्करं पापं निन्द्यमिति गाथार्थः ।।२३।।

अधुनेदं यथाभूतस्य भवति यद्वर्द्धनं चेदमिति तदेतदभिधातुकाम आह –

**एयं चउव्विहं राग-दोस-[a]मोहांकियस्स जीवस्स ।**
**रोद्दज्झाणं संसारवद्धणं [b]नरयगइमूलं ।।२४।।**

**एयं० गाहा ।। एतत्** अनन्तरोक्तम्, **चतुर्विधं** चतुष्प्रकारं **राग-द्वेष-मोहाङ्कितस्य,** आकुलस्य वेति पाठान्तरम् । कस्य ? **जीवस्य** आत्मनः किम् ? **रौद्रध्यानमि**ति, [c]इयमेव चात्र चतुष्टयस्यापि क्रिया, किंविशिष्टमिदमिति ? अत आह - **संसारवर्द्धनम्** ओघतः, [d]**नरकगतिमूलं** विशेषत इति गाथार्थः ।।२४।।

साम्प्रतं रौद्रध्यायिनो **लेश्याः** प्रतिपाद्यन्ते –

**का[१]वोय-नील-कालालेसाओ तिव्वसंकिलिट्ठाओ ।**
**रोद्दज्झाणोवगयस्स कम्मपरिणामजणियाओ ।।२५।।**

**कावोय० गाहा** ।। [a]पूर्ववद्, एतावांस्तु [b]विशेषः-यत् **तीव्रसंक्लिष्टा** अतिसंक्लिष्टा एता इति ।। २५।।

---

[१] A किण्हा नीला काऊ रोद्दज्झाणस्स तिण्णि लेसाओ । नरगंमि य उववत्ती रोद्दज्झाणा उ जीवस्स ।। ४ ।।
रोद्दज्झाणं झियायंतो, किण्हलेसाए वट्टती । उक्कस्सगंमि ठाणंमि, अचरित्ती असंजतो ।। ५ ।।
—आवश्यकचूर्णौ ।।

B कापोतनीलकृष्णानां, लेश्यानामत्र सम्भवः । अतिसंक्लिष्टरूपाणां, कर्मणां परिणामतः ।। १४ ।।
—अध्यात्मसारे, अ. १६ ।।

C कापोतनीलकाला, अतिसंक्लिष्टा भवन्ति दुर्लेश्याः । रौद्रध्यानपरस्य तु, नरस्य नरकातिथेर्मोहात् ।। ९४ ।।
—ध्यानदीपिकायाम् ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

आह-कथं पुनः रौद्रध्यायी ज्ञायत इति ? उच्यते–**लिङ्गेभ्यः**, तान्येवोपदर्शयति –

**[१]लिंगाइं तस्स उस्सण्ण-बहुल-नाणाविहाऽऽमरणदोसा ।**
**तेसिं चिय हिंसाइसु बाहिरकरणोवउत्तस्स ।।२६।।**

**लिंगाई० गाहा ।। लिङ्गानि** चिह्नानि **तस्य** रौद्रध्यायिनः, **उत्सन्न-बहुल-नानाविधाऽऽमरणदोषाः** इत्यत्र दोषशब्दः प्रत्येकमभिसम्बध्यते-उत्सन्नदोषो बहुलदोषो नानाविधदोष आमरणदोषश्चेति । **तत्र** हिंसानुबन्ध्यादीनामन्यतरस्मिन् प्रवर्तमान उत्सन्नम्-अनुपरतं बाहुल्येन प्रवर्तते **इत्युत्सन्नदोषः** । सर्वेष्वपि चैवमेव प्रवर्तत इति **बहुलदोषः** । नानाविधेषु [a]त्वक्त्वक्षण-नयनोत्खननादिषु हिंसाद्युपायेष्वसकृदप्येवं [b]प्रवर्तत इति **नानाविधदोषः** । [c]महापद्गतोऽपि स्वतः [d]महापद्गतेऽपि च परे आमरणादसञ्जातानुतापः [e]कालसौकरिकवदपि[☆] त्वसमाप्तानुतापानुशयपर **इत्यामरणदोष** इति । **तेष्वेव हिंसादिषु** आदिशब्दान्मृषावादादिपरिग्रहः, ततश्च [f]तेष्वेव हिंसादिषु- हिंसानुबन्ध्यादिषु [g]चतुर्षु भेदेषु, किम् ? **बाह्यकरणोपयुक्तस्य** सत [h]उत्सन्नादिदोषा लिङ्गानीति, बाह्यकरणशब्देनेह वाक्कायौ गृह्येते, ततश्च ताभ्यामपि तीव्रमुपयुक्तस्येति गाथार्थः ।।२६।।

---

☆ **परिशिष्ट - १A**

[१] A **चत्तारि झाणा पं० x x x रूद्दस्स णं झाणस्स चत्तारि लक्खणा पं०, तं. ओसण्णदोसे, बहुदोषे, अन्नाणदोसे, आमरणंतदोसे।...।।**

**–स्था. सू. २४७, भग. सू. ८०३ , औप. सू. २० ।।**

**वृ०** x x x अथैतल्लक्षणान्युच्यन्ते –**'ओसन्नदोसे'त्ति** हिंसादीनामन्यतरस्मिन् ओसन्नं-प्रवृत्तेः प्राचुर्यं बाहुल्यं यत्स एव दोषः अथवा 'ओसन्नं' ति बाहुल्येनानुपरतत्वेन दोषो हिंसादीनां चतुर्णामन्यतर ओसन्नदोषः, तथा बहुष्वपि-सर्वेष्वपि हिंसादिषु दोषः-प्रवृत्तिलक्षणो **बहुदोषः**, बहुर्वा-बहुविधो हिंसानृतादिरिति बहुदोषः, तथा अज्ञानात्-कुशास्त्रसंस्कारात् हिंसादिष्वधर्मस्वरूपेषु नरकादिकारणेषु धर्म्मबुध्याऽभ्युदयार्थं या प्रवृत्तिस्तल्लक्षणो **दोषोऽज्ञानदोषः**, अथवा उक्तलक्षणमज्ञानमेव दोषोऽज्ञानदोष इति, अन्यत्र नानाविधदोष इति पाठस्तत्र नानाविधेषु तु उक्तलक्षणादिषु हिंसाद्युपायेषु दोषोऽसकृत्प्रवृत्तिरिति नानाविधदोष इति,तथा मरणमेवान्तो मरणान्तः आमरणान्तादामरणान्तम् असञ्जातानुतापस्य कालसौकरिकादेरिव या हिंसादिषु प्रवृत्तिः सैव दोष **आमरणान्तदोषः** । x x x । सू. २४७ ।। **–स्थानाङ्गसूत्रवृत्तौ ।।**

B **तस्स चत्तारि लक्खणाणि**-उस्सण्णदोसो, बहुदोसो, अण्णाणदोसो, आमरणंतदोसो,

ओसण्णं हिंसादीणं एगतरं अभिक्खणं २ करेति उस्सण्णदोसो, हिंसादिसु सव्वेसु पवत्तमाणो बहुदोसो,

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

किञ्च –

[१]परवसणं [a]अभिनंदइ [b]निरविक्खो निद्दओ निरणुतावो ।
[c]हरिसिज्जइ कयपावो रोद्दज्झाणोवगयचित्तो ।।२७।।

**परवसणं० गाहा** ।। इहाऽऽत्मव्यतिरिक्तो योऽन्यः स परस्तस्य व्यसनम् आपत् **परव्यसनम्,** **तदभिनन्दति** अतिक्लिष्टचित्तत्वाद् बहुमन्यत इत्यर्थः-'शोभनमिदं यदेतदित्थं संवृत्तमि'ति, तथा **निरपेक्ष** इहान्यभविकापायभयरहितः, तथा निर्गतदयो **निर्दयः** परानुकम्पाशून्य इत्यर्थः, तथा निर्गतानुतापो **निरनुतापः** पश्चात्तापरहित इति भावः, तथा किञ्च **हृष्यते** तुष्यति **कृतपापो** [d]निर्वर्तितपापः सन् सिंहमारकवत्, क इत्यत आह – **रौद्रध्यानोपगतचित्त** इति, अमूनि च लिङ्गानि वर्तन्त इति गाथार्थः ।।२७।।

---

अण्णाणदोसो संसारमोदगादीणं, आमरणंतदोसो जथा पव्वतराई, परिगिलायमाणस्सवि आगतपच्छादेसस्स थोवोऽपि पच्छाणुतावो न भवति, अवि मरणकालेवि जस्स **कालसोयरियस्सेव** ण ताओ उवरती भवति, एस आमरणंतदोसो । **तत्थ गाहाओ—**

अट्ठाए अणट्ठाए निरवेंक्खो निद्दयो हणति जीवे । चिंतेतो वावि विहरे रोद्दज्झाणे मुणेतव्वो ।। १ ।।

अलियपिसुणे पसत्तो णाहियवादी तहेवमादी य । अभिसंधाणभिसंदण रोद्दज्झाणं झियायेति ।। २ ।।

परदव्वहरणलुद्धो निझंपि य चोरियं तु पत्थेंतो । लुद्धो य रक्खणपरो रुद्दज्झाणे हवति जीवो ।। ३ ।।

**—आवश्यकचूर्णौ ।।**

C **उत्सन्नबहुदोषत्वं, नानामरणदोषता । हिंसादिषु प्रवृत्तिश्च, कृत्वाघं स्मयमानता ।। १५।।**
**निर्दयत्वाऽननुशयौ, बहुमानः परापदि । लिङ्गान्यत्रेत्यदो धीरै-स्त्याज्यं नरकदुःखदम् ।। १६ ।।**

**—अध्यात्मसारे, अ. १६ ।।**

[१] A **हिंसोपकरणादानं, क्रूरसत्त्वेष्वनुग्रहम् । निस्त्रिंशतादिलिङ्गानि, रौद्रे बाह्यानि देहिनः ।। १५ ।।**
**क्रूरता दण्डपारुष्यं, वञ्चकत्वं कठोरता । निस्त्रिंशत्वं च लिङ्गानि, रौद्रस्योक्तानि सूरिभिः ।। ३७।।**
**विस्फुलिङ्गनिभे नेत्रे, भ्रूवका भीषणाकृतिः । कम्पः स्वेदादिलिङ्गानि, रौद्रे बाह्यानि देहिनाम् ।। ३८ ।।**

**—ज्ञानार्णवे, सर्ग - २६ ।।**

B **क्रूरता चित्तकाठिन्यं, वञ्चकत्वं कुदण्डता । निस्तृंशत्वं च लिङ्गानि, रौद्रस्योक्तानि सूरिभिः ।। ९५ ।।**

**—ध्यानदीपिकायाम् ।।**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# [अथ धर्मध्यानम् ]

उक्तं **रौद्रध्यानम्**, साम्प्रतं **धर्मध्यानावसरः**, तत्र तदभिधित्सयैवादाविदं द्वारगाथाद्वयमाह–

**झाणस्स[१] भावणाओ देसं कालं तहाऽऽसणविसेसं ।**
**आलंबणं कमं झाइयव्वयं जे य झायारो ।।२८।।**
**तत्तोऽणुप्पेहाओ लेस्सा लिंगं फलं च नाऊणं ।**
**धम्मं झाइज्ज मुणी तग्गयजोगो तओ सुक्कं ।।२९।।**

**झाणस्स० गाहा ।। तत्तोऽणुप्पेहाओ० गाहा ।। ध्यानस्य** प्राग्निरूपितशब्दार्थस्य, किम् ? **भावना** ज्ञानाद्या ज्ञात्वेति योगः, किं च-**देशं** तदुचितम्, **कालं तथा आसनविशेषं** तदुचितमिति, **आलम्बनं** वाचनादि, **क्रमं** मनोनिरोधादि, तथा **ध्यातव्यं** ध्येयमाज्ञादि, तथा **ये च ध्यातारः** अप्रमादादियुक्ताः, **ततः अनुप्रेक्षा** ध्यानोपरमकालभाविन्योऽनित्यत्वाद्यालोचना-रूपाः, तथा **लेश्याः** शुद्धा एव, तथा **लिङ्गं** श्रद्धानादि[a], तथा **फलं** सुरलोकादि, **चशब्दः** स्वगता-नेकभेदप्रदर्शनपरः, एत**ज्ज्ञात्वा** । किम् ? **धर्म्यम्** इति धर्मध्यानं [b]**ध्यायेन्मुनिः** । **तत्कृतयोगः** धर्मध्यानकृताभ्यासः, **ततः** [c]पश्चात् **शुक्लं** शुक्लध्यानमिति गाथाद्वयसमासार्थः ।।२८-२९।।

व्यासार्थं तु प्रतिद्वारं ग्रन्थकारः स्वयमेव वक्ष्यति, तत्रा**ऽऽद्यद्वारा**वयवार्थं[a] प्रतिपादनायेदमाह–

**पुव्वकयब्भासो [b]भावणाहिं झाणस्स जोग्गयमुवेइ ।**
**ताओ य नाण-दंसण-चरित्त-वेरग्गजणिया[c] [नियता]ओ[१] ।।३०।।**

---

[१] A **अव०** अथ ध्यानं विधित्सोः क्रममाह-
**ध्यानं विधित्सता ज्ञेयं, ध्याता ध्येयं तथा फलम् ।**
**सिध्यन्ति न हि सामग्रीं, विना कार्याणि कर्हिचित् ।। १ ।।**
**वृ०** स्पष्टः ।। १ ।। —**योगशास्त्रे, प्र-७ ।।**

B **भावना देशकालौ च, स्वासनाऽऽलम्बनक्रमान् । ध्यातव्यध्यात्रनुप्रेक्षा, लेश्या लिङ्गफलानि च ।। १८ ।।**
—**अध्यात्मसारे, अ. १६ ।।**

C **भावनादीनि धर्मस्य, स्थानाद्यासनकानि वा । कालश्चालम्बनादीनि, ज्ञातव्यानि मनीषिभिः ।। १०६ ।।**
—**ध्यानदीपिकायाम् ।।**

**(गाथा - ३०)**

[१] A **भावनाध्यानमाह-**
"**आरुरुक्षोर्मुनेर्योगं, कर्म कारणमुच्यते ।**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**पुव्वकय० गाहा ।। पूर्वं** ध्यानात् प्रथमम्, **कृतो** निर्वर्तितोऽ**भ्यास** आसेवनालक्षणो येन स तथाविधः, काभिः पूर्वकृताभ्यासः ? **भावनाभिः** करणभूताभिः, भावनासु वा भावनाविषये पश्चाद् **ध्यानस्य** अधिकृतस्य **योग्यताम्** अनुरूपता**मुपैति** यातीत्यर्थः। **ताश्च** भावना **ज्ञान-दर्शन-चारित्र-वैराग्यनियता** वर्तन्ते, [d]नियता इति परिच्छिन्नाः पाठान्तरं वा **जनिता** इति गाथार्थः ।।३०।।

---

योगारूढस्य तस्यैव, शमः कारणमुच्यते ।। [-भगवद्गीता, अ० ६ श्लो० ३]

आरुरुक्षोरभ्यासोऽ ज्ञान-दर्शन-चारित्र-वैराग्यभेदाच्चतुर्धा ।

तत्र ज्ञानभावना सूत्राऽर्थ-तदुभयभेदात् त्रिधा- 'नाणे निच्चब्भासो०' इत्यादि ।।१।।

दर्शनभावना आज्ञारुचि (१)-तत्त्व (९)-परमतत्त्व (२४)-रुचिभेदात् त्रिधा-'संकाइदोसरहिओ०' इत्यादि ।।२।।

चारित्रभावना सर्वविरत-देशविरत-अविरतभेदात् त्रिधा-'णवकम्माणायणं०' इत्यादि । अविरतेऽप्यनन्तानुबन्धिक्षयोपशमादिजन्य उपशमादिचारित्रांशोऽस्तीति ।।३।।

वैराग्यभावनाऽनादिभवभ्रमणचिन्तन-विषयवैमुख्य-शरीराशुचिताचिन्तनभेदात् त्रिधा - 'सुविइयजगस्सभावो०' इत्यादि ।।४।। —ध्यानविचारे ।।

B ज्ञात्वा धर्म्यं ततो ध्याये-च्चतस्त्रस्तत्र भावनाः । ज्ञानदर्शनचारित्र-वैराग्यऽऽख्याः प्रकीर्तिताः ।। १९ ।।

निश्चलत्वमसंमोहो, निर्जरा पूर्वकर्मणाम् । सङ्गाऽऽशंसाभयोच्छेदः, फलान्यासां यथाक्रमम् ।। २० ।।

स्थिरचित्तः किलैताभि-र्याति ध्यानस्य योग्यताम् । योग्यतैव हि नाऽन्यस्य, तथा चोक्तं परैरपि ।। २१ ।।

चञ्चलं हि मनः कृष्ण !, प्रमाथि बलवद् दृढम् । तस्याऽहं निग्रहं मन्ये, वायोरिव सुदुष्करम् ।। २२ ।।

असंशयं महाबाहो !, मनो दुर्निग्रहं चलम् । अभ्यासेन तु कौन्तेय !, वैराग्येण च गृह्यते ।। २३ ।।

असंयताऽऽत्मना योगो, दुष्प्राप इति मे मतिः । वश्याऽऽत्मना तु यतता, शक्योऽवाप्तुमुपायतः ।। २४।।

सदृशप्रत्ययाऽऽवृत्त्या, वैतृष्ण्याद् बहिरर्थतः । एतच्च युज्यते सर्वं, भावनाभाविताऽऽत्मनि ।। २५ ।।

—अध्यात्मसारे, अ. १६।।

C जन्मजरामरणभयैः पीडितमालोक्य विश्वमनगाराः ।

निःसंगत्वं कृत्वा ध्यानार्थं भावनां जग्मुः ।। ५।।

भूतेषु भज समत्वं चिंतय चित्ते निजात्मरूपं च ।

मनसः शुद्धिं कृत्वा भावय चित्तं च भावनया ।। ६।।

भावना द्वादशैतास्ता, अनित्यादिकताः स्मृताः । ज्ञानदर्शनचारित्र्यं वैराग्याद्यास्तथा पराः ।। ७ ।।

भावनास्वासु संलीनं, विधायाध्यात्मिकं स्थिरम् । कर्मपुद्गलजीवानां, स्वरूपं च विचिन्तयेत् ।। १२ ।।

नित्यमाभिर्यदा विश्वं, भावयत्यखिलं मुनिः । विश्वौदासीन्यमापन्न-श्चरत्यत्रैव मुक्तवत् ।। १३।।

चतस्त्रो भावना भाव्या, उक्ता ध्यानस्य सूरिभिः । मैत्र्यादयश्चिरं चित्ते, विधेया धर्मसिद्धये ।। १०७ ।।

—ध्यानदीपिकायाम् ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

साम्प्रतं ज्ञानभावनास्वरूप-गुणदर्शनायेदमाह –

**णाणे णिच्चब्भासो कुणइ मणोधारणं विसुद्धिं च ।**
**नाणगुणमुणियसारो तो झाइ सुनिच्चलमईओ ।।३१।।**

**णाणे० गाहा ।। ज्ञाने** श्रुतज्ञाने **नित्यं** सदा **अभ्यास** आसेवनालक्षणः **करोति** निर्वर्तयति । किम् ? **मनसः** अन्तःकरणस्य चेतस इत्यर्थः, **धारणम्** अशुभव्यापारनिरोधे-नावस्थानमिति भावना तथा **विशुद्धिं च** तत्र विशोधनं विशुद्धिः सूत्रार्थयोरिति गम्यते ताम्, **चशब्दाद्** भवनिर्वेदं च।

---

१ A **अव०** ज्ञानभावनामधिकृत्याह—

**निर्यु०** **तत्तं जीवाजीवा नायव्वा जाणणा इहं दिट्ठा ।**
**इह कज्जकरणकारगसिद्धी इह बंधुमुक्खो य ।। ३३५ ।।**
**बद्धो य बंधहेऊ बंधणबंधप्फलं सुकहियं तु ।**
**संसारपवंचोऽवि य इहयं कहिओ जिणवरेहिं ।। ३३६ ।।**
**नाणं भविस्सई एवमाइया वायणाइयाओ य ।**
**सज्झाए आउत्तो गुरुकुलवासो य इय नाणे ।। ३३७ ।।**

**वृ०** तत्र ज्ञानस्य भावना ज्ञानभावना-एवंभूतं मौनीन्द्रं ज्ञानं प्रवचनं यथाऽवस्थिताशेषपदार्थाविर्भावकमित्येमवंरूपेति, अनया च प्रधानमोक्षाङ्गं सम्यक्त्वमाधिगमिकमाविर्भवति, यतस्तत्त्वार्थश्रद्धानं सम्यग्दर्शनम्, **तत्त्वं** च **जीवाजीवादयो** नव पदार्थाः, ते च तत्त्वज्ञानार्थिना सम्य**ज्ज्ञातव्याः, तत्परिज्ञानमिहै**व आर्हते प्रवचने **दृष्टम्** उपलब्धमिति, त**थेहै**व आर्हते प्रवचने **कार्यं** परमार्थरूपं मोक्षाख्यं तथा **करणं** क्रियासिद्धौ प्रकृष्टोपकारकं सम्यग्दर्शनज्ञानचारित्राणि, **कारकः** साधुः सम्यग्दर्शनाद्यनुष्ठाता, क्रिया**सिद्धिश्च इहै**व मोक्षावाप्तिलक्षणा,तामेव दर्शयति-**बन्धः** कर्मबन्धनं तस्मा**न्मोक्षः** कर्मविचटनलक्षणः, असावपीहैव, नान्यत्र शाक्यादिकप्रवचने भवति, इत्येवं ज्ञानं भावयतो ज्ञानभावना भवतीति ।।३३५।।

तथा **बद्धः** अष्टप्रकारकर्मपुद्गलैः प्रतिप्रदेशमवष्टब्धो जीवः, तथा **बन्धहेतवः** मिथ्यात्वाविरति-प्रमादकषाययोगास्तथा **बन्धनम्** - अष्टप्रकारकर्मवर्गणारूपं **तत्फलं** चतुर्गतिसंसारपर्यटन-सातासाताद्यनुभवनरूपमिति, एतत्सर्वमत्रैव **सुकथितम्**, अन्यद्वा यत्किञ्चित्सुभाषितं तदिहैव प्रवचनेऽभिहितमिति ज्ञानभावना, तथा विचित्र**संसारप्रपञ्चोऽत्रैव जिनेन्द्रैः कथित** इति ।।३३६।।

तथा **ज्ञानं** मम विशिष्टतरं **भविष्यतीति** ज्ञानभावना विधेया, ज्ञानमभ्यसनीयमित्यर्थः, **आदि**ग्रहणादेकाग्र-चित्ततादयो गुणा भवन्तीति, तथैतदपि **ज्ञाने** भावनीयम्, यथा—"जं अन्नाणी कम्मं खवेइ" इत्यादि, तथैभिश्च कारणैर्ज्ञानमभ्यसनीयम्, तद्यथा- ज्ञानसङ्ग्रहार्थं निर्जरार्थम् अव्यवच्छित्त्यर्थं **स्वाध्यायार्थमि**त्यादि, तथा ज्ञानभावनया नित्यं **गुरुकुलवासो** भवति, तथा चोक्तम् –

"णाणस्स होइ भागी थिरयरओ दंसणे चरित्ते य । धन्ना आवकहाए गुरुकुलवासं न मुञ्चन्ति ।। १ ।।", इत्यादिका ज्ञानविषया भावना भवतीति ।। ३३७ ।।

**—आचाराङ्गसूत्रे, चूलिका-३ ।।**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

एवं **ज्ञानगुणमुणितसार** इति ज्ञानेन गुणानां जीवाजीवाश्रितानाम् 'गुण-पर्यायवत् द्रव्यम्' [तत्त्वार्थ, ५/३७] इति वचनात्, पर्यायाणां च तदविनाभाविनाम्, मुणितः-ज्ञातः सारः-परमार्थो येन स तथोच्यते, ज्ञानगुणेन वा ज्ञानमाहात्म्येनेति भावः, ज्ञातः सारो येन, विश्वस्येति गम्यते, स तथाविधः । **ततश्च** पश्चाद् **ध्यायति** चिन्तयति । किंविशिष्टः सन् ? **सुष्ठु** अतिशयेन **निश्चला** निष्प्रकम्पा सम्यग्ज्ञानतोऽन्यथाप्रवृत्तिकम्परहितेति भावः, **मतिः** बुद्धिर्यस्य स तथाविध इति गाथार्थः ।।३१।।

उक्ता **ज्ञानभावना,** साम्प्रतं **दर्शनभावना**स्वरूप-गुणदर्शनार्थमिदमाह –

---

B मू० **उपशान्तक्षीणकषाययोश्च ।। ९-३८ ।।**

वृ० x x x ज्ञाने नित्याभ्यासान्मनसस्तत्रैव प्रणिधानमवगतगुणसारश्च निश्चलमतिरनायासेनैव धर्म्यं ध्यायति । x x x ।। — **तत्त्वार्थ. सिद्ध. वृत्तौ ।।**

C **जिणवयणं पढमं शुद्ध-मऽविकलं सुत्तओ पढेयव्वं । पच्छा सुसाहुपासे, सोयव्वं अत्थओ सम्मं ।।**
**पढिय-सुणियं पि एक्कसि, जत्तेण पुणो पुणो हु पेहेज्जा । आजम्मऽप्पणो तयणु-बंधथिरीकरणहेउ त्ति ।।**
**तं किं पि परमतत्तं, इमं मए पावियं सुपुन्नेहिं । एवं च भावसारं, बहुमन्नेज्जाऽणवज्जं तं ।।**
**भद्दं समंतभद्दस्स, तस्स पायडियसुगइमग्गस्स । जिणवयणस्स भगवओ, भवंति जत्तो गुणा एए ।।**
**आयहियपरिन्ना भाव-संवरो नवनवो य संवेगो । निक्कंपया तवो भाव-णा य परदेसियत्तं च ।।**
**नाणेण सव्वभावा, जीवाऽजीवाऽऽसवाइणो सम्मं । नज्जंति आयहियं, अहियं च भवे इह परे य ।।**
**आयहियमऽयाणंतो, मुज्झइ मूढो समाइयइ पावं । पावनिमित्तं जीवो, भमइ भवसायरमणंतं ।।**
**जाणंतस्सायहियं, अहियनियत्ती य हियपवित्ती य । होइ जओ ता निच्चं, आयहियं आगमेयव्वं ।।**
**सज्झायं कुव्वंतो पंचिंदियसंवुडो तिगुत्तो च । संवरइ असुहभावे, रागद्दोसाऽइए घोरे ।।**
**जह जह सुयमऽवगाहइ, अइसयरसपसरनिब्भरमऽउव्वं । तह तह पल्हाइ मुणी, नवनवसंवेगसद्धाए ।।**
**आयोवायाविहिन्नू, विज्जा तवनाणदंसणचरित्ते । विहरइ विसुद्धलेसो, जावज्जीवं पि निक्कंपो ।।**
**बारसविहम्मि वि तवे, सब्भिन्तरबाहिरे कुसलदिट्ठे । नऽवि अत्थि नऽवि य होही, सज्झायसमं तवोकम्मं ।।**
**सज्झायभावणाए य, भाविया होंति सव्वगुत्तीओ । गुत्तीहिं भावियाहिं, मरणे आराहओ होई ।।**
**आयपरसमुत्तारो, आणावच्छल्ल दीवणा भत्ती ।**
**होई परदेसियत्ते, अव्वेच्छित्ती य तित्थस्स ।।१३३३ - १३४६ ।।**

**—संवेगरङ्गशालायाम् ।।**

D **वाचना पृच्छना साधु-प्रेक्षणं परिवर्तनम् । सद्धर्मदर्शनं चेति, ज्ञातव्या ज्ञानभावना ।। ८ ।।**

**—ध्यानदीपिकायाम् ।।**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

[१]संकाइदोसरहिओ पसम-थेज्जाइगुणगणोवेओ ।
होइ असंमूढमणो दंसणसुद्धीए झाणंमि ।।३२।।

**संकाइ० गाहा ।। शङ्कादिदोषरहित**[a] इति शङ्कनं शङ्का, आदिशब्दात् काङ्क्षादिपरिग्रहः, उक्तं च-"**शङ्का-काङ्क्षा-विचिकित्सा-ऽन्यदृष्टिप्रशंसा-परपाषण्डसंस्तवाः**[卐] **सम्यग्दृष्टेरतिचाराः**" [तत्त्वार्थ, ७/१८] इति, [b]तेषां च स्वरूपं प्रत्याख्यानाध्ययने न्यक्षेण वक्ष्यामः[☆], तत्र शङ्कादय एव सम्यक्त्वाख्यप्रथमगुणातिचारत्वाद् दोषाः शङ्कादिदोषास्तै रहितः-त्यक्तः।

[c]शङ्कादिदोषरहितत्वादेव किम् ? [d]**प्रश्रम-स्थैर्यादिगुणगणोपेतः** तत्र प्रकर्षेण श्रमः प्रश्रमः खेदः, स च स्वपरसमयतत्त्वाधिगमरूपः, स्थैर्यं तु जिनशासने निष्प्रकम्पता, आदिशब्दात्प्रभावनादिपरिग्रहः, उक्तं च –

"स-परसमयकोसल्लं थिरया जिणसासणे पभावणया ।
आययणसेव भत्ती दंसणदीवा गुणा पंच ।।१।।" [ ]

---

☆ परिशिष्ट - १B 卐 श्रीतत्त्वार्थसूत्रमुद्रितप्रतौ x x x प्रशंसा-संस्तवाः x x x इति पाठो दृश्यते ।

[१] A **अव०** – प्रशस्तभावनामाह—

**निर्यु०** **दंसणनाणचरित्ते तववेरग्गे य होइ उ पसत्था ।
जा य जहा ता य तहा लक्खण वुच्छ सलक्खणओ ।। ३२९ ।।**

**वृ०** **दर्शनज्ञानचारित्रतपोवैराग्यादिषु** या यथा च **प्रशस्तभावना भवति** तां प्रत्येकं **लक्षणतो वक्ष्य** इति ।।

**अव०** दर्शनभावनार्थमाह—

**निर्यु०** **तित्थगराण भगवओ पवयणपावयणिअइसइड्ढीणं ।
अभिगमणनमणदरिसणकित्तणसंपूअणाथुणणा ।। ३३०।।**

**वृ०** **तीर्थकृतां भगवतां प्रवचनस्य** द्वादशाङ्गस्य गणिपिटकस्य, तथा **प्रावचनिनाम्** आचार्यादीनां युगप्रधानानाम्, **तथाऽतिशयिनामृद्धिमतां** केवलिमनःपर्यायावधिमच्चतुर्दशपूर्वविदां तथाऽऽमर्षौषध्यादिप्राप्तर्द्धीनां **यदभिगमनं** गत्वा च **दर्शनं** तथा गुणोत्कीर्त्तनं **संपूजनं गन्धादिना** स्तोत्रैः **स्तवनमि**त्यादिका दर्शनभावना, अनया हि दर्शनभावनयाऽनवरतं भाव्यमानया दर्शनशुद्धिर्भवतीति ।।

**अव०** किञ्च –

**निर्यु०** **जम्माभिसेयनिक्खमणचरणनाणुप्पया य निव्वाणे ।
दियलोअभवणमंदरनंदीसरभोमनगरेसुं ।। ३३१ ।।**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

प्रश्रम-स्थैर्यादय एव गुणाः प्रश्रमस्थैर्यादिगुणास्तेषां गणः-समूहस्तेनोपेतो-युक्तो यः स तथाविधः, अथवा प्रशमादिना स्थैर्यादिना च गुणगणेनोपेतः २, तत्र प्रशमादिगुणगणः प्रशम-संवेग-निर्वेदा-ऽनुकम्पा-ऽऽस्तिक्याभिव्यक्तिलक्षणः, स्थैर्यादिस्तु दर्शित एव, य इत्थम्भूतः असौ **भवति असम्मूढमना**स्तत्त्वान्तरेऽभ्रान्तचित्त इत्यर्थः, **दर्शनशुद्ध्या** उक्तलक्षणया हेतुभूतया, क्व ? **ध्यान** इति गाथार्थः ।।३२।।

---

**अट्ठावयमुज्जिंते गयग्गपयए य धम्मचक्के य ।**
**पासरहावत्तनगं चमरुप्पायं च वंदामि ।। ३३२ ।।**

वृ॰ तीर्थकृतां **जन्मभूमिषु** तथा **निष्क्रमणचरणज्ञानोत्पत्तिनिर्वाण**भूमिषु तथा **देवलोकभवनेषु मन्दरेषु** तथा **नन्दीश्वर**द्वीपादौ **भौमेषु** च पातालभवनेषु यानि शाश्वतानि चैत्यानि तानि **वन्दे**ऽहमिति द्वितीयगाथायामन्ते क्रियेति, एव**मष्टापदे,** तथा श्रीम**दुज्जयन्तगिरौ गजाग्रपदे** दशार्णकूटवर्तिनि तथा तक्षशिलायां **धर्मचक्रे** तथा अहिच्छत्रायां **पार्श्व**नाथस्य धरणेन्द्रमहिमास्थाने, एवं **रथावर्त्ते पर्वते** वैरस्वामिना यत्र पादपोपगमनं कृतं यत्र च श्रीमद्वर्द्धमानमाश्रित्य **चमरेन्द्रेणोत्पतनं** कृतम्, एतेषु च स्थानेषु यथासम्भवमभिगमनवन्दनपूजनोत्कीर्त्तनादिकाः क्रियाः कुर्वतो दर्शनशुद्धिर्भवतीति।।

**अव॰** किञ्च–

**निर्यु॰ गणियं निमित्त जुत्ती संदिट्ठी अवितहं इमं नाणं ।**
**इय एगंतमुवगया गुणपच्चइया इमे अत्था ।। ३३३ ।।**
**गुणमाहप्पं इसिनामकित्तणं सुरनरिंदपूया य ।**
**पोराणचेइयाणि य इय एसा दंसणे होइ ।। ३३४ ।।**

वृ॰ प्रवचनविदा**ममी गुणप्रत्ययिका अर्था भवन्ति,** तद्यथा-**गणितविषये** बीजगणितादौ परं पारमुपगतोऽयम्, तथाऽष्टाङ्गस्य **निमित्तस्य** पारगोऽयम्, तथा दृष्टिपातोक्ता नानाविधा **युक्तीः** द्रव्यसंयोगान् हेतून्वा वेत्ति, तथा **सम्यग्** अविपरीता **दृष्टिः** दर्शनमस्य त्रिदशैरपि चालयितुमशक्या तथा**ऽवितथमस्येदं ज्ञानं** यथैवायमाह तत्तथैवेत्येवं प्रवचनिकस्याचार्यादेः प्रशंसां कुर्वतो दर्शनविशुद्धिर्भवतीति, एवमन्यदपि **गुणमाहात्म्यमा**चार्यादेर्वर्णयतस्तथा **पूर्वमहर्षीणां** च **नामोत्कीर्त्तनं** कुर्वतस्तेषामेव च **सुरनरेन्द्रपूजादिकं** कथयतस्तथा **चिरन्तनचैत्यानि** पूजयत **इत्ये**वमादिकां क्रियां कुर्वतस्तद्वासनावासितस्य दर्शनविशुद्धि**र्भवतीत्येषा** प्रशस्ता **दर्शन**विषया भावनेति।।

**–आचाराङ्गसूत्रे, चूलिका-३ ।।**

B मू॰ **उपशान्तक्षीणकषाययोश्च ।। ९-३८।।**

वृ॰ – x x x तथा विगतशङ्कादिशल्यः प्रशम-संवेग-निर्वेदाऽनुकम्पा-ऽऽस्तिक्य-स्थैर्य-प्रभावना-यतना-सेवन-भक्तियुक्तः असम्मूढचेता दर्शनभावनया विमलीकृतमतिरस्खलितमेव धर्मं ध्यायति । x x x ।।

**–तत्वार्थ. सिद्ध. वृत्तौ ।।**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

a

उक्ता **दर्शनभावना,** साम्प्रतं **चारित्रभावना**स्वरूप-गुणप्रदर्शनायेदमाह-

[१] **नवकम्माणायाणं पोराणविणिज्जरं सुभायाणं ।**
**चारित्तभावणाए झाणमयत्तेण य समेइ ।।३३।।**

**नव० गाहा ।। नवकर्मणामनादानम्** इति नवानि उपचीयमानानि प्रत्यग्राणि भण्यन्ते, क्रियन्त इति कर्माणि ज्ञानावरणीयादीनि, तेषामनादानम्- अग्रहणं चारित्रभावनया, समेति-गच्छतीति योगः, तथा **पुराणविनिर्जराम्** चिरन्तनक्षपणामित्यर्थः, तथा **शुभादानम्** इति **शुभं** पुण्यं - सात-सम्यक्त्व-हास्य-रति-पुरुषवेद-शुभायुर्नामगोत्रात्मकम्, तस्याऽऽदानम्-ग्रहणम् । किम् ? **चारित्रभावनया** हेतुभूतया **ध्यानम्, च**शब्दान्नवकर्मानादानादि च, **अयत्नेन** अक्लेशेन **समेति** गच्छति प्राप्नोतीत्यर्थः ।

तत्र चारित्रभावनयेति कोऽर्थः ? 'चर गति-भक्षणयोः' इत्यस्य 'अर्ति-लू-धू-सू-खन-सह-चर इत्रः' [पा.३-२-१८४] इतीत्रन्प्रत्ययान्तस्य चरित्रमिति भवति, चरन्त्यनिन्दितमनेनेति चरित्रं क्षयोपशमरूपम्, तस्य भावश्चारित्रम् ।

एतदुक्तं भवति-इहान्यजन्मोपात्ताष्टविधकर्मसञ्चयापचयाय चरणभावश्चारित्रमिति, सर्व-सावद्ययोगविनिवृत्तिरूपा क्रिया इत्यर्थः, तस्य भावना-अभ्यासश्चारित्रभावनेति गाथार्थः ।।३३।।

---

C **संवेगः प्रशमः स्थैर्य-मसंमूढत्वमस्मयः । आस्तिक्यमनुकम्पेति, ज्ञेया सम्यक्त्वभावना ।। ९ ।।**
**—ध्यानदीपिकायाम् ।।**

[१] A **अव०** चारित्रभावनामधिकृत्याह-

**निर्यु०** **साहुमहिंसाधम्मो सच्चमदत्तविरई य बंभं च ।**
**साहु परिग्गहविरई साहु तवो बारसंगो य ।। ३३८ ।।**

**वृ०** **साधु** शोभनोऽ**हिंसा**दिलक्षणो **धर्म** इति प्रथमव्रतभावना, तथा **सत्यम**स्मिन्नेवार्हते प्रवचने साधु-शोभनं नान्यत्रेति द्वितीयव्रतस्य, तथाऽ**दत्तविरति**श्चात्रैव साध्वीति तृतीयस्य, एवं **ब्रह्मचर्यम**प्यत्रैव नवगुप्तिगुप्तं धार्यत इति, तथा **परिग्रहविरति**श्चेहैव **साध्वी**ति, एवं **द्वादशाङ्गं तप** इहैव शोभनं नान्यत्रेति ।। x x x ।।
**—आचाराङ्गसूत्रे, चूलिका-३ ।।**

B **मू०** **उपशान्तक्षीणकषाययोश्च ।। ९-३८।।**

**वृ०** x x x तथा चरणभावनाधिष्ठितः कर्माण्यपराणि नादत्ते, पुरातननिर्जरणं शुभानि वा सञ्चिनुते । ततश्चायत्नेनैव धर्मध्यायी भवति । ..।।
**—तत्वार्थ. सिद्ध. वृत्तौ ।।**

C **ईर्यादिविषया यत्ना, मनोवाक्कायगुप्तयः । परीषहसहिष्णुत्व-मिति चारित्र्यभावना ।। १० ।।**
**—ध्यानदीपिकायाम् ।।**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

उक्ता **चारित्रभावना**, साम्प्रतं **वैराग्यभावना**स्वरूप- गुणप्रदर्शनार्थमाह -[a]

**सुविदियजगस्सभावो निस्संगो निब्भओ निरासो य ।**

**वेरग्गभावियमणो झाणंमि सुनिच्चलो होइ ।।३४।।**

**सुविदिय० गाहा ।। सुष्ठु** अतीव, **विदितो** ज्ञातो **जगत**श्चराचरस्य, यथोक्तम्- "जगन्ति जङ्गमान्याहुर्जगद् ज्ञेयं चराचरम्" [ ] । स्वो भावः **स्वभावः**-

जन्म मरणाय नियतं बन्धुर्दुःखाय धनमनिर्वृतये ।

तन्नास्ति यन्न विपदे तथापि लोको निरालोकः ।।१।।

इत्यादिलक्षणो येन स तथाविधः, कदाचिदेवम्भूतोऽपि कर्मपरिणतिवशात्ससङ्गो[c] भवत्यत आह-**निःसङ्गो** विषयजस्नेहसङ्गरहितः, एवम्भूतोऽपि च कदाचित्सभयो भवत्यत आह - **निर्भय** इहलोकादिसप्तभयविप्रमुक्तः, कदाचिदेवम्भूतोऽपि विशिष्टपरिणत्यभावात्पर-

---

१. A निर्यु० **वेरग्गमप्पमाओ एग्गत्ता(ग्ग)भावणाय परिसंगं ।**
**इय चरणमुवगयाओ भणिया इत्तो तवो वुच्छं ।। ३३९।।**

वृ० x x x तथा **वैराग्यभावना**-सांसारिकसुखजुगुप्सारूपा, एव**मप्रमादभावना**-मद्यादिप्रमादानां कर्मबन्धोपादानरूपाणामनासेवनरूपा, **तथैकाग्रभावना**-
एक्को मे सासओ अप्पा, णाणदंसणसंजुओ ।
सेसा मे बाहिरा भावा, सव्वे संजोगलक्खणा ।। १ ।।"
इत्यादिका भावनाः (इति प्रकृष्टमृषित्वाङ्गं) **चरणमुपगता**श्चरणाश्रिताः, **इत** ऊर्ध्वं **तपोभावनां वक्ष्ये** अभिधास्य इति ।।

निर्यु० **किह मे हविज्जऽवंझो दिवसो ? किं वा पहू तवं काउं ?**
**को इह दव्वे जोगो खित्ते काले समयभावे ।। ३४० ।।**

वृ० **कथं** केन निर्विकृत्यादिना तपसा **मम दिवसोऽवन्ध्यो भवेत् ? कतरद्वा तपो**ऽहं **विधातुं प्रभुः** शक्तः ? तथा **कतरत्तपः कस्मिन् द्रव्यादौ** मम निर्वहति ? इति भावनीयम्, तत्र **द्रव्ये** उत्सर्गतो वल्लचणकादिके **क्षेत्रे** स्निग्धरूक्षादौ **काले** शीतोष्णादौ **भावे**ऽग्लानोऽहमेवंभूतं तपः कर्त्तुमलम्, इत्येवं द्रव्यादिकं पर्यालोच्य यथाशक्ति तपो विधेयं "शक्तितस्त्यागतपसी" [तत्त्वार्थे अ० ६ सू० २३ दर्शन०] इति वचनादिति ।। किञ्च–

निर्यु० **उच्छाहपालणाए इति (एव) तवे संजमे य संघयणे ।**
**वेरग्गेऽणिच्चाई होइ चरित्ते इहं पगयं ।। ३४१ ।।**

वृ० तथाऽनशनादिके **तपस्य**निगूहितबलवीर्य**णोत्साहः** कर्त्तव्यः, गृहीतस्य च **प्रतिपालनं** कर्त्तव्यमिति, उक्तञ्च-

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

लोकमधिकृत्य साशंसो भवत्यत आह – **निराशंसश्च** इह-परलोकाशंसाविप्रमुक्तः, **च**शब्दात्तथाविधक्रोधादिरहितश्च । य एवंविधो **²वैराग्यभावितमना** भवति स खल्वज्ञानाद्युपद्रवरहितत्वाद् **ध्याने सुनिश्चलो भवती**ति गाथार्थः ।।३४।।

उक्ता **वैराग्यभावना,** मूलद्वारगाथाद्वये ध्यानस्य भावना इति व्याख्यातम् । अधुना **देशद्वार**व्याचिख्यासयाऽऽह –

---

तित्थयरो चउनाणी सुरमहिओ सिज्झिअव्वयधुवम्मि ।
अणिगूहिअबलविरिओ सव्वत्थामेसु उज्जमइ ।। १ ।।
किं पुण अवसेसेहिं दुक्खक्खयकारणा सुविहिएहिं ।
होइ न उज्जमिअव्वं सपच्चवायंमि माणुस्से ? ।।२।।"
इत्येवं तपसि भावना विधेया। एवं **संयमे** इन्द्रियनोइन्द्रियनिग्रहरूपे, तथा **संहनने** वज्रर्षभादिके तपोनिर्वाहनासमर्थे भावना विधेयेति, **वैराग्य**भावना **त्वनित्यत्वादि**भावनारूपा, तदुक्तम्—
"भावयितव्यमनित्यत्व १ मशरणत्वं २ तथैकता ३ ऽन्यत्वे ४ ।
अशुचित्वं ५ संसारः ६ कर्माश्रव ७ संवर ८ विधिश्च ।। १।।
निर्जरण ९ लोकविस्तर १० धर्मस्वाख्याततत्त्वचिन्ता च ११ ।
बोधेः सुदुर्लभत्वं च १२ भावना द्वादश विशुद्धाः ।। २ ।।" इत्यादिका अनेकप्रकारा भावना भवन्तीति... ।।

**—आचाराङ्गसूत्रे, चूलिका-३** ।।

B मू० **उपशान्तक्षीणकषाययोश्च** ।। ९-३८।।
वृ० x x x तथा जगत्कायस्वभावालोचनात् सुविदितजगत्स्वभावो निःसङ्गो निर्भयो विरागो वैराग्ये भावनावष्टब्धचेता लीलयैव धर्मध्यायी भवति । x x x ।। **—तत्त्वार्थ. सिद्ध. वृत्तौ** ।।

C **विषयेष्वनभिष्वङ्गः, कार्यं तत्त्वानुचिन्तनम् । जगत्स्वभावचिन्तेति, वैराग्यस्थैर्यभावना ।। ११** ।।

**—ध्यानदीपिकायाम्** ।।

२ मू० **जगत्कायस्वभावौ च संवेग-वैराग्यार्थम्** ।।७-७।।
भा० **वैराग्यं नाम शरीरभोगसंसारनिर्वेदोपशान्तस्य बाह्याभ्यन्तरेषूपधिष्वनभिष्वङ्ग इति** ।।७।।
वृ० x x x **वैराग्यं नामे**त्यादि । विरागभावो **वैराग्यम्** । **नामे**त्यलङ्कारार्थम् । **शरीरस्य भोगो**ऽभ्यञ्जनोद्वर्तन-स्नानाङ्गरागधूपपुष्पमाल्यालङ्कारविचित्रनिवसनेष्टाहारादिलक्षणः । **संसारश्चा**तुर्गतिकस्ताभ्यां शरीरभोगसंसाराभ्यां **निर्वेदो** निर्विण्णता शरीरभोगसंसारविषयवैमुख्यमुद्वेगस्तस्मान्निर्वेदाल्लब्धोपशमस्य-प्रतनुकषायस्य बहिर्भवो **बाह्यो** वास्तुक्षेत्रादिर्दशविधः पञ्चमव्रते वक्ष्यमाणो रागद्वेषादि**राभ्यन्तरश्च**तुर्दशभेदस्तत्रैव वक्ष्यते । **तेषूपधिष्वनभिष्वङ्गो** मूर्च्छा लोभो गार्ध्यं तदाकारः परिणाम आत्मनः । नाभिष्वङ्गः **अनभिष्वङ्गः** निरपेक्षता तेषु गार्ध्यमिति ।।७।।

**—तत्त्वार्थ. सिद्ध. वृत्तौ**।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

[१] **निच्चं चिय जुवइ-पसू-नपुंसग-कुसीलवज्जियं जइणो ।**
**ठाणं वियणं भणियं विसेसओ झाणकालंमि ।।३५।।**

**निच्चं॰ गाहा ।। नित्यमेव** सर्वकालमेव, न केवलं ध्यानकाल इति । किम् ? **युवति-पशु-नपुंसक-कुशीलपरिवर्जितं यतेः स्थानं विजनं भणितम्** इति । तत्र **युवति**शब्देन मनुष्यस्त्री देवी च परिगृह्यते, **पशु**शब्देन तु तिर्यक्स्त्रीति, **नपुंसकं** प्रतीतम्, कुत्सितं निन्दितं शीलं वृत्तं येषां ते **कुशीलाः,** ते च तथाविधा द्यूतकारादयः, उक्तं च –

"[२]❖ जूइय-र*सोल-मेंठा वट्टा उब्भा☆मगादिणो जे य ।
एए होंति कुसीला वज्जेयव्वा पयत्तेणं ।।१।।' [ ] '

युवतिश्च पशुश्चेत्यादि द्वन्द्वः, युवत्यादिभिः परि-समन्ताद् **वर्जितम्** रहितमिति विग्रहः, **यते**स्तपस्विनः साधोः, 'एकग्रहणे तज्जातीयग्रहणम्' इति साध्व्याश्च योग्यं यतिनपुंसकस्य च । किम् ? **स्थानम्** अवकाशलक्षणम्, तदेव [a]विशिष्यते–युवत्यादिव्यतिरिक्तशेषजनापेक्षया विगतजनं **विजनं भणितम्** उक्तं तीर्थकरैर्गणधरैश्चेदमेवम्भूतं नित्यमेव, अन्यत्र प्रवचनोक्तदोषसम्भवात् । **विशेषतो ध्यानकाल** इत्यपरिणतयोगादिनाऽन्यत्र ध्यानस्याऽऽराधयितुमशक्यत्वादिति गाथार्थः ।।३५।।

---

❖ इयं गाथा CL प्रतिमध्ये गाथाक्रमाङ्क - ३६ स्वरूपेणास्ति । - **सम्पा॰ ।**

* **सोल** इति ठाणापालाः केचन पुनर्मद्यपा वदन्ति । - **ध्यानशतकवृत्ति - विषमपदपर्याये ।।**

☆ **उद्धमिया** इति पारदारिकाः । - **ध्याशतकवृत्ति - विषमपदपर्याये ।।**

[१] A उपादेयं तु प्रशस्तं धर्म-शुक्लध्यानद्वयम् । तत्र पर्वतगुहा-जीर्णोद्यान-शून्यागारादौ मनुष्याद्यापातविकले अवकाशे मनोविक्षेपनिमित्तशून्ये सत्त्वोपघातरहिते उचिते शिलातलादौ यथासमाधानं विहितपर्यङ्कासन ऊर्ध्वस्थानस्थो वा मन्दमन्दप्राणाऽपानप्रचारः– अतिप्राणनिरोधे चेतसो व्याकुलत्वेन एकाग्रतानुपपत्तेः–निरुद्धलोचनादिकरणप्रचारो हृदि ललाटे मस्तके अन्यत्र वा यथापरिचयं मनोवृत्तिं प्रणिधाय मुमुक्षुर्ध्यायेत् प्रशस्तं ध्यानम्।
**–सम्मतिवृत्तौ, का. ३ ।।**

B **स्त्रीपशुक्लीबदुःशील-वर्जितं स्थानमागमे । सदा यतीनामाज्ञप्तं, ध्यानकाले विशेषतः ।। २६।।**
**–अध्यात्मसारे, अ. १६ ।।**

C **सिद्धतीर्थादिके क्षेत्रे, शुभस्थाने निरञ्जने । मनःप्रीतिप्रदे देशे, ध्यानसिद्धिर्भवेन्मुनेः ।। ११४ ।।**
**–ध्यानदीपिकायाम् ।।**

[२] A – **"जूइय-रसोलमिंठा" गाहा** सुगमा, नवरं **सोलाः**-स्थानपालाः, **उद्भ्रामकाः**-पारदारिकाः।
**–आवश्यकटिप्पनके ।।**

B ध्यानशतकार्थलेश-दीपिकाटीकयोः 'रसोल'शब्दं गृहीत्वा इयं गाथा विश्लिष्टा (परिशिष्ट-३) [-सम्पा॰]

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

इत्थं तावदपरिणतयोगादीनां स्थानमुक्तम्, अधुना परिणतयोगादीनधिकृत्य विशेषमाह–

**[१]थिर-कयजोगाणं पुण मुणीण झाणे सुनिच्चलमणाणं ।**
**गामंमि जणाइण्णे सुण्णे रण्णे व ण विसेसो ।।३६।।**

**थिरकय० गाहा ।।** तत्र **स्थिराः** [a]संहनन-मनोधृतिभ्यां बलवन्त उच्यन्ते, **कृता** निर्वर्तिता अभ्यस्ता इति यावत् । के ? युज्यन्त इति **योगा** ज्ञानादिभावनाव्यापाराः सत्त्व-सूत्र-तपःप्रभृतयो वा यैस्ते कृतयोगाः, स्थिराश्च ते कृतयोगाश्चेति विग्रहस्तेषाम् ।

अत्र च स्थिर-कृतयोगयोश्चतुर्भङ्गी भवति । तद्यथा– 'थिरे णामेगे णो कयजोगे' इत्यादि, स्थिरा वा पौनःपुन्यकरणेन परिचिताः कृता योगा यैस्ते तथाविधास्तेषाम् ।

**पुनः**शब्दो विशेषणार्थः । किं विशिनष्टि ? तृतीयभङ्गवतां न शेषाणाम्, स्वभ्यस्तयो[b]गानां वा **मुनीनामि**ति मन्यन्ते जीवादीन् पदार्थानिति मुनयो-विपश्चित्साधवस्तेषां च, तथा **ध्याने** अधिकृत एव धर्मध्याने **सुष्ठु** अतिशयेन **निश्चलं** निष्प्रकम्पं **मनो** येषां ते तथाविधास्तेषाम्, एवंविधानां स्थानं प्रति **ग्रामे जनाकीर्णे शून्येऽरण्ये वा न विशेष** इति तत्र ग्रसति बुद्ध्यादीन् गुणान् गम्यो वा करादीनामिति ग्रामः सन्निवेशविशेषः, इह [c]च 'एकग्रहणे तज्जातीयग्रहणाद्' नगर-खेट-कर्बटादिपरिग्रह इति, जनाकीर्णे-जनाकुले ग्राम एवोद्यानादौ वा, तथा शून्ये तस्मिन्नेवारण्ये वा-कान्तारे वेति, वा विभा[d]षायां न विशेषो-न भेदः, सर्वत्र तुल्यभावत्वात्परिणतत्वात्तेषामिति गाथार्थः ।।३६।।

यतश्चैवम्–

**[a]तो जत्थ समाहाणं [b]होज्ज [c]मणोवायकायजोगाणं ।**
**भूओवरोहरहिओ सो देसो झायमाणस्स ।।३७।।**

**तो जत्थ० गाहा ।।** यत [d]एतदुक्तं **ततस्त**स्मात्कारणाद् **यत्र** ग्रामादौ स्थाने

---

[१] A **स्थिरयोगस्य तु ग्रामे-ऽविशेषा कानने वने ।**
**तेन यत्र समाधानं, स देशो ध्यायतो मतः ।। २७ ।।** —अध्यात्मसारे, अ. १६ ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**समाधानं** स्वास्थ्यं **भवति** जायते, केषामिति ? अत आह - **मनोवाक्कायोगानां** प्राग्निरूपितशब्दार्थानामिति ।

आह – मनोयोगसमाधानमस्तु, वाक्काययोगसमाधानं तत्र क्वोपयुज्यते, न हि तन्मयं ध्यानं भवति ? अत्रोच्यते – तत्समाधानं तावन्मनोयोगोपकारकम्, ध्यानमपि च तदात्मकं भवत्येव । यथोक्तम् –

"एवंविहा गिरा मे वत्तव्वा एरिसी न वत्तव्वा ।
इय वेयालियवक्कस्स भासओ वाइगं झाणं ।।१।। [आव. नि. १४७७] तथा-
सुसमाहियकर-पायस्स अकज्जे कारणंमि जयणाए ।
किरियाकरणं जं तं काइयझाणं भवे जइणो ।।२।।" [ ]

न चात्र समाधानमात्रकारित्वमेव गृह्यते, किन्तु **भूतोपरोधरहितः,** तत्र भूतानि-पृथिव्यादीनि, उपरोधः - तत्सङ्घट्टनादिलक्षणः, तेन रहितः-परित्यक्तो यः 'एकग्रहणे तज्जातीयग्रहणाद्' अनृता-ऽदत्तादान-मैथुन-परिग्रहाद्युपरोधरहितश्च **स देशो ध्यायत-**श्चिन्तयतः, उचित इति शेषः, अयं गाथार्थः ।।३७।।

गतं **देशद्वारम्,** अधुना **कालद्वार**मभिधित्सुराह–

**[१]कालोऽवि सोच्चिय जहिं जोगसमाहाणमुत्तमं लहइ ।**
**न उ दिवस-निसा-वेलाइनियमणं झाइणो भणियं ।।३८।।**

**कालोवि० गाहा** ।। कलनं **कालः** कलासमूहो वा, स चार्द्धतृतीयेषु द्वीप-समुद्रेषु चन्द्र-सूर्यगतिक्रियोपलक्षितो दिवसादिरवसेयः, **अपि**शब्दो देशानियमेन तुल्यत्वसम्भावनार्थः।

---

१ A **यत्र योगसमाधानं, कालोऽपीष्टः स एव हि ।**
**दिनरात्रिक्षणादीनां, ध्यानिनो नियमस्तु न ।। २८ ।।**
**—अध्यात्मसारे, अ. १६ ।।**

B **यत्र काले समाधानं, योगानां योगिनो भवेत् ।**
**ध्यानकालः स विज्ञेयो, दिनादेर्नियमोऽस्ति नः ।। ११५ ।।**
**—ध्यानदीपिकायाम् ।।**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तथा चाह-कालोऽपि **स एव,** ध्यानोचित इति गम्यते, **यत्र** काले **योगसमाधानं** मनोयोगादिस्वास्थ्यम् **उत्तमं** प्रधानं **लभते** प्राप्नोति ।

**न तु** न पुनर्नैव च, तुशब्दस्य पुनःशब्दार्थत्वादेवकारार्थत्वाद्वा । किम् ? **दिवस-निशा-वेलादिनियमनं ध्यायिनो भणितमिति । दिवस-निशे** प्रतीते, **वेला** सामान्यत एव तदेकदेशो मुहूर्तादिः, **आदि**शब्दात्पूर्वाह्णापराह्णादि वा, एत**न्नियमनं** दिवैवेत्यादिलक्षणं **ध्यायिनः** सत्त्वस्य **भणितम्** उक्तं तीर्थंकर-गणधरैर्नैवेति गाथार्थः ।।३८।।

गतं **कालद्वारम्,** साम्प्रत**मासनविशेषद्वार**[a] व्याचिख्यासयाऽऽह –

**ज[१]च्चिय देहावत्था जिया ण झाणोवरोहिणी होइ ।**
**झाइज्जा तदवत्थो ठिओ निसण्णो [b]निवण्णो वा ।।३९।।**

**जच्चिय० गाहा ।।** [c]इह **यैव** या काचिद् **देहावस्था** शरीरावस्था नि[d]षण्णतादिरूपा, किम् ? **जिता** इत्यभ्यस्ता उचिता वा, तथाऽनुष्ठीयमाना **न ध्यानोपरोधिनी भवति** नाधिकृतधर्मध्यानपीडाकरी भवतीत्यर्थः, **ध्यायेत् तदवस्थ** [e]इति तयावस्थया यः स्थितस्तदवस्थः । तामेव विशेषतः प्राह – **स्थितः** कायोत्सर्गेणेषन्नतादिना **निषण्ण** उपविष्टो वीरासनादिना **निर्विण्णः** सन्निविष्टो दण्डायतादिना **वा** विभाषायामिति गाथार्थः ।।३९।।

आह – किं पुनरयं देश-काला-ऽऽसनानामनियम इति ? अत्रोच्यते –

**स[१]व्वासु वट्टमाणा मुणओ जं देस-काल-चेट्ठासु ।**
**वरकेवलाइ[a]लाभं पत्ता बहुसो समियपावा ।।४०।।**

---

[१] A यैवाऽवस्था जिता जातु, न स्याद् ध्यानोपघातिनी ।
तया ध्यायेन्निषण्णो वा, स्थितो वा शयितोऽथवा ।। २९ ।। —अध्यात्मसारे, अ. १६ ।।

B पद्मासनादिना येना-सनेनैव सुखी भवेत् । ध्यानं तेनासनेन स्याद्, ध्यानिनां ध्यानसिद्धये ।। ११६ ।।
पूर्वाभिमुखो ध्यानी, चोत्तराभिमुखोऽथवा । प्रसन्नवदनो धीरो, ध्यानकाले प्रशस्यते ।। ११७ ।।
—ध्यानदीपिकायाम् ।।

(गाथा-४०)

[१] A सर्वासु मुनयो देश-कालावस्थासु केवलम् । प्राप्तस्तन्नियमो नाऽऽसां, नियता योगसुस्थता ।। ३० ।।
—अध्यात्मसारे, अ. १६ ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**तो देस-काल-चेट्ठानियमो झाणस्स[b] नत्थि समयंमि ।**
**जोगाण समाहाणं जह होइ तहा पयइयव्वं ।।४१।।**

**सव्वासु० गाहा ।। सर्वासु** इत्यशेषासु **देश-काल-चेष्टासु** इति योगः, चेष्टा-देहावस्था, किम् ? **वर्तमाना** अवस्थिताः,[c] के ? **मुनयः** प्राग्निरूपितशब्दार्था **यद्** यस्मात्कारणात्, किम् ? **वरः** प्रधानश्चासौ **केवलादिलाभश्च** वरकेवलादिलाभः, तं **प्राप्ता** इति, आदिशब्दान्मनःपर्यायज्ञानादिपरिग्रहः, किं सकृदेव प्राप्ताः ? न, केवलवर्जं **बहुशोऽने-कशः**, किंविशिष्टाः ? **शान्तपापा**स्तत्र पातयति नरकादिष्विति पापम्, शान्तम्-उपशमं नीतं पापं यैस्ते तथाविधा इति गाथार्थः ।।४०।।

**तो देस० गाहा ।।** यस्मादिति पूर्वगाथायामुक्तं तेन सहास्याभिसम्बन्धः, **तस्माद्देश-काल-चेष्टानियमो ध्यानस्य नास्ति** न विद्यते । क्व ? **समये** आगमे, किन्तु **योगानां** मनःप्रभृतीनां **समाधानं** पूर्वोक्तं **यथा भवति तथा** [d]**प्रयतितव्यं** यत्नः कार्य इत्यत्र नियम एवेति गाथार्थः ।।४१।।

गत**मासनद्वारम्,** अधुना**ऽऽलम्बनद्वारा**वयवार्थ[a]प्रतिपादयन्नाह –

**[१]आलंबणाइ[b] वायण-पुच्छण-परियट्टणाऽणुचिंताओ ।**
**सामाइयाइयाइं सद्धम्मावस्सयाइं च ।।४२।।**

---

१ A ×××**धम्मस्स णं झाणस्स चत्तारि आलंबणा पं० तं. वायणा पडिपुच्छणा परियट्टणा अणुप्पेहा... ।।**
**–स्था. सू. २४७, भग. सू. ८०३ औप. सू.-२०, ।।**

**वृ०...** धर्मस्यालम्बनान्युच्यन्ते-धर्म्मध्यानसौधारोहणार्थमालम्ब्यन्त इत्यालम्बनानि वाचनं **वाचना** विनेयाय निर्जरायै सूत्रदानादि, तथा शङ्किते सूत्रादौ शङ्कापनोदाय गुरोः प्रच्छनं **प्रतिप्रच्छना,** प्रतिशब्दस्य धात्वर्थमात्रार्थत्वादिति, तथा पूर्वाधीतस्यैव सूत्रादेरविस्मरणनिर्जरार्थमभ्यासः **परिवर्त्तने**ति, अनुप्रेक्षण**मनुप्रेक्षा** सूत्रार्थानुस्मरणमिति । ××× ।। **–स्थानाङ्गसूत्रवृत्तौ ।।**

B **आलंबणाणि च से चत्तारि,** जथा-विसमसमुत्तरणे वल्लिमादीणि, तंजथा-वायणा पुच्छणा परियट्टणा अणुप्पेहा, धम्मकहा परियट्टणे पडति । एवं विभासेज्जा ।। **–आवश्यकचूर्णौ ।।**

C **वाचना चैव पृच्छा च, परावृत्त्यनुचिन्तने ।**
**क्रिया चाऽऽलम्बनानीह, सद्धर्माऽऽवश्यकानि च ।। ३१ ।। –अध्यात्मसारे, अ. १६ ।।**

D **आलम्बनानि धर्मस्य, वाचनाप्रच्छनादिकः ।**
**स्वाध्यायः पंचधा ज्ञेयो, धर्मानुष्ठानसेवया ।। ११८ ।। –ध्यानदीपिकायाम् ।।**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**आलंबणाइ० गाहा ।।** इह धर्मध्यानारोहणार्थमालम्ब्यन्त इत्यालम्बनानि **वाचना-प्रश्न-परावर्तना-ऽनुचिन्ता** इति । तत्र[२] वाचनं **वाचना** विनेयाय निर्जरायै सूत्रादिदानमित्यर्थः, शङ्किते सूत्रादौ संशयापनोदाय गुरुप्रच्छनं **प्रश्न** इति, **परावर्तनं** तु पूर्वाधीतस्यैव सूत्रादेरविस्मरण-निर्जरानिमित्तमभ्यासकरणमिति, अनुचिन्तनम् **अनुचिन्ता** मनसैवाविस्मरणादिनिमित्तं सूत्रानुस्मरणमित्यर्थः, वाचना च प्रश्नश्चेत्यादि द्वन्द्वः, एतानि च श्रुतधर्मानुगतानि वर्तन्ते, तथा **सामायिकादीनि सद्धर्मावश्यकानि च** इति, अमूनि तु चरणधर्मानुगतानि वर्तन्ते, सामायिकमादौ येषां तानि सामायिकादीनि, **सामायिकं** प्रतीतम्, **आदि**शब्दान्मुख-वस्त्रिकाप्रत्युपेक्षणादिलक्षणसकलचक्रवालसामाचारी परिग्रहो यावत् पुनरपि सामायिकमिति, एतान्येव विधिवदासेव्यमानानि, **सन्ति** शोभनानि, सन्ति च तानि चारित्रधर्मावश्यकानि चेति विग्रहः, **आवश्यकानि** नियमतः करणीयानि, **चः** समुच्चये इति गाथार्थः ।।४२।।

साम्प्रतममीषामेवाऽऽलम्बनत्वे निबन्धनमाह–

**विसमंमि[१] समारोहइ दढदव्वालंबणो जहा पुरिसो ।**
**सुत्ताइकयालंबो तह झाणवरं समारुहइ ।।४३।।**

---

[२] A मू० **वाचना-प्रच्छना-ऽनुप्रेक्षा-ऽऽम्नाय-धर्मोपदेशाः ।।९-२५।।**

भा० **स्वाध्यायः पञ्चविधः । तद्यथा - वाचना, प्रच्छनम्, अनुप्रेक्षा, आम्नायः, धर्मोपदेश इति । तत्र वाचनं शिष्याध्यापनम् । प्रच्छनं ग्रन्थार्थयोः । अनुप्रेक्षा ग्रन्थार्थयोरेव मनसाऽभ्यासः । आम्नायो घोषविशुद्धं परिवर्तनं गुणनम्, रूपादानमित्यर्थः । अर्थोपदेशो व्याख्यानमनुयोगवर्णनं धर्मोपदेश इत्यनर्थान्तरम् ।।२५।।**

वृ० **स्वाध्यायः पञ्चविध इत्यादि । तद्यथे**त्यनेन भेदपञ्चकोपन्यासं सूचयति तत्र वाचनेत्यादि । **शिष्याणामध्यापनं वाचना** कालिकस्योत्कालिकस्य वाऽऽलापकप्रदानम् । **ग्रन्थः सूत्रार्थः** सूत्राभिधेयं तद्विषयं **प्रच्छनम्** । सन्देहे सति **ग्रन्थार्थयोर्मनसाऽभ्यासोऽनुप्रेक्षा** । न तु बहिर्वर्णोच्चारणमनुश्रावणीयम् । **आम्नायो**ऽपि **परिवर्तनम्** उदातादिपरिशुद्धमनुश्रावणीयमभ्यासविशेषः । **गुणनं** सङ्ख्यानं पदाक्षरद्वारेण **रूपादानमे**करूपम् । एका परिपाटी द्वे रूपे त्रीणि रूपाणीत्यादि । **धर्मोपदेशस्तु** सूत्रार्थकथनं व्याख्यानमनुयोगवर्णनमनुयोगद्वारप्रक्रमेण श्रुतचरणधर्मोपदेश इत्यनर्थान्तरमिति ।।२५।।

**–तत्वार्थ. सिद्ध. वृत्तौ ।।**

[१] A **आरोहति दृढद्रव्या-लम्बनो विषमं पदम् । तथाऽऽरोहति सद्ध्यानं, सूत्राद्याऽऽलम्बनाऽऽश्रितः ।। ३२ ।।**
**आलम्बनादरोद्भूत-प्रत्यूहक्षययोगतः । ध्यानाद्यारोहणभ्रंशो, योगिनां नोपजायते ।। ३३ ।।**

**–अध्यात्मसारे, अ. १६ ।।**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**विसमंमि० गाहा ।।** **विषमे** निम्ने-दुःसञ्चरे **समारोहति** सम्यक् परिक्लेशेनोर्ध्वं याति । कः ? **दृढं** बलवद् **द्रव्यं** रज्ज्वाद्य**ालम्बनं** यस्य स तथाविधः, **यथा पुरुषः** पुमान् कश्चित्, **सूत्रादिकृतालम्बनो** वाचनादिकृतालम्बन इत्यर्थः, **तथा** तेनैव प्रकारेण **ध्यानवरं** धर्मध्यानमित्यर्थः, **समारोहती**ति गाथार्थः ।।४३।।

गत**मालम्बनद्वारम्,** अधुना **क्रमद्वारावसरः,** तत्र लाघवार्थं धर्मस्य [a] शुक्लस्य च प्रतिपादयन्नाह-

**[१] झाणप्पडिवत्तिकमो होइ मणोजोगनिग्गहाईओ ।**
**भवकाले केवलिणो [b] सेसस्स जहासमाहीए ।।४४।।**

**झाण० गाहा ।।** **ध्यानं** प्राग्निरूपितशब्दार्थम्, तस्य [c] **प्रतिपत्तेः क्रम** इति समासः, प्रतिपत्तिक्रमः [d] परिपाट्यभिधीयते, स च **भवति मनोयोगनिग्रहादि**स्तत्र प्रथमं मनोयोगनिग्रहः, ततो वाग्योगनिग्रहः, ततः काययोगनिग्रह, इति । किमयं सामान्येन सर्वथैवेत्थम्भूतः क्रमः ? न, किन्तु **भवकाले केवलिनोऽत्र** अत्र भवकालशब्देन मोक्षगमनप्रत्यासन्नोऽन्तर्मुहूर्तप्रमाण एव शैलेश्य[e]वस्थान्तः परिगृह्यते, केवलमस्यास्तीति केवली तस्य, शुक्लध्यान एवायं क्रमः । **शेषस्या**न्यस्य धर्मध्यानप्रतिपत्तुर्योग-कालावाश्रित्य किम् ? **यथासमाधिना** इति यथैव स्वास्थ्यं भवति तथैव प्रतिपत्तिरिति गाथार्थः ।।४४।।

गतं **क्रमद्वारम्,** इदानीं **ध्यातव्य**मुच्यते, तच्चतुर्भेदमाज्ञादिः । उक्तं च-"[१]आज्ञाऽपाय-विपाक-संस्थानविचयाय धर्म्यम्०" इत्यादि, [तत्वार्थ,९/३७] तत्रा**ऽऽद्यभेद**प्रतिपादनायाह-

**☆सुनिउणमणाइणिहणं भूयहियं भूयभावणमणग्घं ।**
**अमियमजियं महत्थं महाणुभावं महाविसयं ।।४५।।**

---

१ A **मनोरोधाऽदिको ध्यान-प्रतिपत्तिक्रमो जिने । शेषेषु तु यथायोगं, समाधानं प्रकीर्तितम् ।। ३४ ।।**
**—अध्यात्मसारे, अ. १६ ।।**

B **ध्यानानुक्रम उक्तः केवलिनां चित्तयोगरोधादि । भवकाले त्वितरेषां यथासमाधिं च विज्ञेयः ।। ११९ ।।**
**—ध्यानदीपिकायाम् ।।**

**(गाथा-४५)**

१ A **आज्ञापायविपाकसंस्थानविचयाय धर्म्य**मिति, विचयः परिचयोऽभ्यास इत्यनर्थान्तरम्, अनन्तरवक्ष्य-माणन्यायेनाज्ञाद्यभ्यासाय प्रवर्त्तमानस्य धर्म्मध्यानं भवतीत्यर्थः । **—आवश्यकटिप्पनके ।।**

☆ **आणाविजयमवाए विवागसंठाणओ वि नायव्वा । एए चत्तारि पया झायव्वा धम्मझाणस्स ।।**
**सुनिउणमणाइ** x x x ।। [ C प्रतौ, **सम्बोधप्रकरणे** ध्यानाधिकारे - गाथा ४५]

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**झाइज्जा निरवज्जं [a]जिणाणआणं जगप्पईवाणं ।**
**अणिउणजणदुण्णेयं नय-भंग-पमाण-गमगहणं[२] ।।४६।।**

**सुनिउण० गाहा ।। झाइज्जा० गाहा ।। सुष्ठु** अतीव, **निपुणा** कुशला सुनिपुणा ताम्, आज्ञामिति योगः, नैपुण्यं पुनः सूक्ष्मद्रव्याद्युपदर्शकत्वात्तथा मत्यादिप्रतिपादकत्वाच्च। उक्तं च –

"सुयनाणंमि नेउण्णं केवले तयणंतरं । अप्पणो सेसगाणं च जम्हा तं [b]परिभावणं ।।१।।"

[ ] इत्यादि, इत्थं सुनिपुणां ध्यायेत् ।

---

२ A मू० **आज्ञा-ऽपाय-विपाक-संस्थानविचयाय धर्ममप्रमत्तसंयतस्य ।। ९-३७ ।।**

भा० **आज्ञाविचयाय अपायविचयाय विपाकविचयाय संस्थानविचयाय च स्मृतिसमन्वाहारो धर्मध्यानम् । तदप्रमत्तसंयतस्य भवति ।। ३७।। किञ्चान्यत्-**

वृ० आज्ञादीनां कृतद्वन्द्वानां विचयशब्देन सह षष्ठीसमासः । **आज्ञादीनां विचयः** पर्यालोचनम् । **विचयशब्दः** प्रत्येकमभिसम्बध्यते । आज्ञाऽपायविपाकसंस्थानविचयशब्दात् तादर्थ्ये चतुर्थी । धर्मशब्दो व्याख्यातः । **अप्रमत्तसंयतस्ये**ति स्वामिनिर्देशः । तत्र**आज्ञा** सर्वज्ञप्रणीत आगमः। तामाज्ञामित्थं विचिनुयात्-पर्यालोचयेत्-पूर्वापरविशुद्धामतिनिपुणामशेषजीवकायहितामनवद्यां महार्थां महानुभावां निपुणजनविज्ञेयां द्रव्यपर्यायप्रपञ्चवतीमनाद्यनिधनां "इच्चेइयं दुवालसंगं गणिपिडगं न कयाइ णासी" इत्यादि [नन्दी सू० ५८] वचनात् । तत्र प्रज्ञायाः परिदुर्बलत्वादुपयुक्तेऽपि सूक्ष्मया शेमुष्या यदि नावैति भूतमर्थं सावरणज्ञानत्वात्। यथोक्तम्–

"नहि नामानाभोग-च्छद्मस्थस्येह कस्यचिन्नास्ति । ज्ञानावरणीयं हि, ज्ञानावरणप्रकृति कर्म ।। १ ।।"

तथाप्येवं विचिन्वतोऽवितथवादिनः क्षीणरागद्वेषमोहाः सर्वज्ञा नान्यथाव्यवस्थितमन्यथा वदन्ति भाषन्ते वाऽनृतकारणाभावात्। अतः सत्यमिदं शासनमनेकदुःखगहनात् संसारसागरादुत्तारकमित्याज्ञायां स्मृति-समन्वाहारः। प्रथमं धर्मध्यानमाज्ञाविचयाख्यम्। **–तत्त्वार्थ. सिद्ध. वृत्तौ ।।**

B अव० अथाऽऽज्ञाध्यानमाह—

**आज्ञां यत्र पुरस्कृत्य सर्वज्ञानामबाधिताम् । तत्त्वतश्चिन्तयेदर्थांस्तदाज्ञाध्यानमुच्यते ।। ८।।**

वृ० **आज्ञा**ऽऽप्तवचनं प्रवचनमिति यावत्, **अबाधितां** प्रमाणान्तरैः परस्परविरोधेन च, **तत्त्वत** इति परमार्थवृत्त्या, **अर्थान्** पदार्थान् जीवादीन् **चिन्तयेत्** ।। ८।।

अव० आज्ञाया अबाधितत्वं भावयति —

**सर्वज्ञवचनं सूक्ष्मं, हन्यते यत्र हेतुभिः । तदाज्ञारूपमादेयं, न मृषाभाषिणो जिनाः ।। ९ ।।**

वृ० स्पष्टः ।। ९ ।।

अत्रान्तरश्लोकाः—

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तथा **अनाद्यनिधनाम्** अनुत्पन्नशाश्वतामित्यर्थः, अनाद्यनिधनत्वं च द्रव्याद्यपेक्षयेति । उक्तं च –

"द्रव्यार्थादेशादित्येषा द्वादशाङ्गी न कदाचिन्नासीत्" [ ] इत्यादि ।

तथा **भूतहिताम्** इति इह भूतशब्देन प्राणिन उच्यन्ते, तेषां हितां-पथ्यामिति भावः, हितत्वं पुनस्तदनुपरोधिनीत्वात्तथा हितकारिणीत्वाच्च । उक्तं च–

"सर्वे जीवा न हन्तव्याः" [ ] इत्यादि, एतत्प्रभावाच्च भूयांसः सिद्धा इति ।

[c]**तथा - भूतभावनाम्** इत्यत्र भूतं-सत्यं भाव्यतेऽनयेति भूतस्य वा भावना भूतभावना, अनेकान्तपरिच्छेदात्मिकेत्यर्थः, भूतानां वा-सत्त्वानां भावना भूतभावना, भावना वासनेत्यनर्थान्तरम् । उक्तं च -

"कूरावि सहावेणं राग-विसवसाणुगावि होऊणं ।
भावियजिणवयणमणा तेलुक्कसुहावहा होंति ।।१।।" [ ]

[d]श्रूयन्ते च – "बहवश्चिलातीपुत्रादय एवंविधा इति "।

---

आज्ञा स्यादाप्तवचनं, सा द्विधैव व्यवस्थिता । आगमः प्रथमा ताव-द्धेतुवादोऽपरा पुनः ।। १ ।।
शब्दादेव पदार्थानां, प्रतिपत्तिकृदागमः । प्रमाणान्तरसंवादा-द्धेतुवादो निगद्यते ।। २ ।।
द्वयोरप्यनयोस्तुल्यं, प्रामाण्यमविगानतः । अदुष्टकारणारब्धं, प्रमाणमिति लक्षणात् ।। ३ ।।
दोषा राग-द्वेष-मोहाः, संभवन्ति न तेऽर्हति । अदुष्टहेतुसंभूतं, तत् प्रमाणं वचोऽर्हताम् ।। ४ ।।
नय-प्रमाणसंसिद्धं, पौर्वापर्याविरोधि च । अप्रतिक्षेप्यमपरै-र्बलिष्ठैरपि शासनैः ।। ५ ।।
अङ्गोपाङ्ग-प्रकीर्णादि-बहुभेदापगाम्बुधिम् । अनेकातिशयप्राज्य-साम्राज्यश्रीविभूषितम् ।। ६ ।।
दुर्लभं दूरभव्यानां, भव्यानां सुलभं भृशम् । गणिपिटकतयोच्चै-र्नित्यं स्तुत्यं नरामरैः ।। ७ ।।
एवमाज्ञां समालम्ब्य, स्याद्वादन्याययोगतः । द्रव्य-पर्यायरूपेण, नित्यानित्येषु वस्तुषु ।। ८ ।।
स्वरूप-पररूपाभ्यां, सदसद्रूपशालिषु । यः स्थिरः प्रत्ययो ध्यानं, तदाज्ञाविचयाह्वयम् ।। ९ ।। ९ ।।

**—योगशास्त्रे, प्र. १० ।।**

C **नयभङ्गप्रमाणाऽऽढ्यां, हेतूदाहरणाऽन्विताम् ।**
**आज्ञां ध्यायेज्जिनेन्द्राणा-मप्रामाण्याऽकलङ्किताम् ।। ३६ ।।**

**—अध्यात्मसारे, अ. १६ ।।**

D **स्वसिद्धान्तप्रसिद्धं यद्, वस्तुतत्त्वं विचार्यते । सर्वज्ञाज्ञानुसारेण, तदाज्ञाविचयो मतः ।। १२१ ।।**
**आज्ञा यत्र पुरस्कृत्य, सर्वज्ञानामबाधिताम् । तत्त्वतश्चिन्तयेदर्था-स्तदाज्ञाध्यानमुच्यते ।। १२२ ।।**

**—ध्यानदीपिकायाम् ।।**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तथा **अनर्घ्याम्** इति सर्वोत्तमत्वादविद्यमानमूल्यामिति भावः । उक्तं च –

"सव्वेऽवि य सिद्धंता सदव्वरयणासया सतेलोक्का ।
जिणवयणस्स भगवओ न मुल्लमित्तं अणग्घेयं[e] ।।१।।" [ ] तथा स्तुतिकारेणाप्युक्तम्–

"कल्पद्रुमः कल्पितमात्रदायी, चिन्तामणिश्चिन्तितमेव दत्ते ।
जिनेन्द्रधर्मातिशयं विचिन्त्य, द्वयेऽपि लोको लघुतामवैति ।।१।। [ ]

इत्यादि, अथवा ऋणघ्नाम्, इत्यत्र ऋणं-कर्म, तद्घ्नामिति, उक्तं च–

"जं अन्नाणी कम्मं खवेइ बहुयाहि वासकोडीहिं ।
तं नाणी तिहिं गुत्तो खवेइ ऊसासमित्तेणं ।।१।।" [ ] इत्यादि।

तथा **अमिताम्** इत्यपरिमिताम्, उक्तं च –

☆"सव्वनदीणं जा होज्ज वालुया सव्वउदहीण जं [f]तोयं ।
[g]तत्तो वि अणंतगुणो अत्थो [h]एगस्स सुत्तस्स ।।१।।" [बृ. क. भा. ११७०] अमृतां वा [i]मृष्टां पथ्यां च, तथा चोक्तम् –

☆"जिणवयणमोदगस्स उ रतिं च दिवा य खज्जमाणस्स ।
तित्तिं बुहो न [j]वच्चति हेउसहस्सोवगूढस्स ।।१।।

☆नर-नरय-तिरिय-सुरगणसंसारियसव्वदुक्खरोगाणं ।
जिणवयणमेगमोसहमपवग्गसुहक्खयफलयं ।।२।।" [ ]

सजीवां वाऽमृतामुपपत्तिक्षमत्वेन सार्थिकामिति भावः, न तु यथा–

"तेषां कटतटभ्रष्टैर्गजानां मदबिन्दुभिः ।
प्रावर्तत नदी घोरा हस्त्यश्वरथवाहिनी ।।१।।" [विशे. स्वो. पृ.१८७] इत्यादिवन्मृतामिति ।

तथा **अजिताम्** इति शेषप्रवचनाज्ञाभिरपराजितामित्यर्थः । उक्तं च–

"जीवाइवत्थुचिंत[k]णकोसल्लगुणेण-ऽणण्णसरिसेणं ।
सेसवयणेहिं अजियं जिणिंदवयणं महाविसयं ।।१।।" [ ]

तथा **महार्थाम्** इति महान्-प्रधानोऽर्थो यस्याः सा तथाविधा ताम्, तत्र पूर्वापराविरोधित्वादनुयोगद्वारात्मकत्वान्नयगर्भत्वाच्च प्रधानाम्, महत्स्थां वा अत्र महान्तः-

☆ **इयं गाथा सम्बोधप्रकरण-ध्यानाधिकारे मूलगाथारूपेणास्ति ।**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सम्यग्दृष्टयो भव्या एवोच्यन्ते, ततश्च महत्सु स्थिता महत्स्था तां च प्रधानसत्त्वस्थितामित्यर्थः, महास्थां वेत्यत्र महा पूजोच्यते, तस्यां स्थिता महास्था ताम्, तथा चोक्तम् –

"सव्वसुरासुर-माणुस-जोइस-वंतरसुपूइयं णाणं ।
जेणेह गणहराणं छुहंति चुण्णे सुरिंदावि ।।१।।" [ ]

तथा **महानुभावाम्** इति तत्र महान्-प्रधानः प्रभूतो वाऽनुभावः-सामर्थ्यादिलक्षणो यस्याः सा तथा ताम्, प्राधान्यं चास्याश्चतुर्दशपूर्वविदः सर्वलब्धिसम्पन्नत्वात्, प्रभूतत्वं च प्रभूतकार्यकरणात्, उक्तं च–"पभू णं चोद्दसपुव्वी घडाओ घडसहस्सं करित्तए" [व्या. प्र. ५/४/२४०] इत्यादि, एवमिहलोके, परत्र तु जघन्यतोऽपि वैमानिकोपपातः, उक्तं च –

"उववाओ लंतगंमि चोद्दसपुव्वीस्स होइ उ जहण्णो ।
उक्कोसो सव्वट्ठे सिद्धिगमो वा अकम्मस्स ।।१।।" [ ]

तथा **महाविषयाम्** इति महद्विषयत्वं तु सकलद्रव्यादिविषयत्वात् । उक्तं च–"दव्वओ सुयनाणी उवउत्ते सव्वदव्वाइं जाणइ" [ ] इत्यादि कृतं विस्तरेणेति गाथार्थः ।।४५।।

**ध्यायेत्** चिन्तयेदिति सर्वपदक्रिया, **निरवद्याम्** इति अवद्यं पापमुच्यते निर्गतमवद्यं यस्याः सा तथा ताम्, अनृतादिद्वात्रिंशद्दोषावद्यरहितत्वात्, क्रियाविशेषणं वा। कथं ध्यायेत् ? **निरवद्यम्** इहलोकाद्याशंसारहितमित्यर्थः । उक्तं च–"नो इहलोगट्ठयाए नो परलोगट्ठयाए नो परपरिभवओ अहं नाणी" [ ] इत्यादिकं निरवद्यं ध्यायेत्, **जिनानां** प्राग्निरूपितशब्दार्थानाम् **आज्ञां** वचनलक्षणां तथाहि - कुशलकर्मण्याज्ञाप्यन्तेऽनया प्राणिन इत्याज्ञा ताम् । किंविशिष्टानां जिनानाम् ? केवलालोकेनाशेषसंशयतिमिरनाशनाज्**जगत्प्रदीपानाम्**इति ।

आज्ञैव विशेष्यते - **अनिपुणजनदुर्ज्ञेयाम्** न निपुणः अनिपुणः-अकुशल इत्यर्थः, जनः-लोकस्तेन दुर्ज्ञेयामिति समासः, दुर्ज्ञेयामिति, दुरवगमाम् ।

तथा **नय-भङ्ग-प्रमाण-गमगहनाम्** इत्यत्र नयाश्च भङ्गाश्च प्रमाणानि च गमाश्चेति विग्रहस्तैर्गहना-गह्वरा ताम्, तत्र नैगमादयो नयास्ते चानेकभेदाः । तथा भङ्गाः क्रम-स्थानभेदभिन्नाः, तत्र क्रमभङ्गा यथा एको जीव एक एवाजीव इत्यादि, स्थापना- ।। ऽ। ऽ। ऽऽ ।। ऽ। ऽ। ऽऽ स्थानभङ्गास्तु यथा प्रियधर्मा नामैकः नो दृढधर्मेत्यादि । तथा प्रमीयते ज्ञेयमेभिरिति प्रमाणानि द्रव्यादीनि, **यथानुयोगद्वारेषु**, गमाः-

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

[❄]**चतुर्विंशतिदण्डकादयः**, कारणवशतो वा किञ्चिद्विसदृशाः सूत्रमार्गा यथा **षड्जीवनिकायादाविति** कृतं विस्तरेणेति गाथार्थः[२] ।।४६।।

ननु या एवंविशेषणविशिष्टा सा बोद्धुमपि न शक्यते मन्दधीभिः, आस्तां तावद्ध्यातुम्, ततश्च यदि कथञ्चिन्नावबुध्यते तत्र का वार्तेत्यत आह –

**तत्थ य मइदोब्बलेणं तव्विहायरियविरहओ [a]वावि ।**
**णेयगहणत्तणेण य णाणावरणोदएणं च ।।४७।।**

**हेऊदाहरणासंभवे य सइ सुट्ठु जं न बुज्झेज्जा ।**
**सव्वण्णुमयमवितहं तहावि तं चिंतए मइमं ।।४८।।**

**तत्थ य० गाहा ।। तत्र** तस्यामाज्ञायाम्, **चशब्दः** प्रस्तुतप्रकरणानुकर्षणार्थः । किम् ? जडतया[b] चलत्वेन वा **मतिदौर्बल्येन**-बुद्धेः सम्यगर्थानवधारणेनेत्यर्थः १। तथा **तद्विधाचार्यविरहतश्चाऽपि** तत्र **तद्विधः** सम्यगविपरीततत्त्वप्रतिपादनकुशलः, आचर्यतेऽसावित्याचार्यः सूत्रार्थावगमार्थं मुमुक्षुभिरासेव्यत इत्यर्थः, तद्विधश्चासावाचार्यश्च तद्विधाचार्यः, **तद्विरहतस्तदभावतश्च, चशब्दः** अबोधे द्वितीयकारणसमुच्चयार्थः, **अपिशब्दः** क्वचिदु[✱]भयवस्तूपपत्तिसम्भावनार्थः २। तथा **ज्ञेयगहनत्वेन च** तत्र ज्ञायत इति **ज्ञेयं** धर्मास्तिकायादि, **तद्गहनत्वेन** [c]तद्गह्वरत्वेन, **चशब्दो**ऽबोध एव तृतीयकारणसमुच्चयार्थः ३। तथा **ज्ञानावरणोदयेन च** तत्र **ज्ञानावरणं** प्रसिद्धम्, **तदुदयेन** तत्काले तद्विपाकेन, **चशब्दश्च**[d]तुर्थकारणसमुच्चयार्थः ४।

अत्राह-ननु ज्ञानावरणोदयादेव मतिदौर्बल्यं तथा तद्विधाचार्यविरहो [e]ज्ञेयगहनप्रतिपत्तिश्च, ततश्च [★]तदभिधाने न युक्तममीषामभिधानमिति ? न, [f]तस्य कार्यस्यैव सङ्क्षेप-विस्तरत उपाधिभेदेनाभिधानादिति गाथार्थः ।।४७।। तथा

**हेऊदाहरणा० गाहा ।।** तत्र [g]हिनोति गमयति जिज्ञासितधर्मविशिष्टानर्थानिति **हेतुः**

---

❄ **चतुर्विंशतिरिति** अनेन 'नेरईया असुराई' इत्यादि गाथा सूचिता । —**ध्यानशतकवृत्ति-विषमपदपर्याये** ।।

✱ **उभयवस्तूपपत्तिरिति** मतिदौर्बल्य-तथाविधाचार्याभावः । —**ध्यानशतकवृत्ति-विषमपदपर्याये** ।।

★ **तदभिधाने** इति ज्ञानावरणस्याभिधाने । —**ध्यानशतकवृत्ति-विषमपदपर्याये** ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

कारको व्यञ्जकश्च, **उदाहरणं** चरित-कल्पितभेदम्, हेतुश्चोदाहरणं च हेतूदाहरणे तयो**रसम्भवः,** कञ्चन पदार्थं प्रति हेतूदाहरणासम्भवात्, तस्मिंश्च, **च**शब्दः पञ्चम-षष्ठकारणसमुच्चयार्थः, ५-६ **सति** विद्यमाने । किम् ? **यत्** वस्तुजातं **न सुष्ठु बुद्ध्येत** नातीवावगच्छेत् **सर्वज्ञमतमवितथं** तथापि तच्चिन्तयेन्मतिमानिति । तत्र सर्वज्ञास्तीर्थकरास्तेषां मतं [h]सर्वज्ञमतं मतं - वचनम् । किम् ? वितथम् अनृतम्, न वितथम् अवितथं सत्यमित्यर्थः, **तथापि** तदबोधकारणे सत्यनवगच्छन्नपि **तन्**मतं वस्तु वा **चिन्तयेत्** पर्यालोचये**न्मतिमान्** बुद्धिमानिति गाथार्थः ।।४८।।

किमित्येतदेवमित्यत आह –

**अणुवकयपराणुग्गहपरायणा जं जिणा जगप्पवरा ।**
**जियराग-दोस-मोहा य णण्णहावादिणो तेणं ।।४९।।**

**अणुवकय० गाहा ।। अनुपकृते** परैरवर्तिते सति, **परानुग्रहपरायणा** धर्मोपदेशा-दिना परानुग्रहोद्युक्ता इति समासः, **यद्** यस्मात् कारणात्, के ? **जिनाः** प्राग्निरूपितशब्दार्थाः, त एव [a]विशिष्यन्ते–**जगत्प्रवराश्च**राचरश्रेष्ठा इत्यर्थः, एवंविधा अपि कदाचिद् रागा-दिभावाद्वि[b]तथवादिनो भवन्त्यत आह – **जिता** निरस्ता **राग-द्वेष-मोहा** यैस्ते तथाविधा[c]:, तत्रा-भिष्वङ्गलक्षणो **रागः,** अप्रीतिलक्षणो **द्वेषः,** अज्ञानलक्षणश्च **मोहः, च**शब्द एतदभावगुण-समुच्चयार्थः, **नान्यथावादिनस्तेन** इति तेन कारणेन ते नान्यथावादिन इति । उक्तं च–

"रागाद्वा [d]द्वेषाद्वा मोहाद्वा वाक्यमुच्यते ह्यनृतम् ।
यस्य तु नैते दौषास्तस्यानृतकारणं किं स्यात् ।।" [ ] इति गाथार्थः ।।४९।।

उक्तस्तावद्ध्यातव्य[a]**प्रथमो भेदः,** अधुना **द्वितीय** [b]उच्यते– तत्र

**राग-द्दोस-कसाया-ऽऽसवादि-किरियासु वट्टमाणाणं ।**
**इह-परलोयावाओ झाइज्जा वज्जपरिवज्जी[१] ।।५०।।**

**राग० गाहा ।। राग-द्वेष-कषाया-ऽऽश्रवादि-क्रियासु** [c]**वर्तमानानामिह-परलोकापायान् ध्यायेत्** ।

---

[१] A मू. आज्ञा-ऽपाय-विपाक x x x संयतस्य ।। ९-३७ ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

यथा **रागादिक्रिया** ऐहिकामुष्मिकविरोधिनी, उक्तं च –

"रागः सम्पद्यमानोऽपि दुःखदो दुष्टगोचरः।
d
महाव्याध्यभिभूताना-मपथ्यान्नाभिलाषवत् ।।१।।" [ ] तथा

"**द्वेषः** सम्पद्यमानोऽपि तापयत्येव देहिनम् ।
कोटरस्थो ज्वलन्नाशु दावानल इव द्रुमम् ।।२।। " [ ] तथा

"*दृष्ट्यादिभेदभिन्नस्य रागस्यामुष्मिकं फलम् ।
दीर्घः संसार एवोक्तः सर्वज्ञैः सर्वदर्शिभिः ।।३।।" [ ] इत्यादि । तथा

---

* **दृष्ट्यादि** इति दर्शनादि । **—ध्यानशतकवृत्ति-विषमपदपर्याये ।।**

वृ० x x x **अपायविचयं** द्वितीयं धर्मध्यानमुच्यते । **अपाया**-विपदः शारीर-मानसानि दुःखानीति पर्यायास्तेषां विचयः- अन्वेषणमिहामुत्र च रागद्वेषाकुलितचेतोवृत्तयः सत्त्वा मूलोत्तरप्रकृतिविभागार्पितजन्म-जरामरणार्णवभ्रमणपरिखेदितान्तरात्मानः सांसारिकसुखप्रपञ्चेष्ववितृप्तमानसाः कायेन्द्रियादिष्वास्रवद्वारप्रवाहेषु वर्तमाना मिथ्यात्वाज्ञानाविरतिपरिणतिभिर्निवृत्ताः । प्रातिपदिकात् तादर्थ्ये चतुर्थीबहुवचनम् । हिंसायै हिंसार्थं हिंसाप्रयोजनं रौद्रं भवति ध्यानम् । एवमनृताय स्तेयाय विषयसंरक्षणाय चेति वाच्यं रौद्रमित्युक्तं निर्वचनं प्राक् । अविरतश्च देशविरतश्च कृतद्वन्द्वौ स्वामिनौ रौद्रध्यानस्य निर्दिष्टौ षष्ठीद्विवचनेन । अविरत-देशविरतयोस्तु रौद्रध्यानमेतावस्य ध्यातारावित्यर्थः । एतदेव भाष्यकारो विवृणोति-हिंसार्थमित्यादिना । स्पष्टमेव तादर्थ्यं दर्शयति। "प्रमत्तयोगात् प्राणव्यपरोपणं हिंसा " [अ० ७, सू० ८] तच्च सत्त्वव्यापादनोद्बन्धपरितापनताडन-करचरण-श्रवणनासिकाऽधरवृषणशिश्नादिच्छेदनस्वभावं हिंसानन्दम् । तत्र स्मृतिसमन्वाहारो रौद्रध्यानम् । ये च जीवव्यापादनोपायाः परस्य च दुःखोत्पादनप्रयोगास्तेषु च स्मृतिसमन्वाहारो **हिंसानन्दमि**ति प्रथमो विकल्पः ।

प्रबलरागद्वेषमोहस्य अनृतप्रयोजनवत् कन्याक्षितिनिक्षेपापलापपिशुनासत्यासद्भूतघाताभिसन्धानप्रवणमसदभि-धानमनृतं तत्परोपघातार्थमनुपरततीव्ररौद्राशयस्य स्मृतेः समन्वाहारः । तत्रैवं दृढप्रणिधान**मनृतानन्दमिति** । **स्तेयार्थं** स्तेयप्रयोजनमधुनोच्यते । तीव्रसङ्क्लेशाध्यवसायस्य ध्यातुः प्रबलीभूतलोभप्रचाराहितसंस्कारस्य अपास्तपरलोकापेक्षस्य परस्वादित्सोरकुशलः स्मृतिसमन्वाहारः । द्रव्यहरणोपाय एव चेतसो निरोधः प्रणिधानमित्यर्थः ।

**विषयसंरक्षणार्थं** चेति चतुर्थो विकल्पः । चशब्दः समुच्चये । विषयपरिपालनप्रयोजनं च भवति रौद्रं ध्यानम् । विषमिव यान्ति विसर्पन्ति परिभुज्यमानाः । पृषोदरादित्वात् संस्कारः । अथवा 'षिञ् बन्धने' [पा० धा० १४७८] भोक्तारं विशेषेण विविधं वा सिन्वन्ति-बध्नन्तीति विषयाः- शब्दादयः । तत्साधनानि च चेतनाचेतनव्यामिश्रवस्तूनि विषयशब्दवाच्यानि । विषीदन्ति वा प्राणिनो येषु परिभुञ्जानास्ते विषयाः। यथोक्तम् [प्रशमरतौ श्लो० १०७]

"यद्यपि निषेव्यमाणा, मनसः परितुष्टिकारका विषयाः ।

"दोसानलसंसत्तो इहलोए चेव दुक्खिओ जीवो।
परलोगंमि य पावो पावइ निरयानलं तत्तो ।।१।।" [ ] इत्यादि । तथा
**कषायाः** क्रोधादयः, e तदपायः f पुनः –
"कोहो पीतीं पणासेति माणो विणयणासणो ।
माया मित्ताणि णासेइ लोभो सव्वविणासणो ।।" [द.वै.८/३८]
"कोहो य माणो य अणिग्गहीया माया य लोहो य पवड्ढमाणा ।
चत्तारि एए कसिणो कसाया सिंचति मूलाइं पुणब्भवस्स ।।१।। " [द.वै. ८/४०]

---

किम्पाकफलादनवद्, भवन्ति पश्चाददतिदुरन्ताः ।।"
विषयाणां च संरक्षणमुक्तं परिग्रहेष्वप्राप्तनष्टेषु काङ्क्षाशोकौ प्राप्तेषु रक्षणमुपभोगे चावितृप्तिः । इत्थं च विषयसंरक्षणाहितक्रौर्यस्य म्लेच्छमलिम्लुचाग्निक्षेत्रमृद्दायादिभ्यः समुदितायुधस्यानायुधस्य वा रक्षतस्तीव्रेण लोभकषायेणानुरक्तचेतसस्तद्गतप्रणिधानस्य तत्रैव स्मृतिसमन्वाहारमाचरतो विषयसंरक्षणानन्दं रौद्रं भवति ध्यानम् । तच्चैतदविरतस्वामिकम् । तौ च पूर्वोक्तलक्षणौ । तयोरेव च भवत्येतत् प्रमत्तसंयतादीनामिति । रौद्रध्यायिनस्तीव्रसंक्लिष्टाः कापोतनीलकृष्णलेश्यास्तिस्रस्तदनुगमाच्च नरकगतिमूलमेतत्। पर्याप्तमादाय कर्मजालं दुरन्तं नरकादिगतिषु दीर्घरात्रमपायैर्युज्यन्ते । केचिदिहापि कृतवैरानुबन्धाः परस्परमाक्रोशवधबन्धाद्यपायभाजो दृश्यन्ते क्लिश्यन्ते इत्यतः प्रत्यवायप्रायेऽस्मिन् संसारेऽत्यन्तोद्वेगाय स्मृतिसमन्वाहारतोऽपायविचयं धर्मध्यानमाविर्भवति । x x x ।। **—तत्वार्थ. सिद्ध. वृत्तौ ।।**

B **अव०** अथापायविचयमाह—
**राग-द्वेष-कषायाद्यै-र्जायमानान् विचिन्तयेत् । यत्रापायांस्तदपाय-विचयध्यानमिष्यते ।। १० ।।**
**वृ०** राग-द्वेषजनितानामपायानां विचयो विचिन्तनं **यत्र तदपायविचयम्** ।। १० ।।
**अव० तस्य फलमाह-**
**ऐहिका-ऽऽमुष्मिकापाय-परिहारपरायणः । ततः प्रतिनिवर्तेत, समन्तात् पापकर्मणः ।।११।।**
**वृ०** स्पष्टः ।। ११ ।।
अत्रान्तरश्लोकाः –
अस्पृष्टजिनमार्गाणा-मविज्ञातपरात्मनाम् । अपरामृष्टायतीना-मपायाः स्युः सहस्रशः ।। १ ।।
मया मोहान्धतमसा, विवशीकृतचेतसा । किं किं नाकारि कलुषं, कस्कोऽपायोऽप्यवापि न ।। २।।
यद्यद् दुःखं नारकेषु, तिर्यक्षु मनुजेषु च । मया प्रापि प्रमादोऽयं, ममैव हि विचेतसः ।। ३ ।।
प्राप्यापि परमां बोधिं, मनोवाक्कायकर्मजैः । दुश्चेष्टितैर्मयैवायं, शिरसि ज्वालितोऽनलः ।। ४ ।।
स्वाधीने मुक्तिमार्गेऽपि, कुमार्गपरिमार्गणैः । अहो आत्मंस्त्वयैवैष, स्वात्माऽपायेषु पातितः ।। ५ ।।
यथा प्राप्तेऽपि सौराज्ये, भिक्षां भ्राम्यति बालिशः । आत्मायत्ते तथा मोक्षे, भवाय भ्रान्तवानसि ।। ६ ।।
इत्यात्मनः परेषां च, ध्यात्वाऽपायपरंपराम् । अपायविचयं ध्यान-मधिकुर्वीत योगवित् ।। ७।। ११।।
**—योगशास्त्रे, प्र. १० ।।**

तथाऽऽ**श्रवाः** कर्मबन्धहेतवो मिथ्यात्वादयः, तदपायः पुनः –

"मिच्छत्तमोहियमई जीवो इहलोग एव दुक्खाइं ।
निरओवमाइं पावो पावइ पसमाइगुणहीणो ।।१।।" [ ] तथा –
"अज्ञानं खलु कष्टं क्रोधादिभ्योऽपि [g]सर्वदोषेभ्यः ।
अर्थं हितमहितं वा न वेत्ति येनावृतो लोकः ।।१।।" [ ] तथा –
"जीवा पाविंति [h]इहं पाणवहादविरईए पावाए ।
नियसुयघायणमाई दोसे जणगरहिए पावा ।।१।। [ ]
परलोगंमिवि एवं आसवकिरियाहि अज्जिए कम्मे ।
जीवाण चिरमवाया निरयाइगई भमंताणं ।।२।।" [ ] इत्यादि ।

**आदिश**ब्दः स्वगतानेकभेदख्यापकः, प्रकृतिस्थित्यनुभावप्रदेशबन्धभेदग्राहक इत्यन्ये, **क्रियासु** कायिक्यादिभेदाः[j] पञ्च, एताः पुनरुत्तरत्र न्यक्षेण वक्ष्यामः[☆], **विपाकः** पुनः –

"किरियासु वट्टमाणा काइगमाईसु दुक्खिया जीवा ।
इह चेव य परलोए संसारपवड्ढया भणिया ।।१।।" [ ]

ततश्चैवं रागादिक्रियासु **वर्तमानानामपायान् ध्यायेत्** । किंविशिष्टः सन्निति ? आह-**वर्ज्यपरिवर्जी** तत्र वर्जनीयं-वर्ज्यम्-अकृत्यं परिगृह्यते, तत्परिवर्जी-अप्रमत्त इति गाथार्थः ।।५०।।

**उक्तः** खलु **द्वितीयो ध्यातव्यभेदः, अधुना तृतीय उच्यते,** तत्र –

**पयइ-ठिइ-पएसा ऽणुभावभिन्नं सुहासुहविहत्तं ।**
**जोगाणुभावजणियं कम्मविवागं विचिंतेज्जा[१] ।।५१।।**

---

C **रागद्वेषकषायादि-पीडितानां जनुष्मताम् । एहिकामुष्मिकाँस्ताँस्तान् नानाऽपायान् विचिन्तयेत् ।। ३७ ।।**
**–अध्यात्मसारे, अ. १६ ।।**

D **अपायविचयं ज्ञेयं, ध्यानं तज्ञ विचक्षणैः । अपायः कर्मणां यत्र, सोऽपायः प्रोच्यते बुधैः ।। १२३ ।।**
**रागद्वेषकषायाश्रवक्रिया-वर्तमानजीवानाम् । इह-परलोकापायानपायभीरुः स्मरेत् साधुः ।। १२४ ।।**
**–ध्यानदीपिकायाम् ।।**

☆ परिशिष्ट - १ C

[१] A मू० आज्ञा-ऽपाय-विपाक-संस्थानविचयाय x x x ।।९-३७।।
वृ० x x x तृतीयं धर्मध्यानं **विपाकविचया**ख्यमुच्यते-विविधो विशिष्टो वा पाको **विपाकः** अनुभावः । अनुभावो रसानुभवः कर्मणां नरक-तिर्यङ्-मनुष्या-ऽमरभवेषु तस्य **विचयः** अनुचिन्तनं मार्गणं तदर्पितचेताः । तत्रैव स्मृति

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**पयइ० गाहा ।। प्रकृति-स्थिति-प्रदेशा-ऽनुभावभिन्नं शुभाशुभविभक्तम्** इति अत्र **प्रकृति**शब्देनाष्टौ कर्मप्रकृतयोऽभिधीयन्ते ज्ञानावरणीयादिभेदा इति, प्रकृतिरंशो भेद इति पर्यायाः । **स्थिति**स्तासामेवावस्थानं जघन्यादिभेदभिन्नम् । **प्रदेश**शब्देन जीवप्रदेश-कर्मपुद्गलसम्बन्धोऽभिधीयते । **अनुभाव**शब्देन तु विपाकः । एते च प्रकृत्यादयः **शुभाशुभभेदभिन्ना** भवन्ति ।

ततश्चैतदुक्तं भवति-प्रकृत्यादिभेदभिन्नं शुभाशुभविभक्तं **योगानुभावजनितं** [a]मनोयोगादिगुणप्रभवं **कर्मविपाकं विचिन्तयेदि**ति [b]गाथाक्षरार्थः ।।५१।।

भावार्थः पुन**र्वृद्धविवरणाद**वसेयः । तच्चेदम्–

इह पयइभिन्नं सुहासुहविहत्तं कम्मविवागं विचिंतेज्जा, तत्थ [c]पयईत्ति कम्मणो भेया अंसा [d]णाणावरणिज्जाइणो अट्ठ, तेहिं भिन्नं विहत्तं सुहं पुण्णं सायाइयं असुहं पावं तेहिं विहत्तं विभिन्नविपाकं जहा कम्मपयडीए तहा विसेसेण [e]चिंतिज्जा ।

किंच– [f]ठिइभिन्नं च सुहासुहविहत्तं कम्मविवागं विचिंतेज्जा-ठिइत्ति तासिं चेव अट्ठण्हं पयडीणं जहण्णमज्झिमुक्कोसा कालावत्था जहा कम्मपयडीए ।

---

समन्वाहृत्य वर्तमानो विपाकविचयाध्यायी भवति । ज्ञानावरादिकमष्टप्रकारं कर्मप्रकृति-स्थित्य-ऽनुभाव-प्रदेशभेदमिष्टानिष्टविपाकपरिणामं जघन्यमध्यमोत्कृष्टस्थितिकं विविधविपाकम् । तद्यथा—ज्ञानावरणाद् दुर्मेधस्तवम् । दर्शनावरणाञ्चक्षुरादिवैकल्यं निद्राद्युद्भवश्च । असद्वेद्याद् दुःखम्, सद्वेद्यात् सुखानुभवः । मोहनीयाद् विपरीतग्राहिता चारित्रविनिवृत्तिश्च । आयुषोऽनेकभवप्रादुर्भावः । नाम्नोऽशुभप्रशस्तदेहादिनिर्वृत्तिः । गोत्रादुच्चनीचकुलोपपत्तिः । अन्तरायादलाभ इति । इत्थं निरुद्धचेतसः कर्मविपाकानुसरण एव स्मृतिसमन्वाहारतो धर्म्यं भवति ध्यानमिति ।। x x x **—तत्वार्थ. सिद्ध. वृत्तौ.** ।।

B. **अव॰** अथ विपाकविचयमाह –

**प्रतिक्षणसमुद्भूतो, यत्र कर्मफलोदयः । चिन्त्यते चित्ररूपः स, विपाकविचयो मतः ।। १२ ।।**

**वृ॰** x x x स्पष्टः ।। १२ ।।

**अव॰** एतदेव भावयति –

**या संपदाऽर्हतो या च, विपदा नारकात्मनः । एकातपत्रता तत्र, पुण्यापुण्यस्य कर्मणः ।। १३ ।।**

**वृ॰** x x x 'आ अर्हतः, आ नारकात्मनः' इति चाभिव्याप्तौ पञ्चमी । शेषं स्पष्टम् ।

अत्रान्तरश्लोकाः-

विपाकः फलमाम्नातः, कर्मणां स शुभाशुभः । द्रव्य-क्षेत्रादिसामग्र्या, चित्ररूपोऽनुभूयते ।। १ ।।

शुभस्तत्राङ्गना-माल्य-खाद्यादिद्रव्यभोगतः । अशुभस्त्वहि-शस्त्रा-ऽग्नि-विषादिभ्योऽनुभूयते ।। २ ।।

क्षेत्रे सौध-विमानोप-वनादौ वसनाच्छुभः । श्मशान-जाङ्गला-ऽरण्य-प्रभृतावशुभः पुनः ।। ३ ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

[२]किंच–[g]पएसभिन्नं शुभाशुभं यावत्-'कृत्वा पूर्वविधानं पदयोस्तावेव पूर्ववद् वर्ग्यौ । वर्ग-घनौ कुर्यातां तृतीय[h]राशेः स्थितं प्राग्वत्' ।।१।। 'कृत्वा विधानम्' इति [i]२५६, अस्य राशेः पूर्वपदस्य घनादि कृत्वा तस्यैव वर्गादि ततः द्वितीयपदस्येदमेव विपरीतं क्रियते, तत एतावेव वर्ग्येते, ततस्तृतीयपदस्य वर्ग-घनौ [j]क्रियेते, एवमनेन क्रमेणायं राशिः १६७७७२१६ चिंतेज्जा, पएसोत्ति जीव-पएसाणं कम्मपएसेहिं सुहुमेहिं एगखेत्तावगाढेहिं पुट्ठो-गाढ-अणंतर-

---

काले त्वशीतलानुष्णे, वसन्तादौ रतेः शुभः । उष्णे शीते ग्रीष्मे हेम-न्तादौ भ्रमणतोऽशुभः ।। ४ ।।
मनःप्रसाद-सन्तोषा-दिभावेषु शुभो भवेत् । क्रोधा-ऽहङ्कार-रौद्रत्वा-दिभावेष्वशुभः पुनः ।। ५ ।।
सुदेवत्व-भोगभूमि-मनुष्यादिभवे शुभः । कुमर्त्य-तिर्यङ्-नरका-दिभवेष्वशुभः पुनः ।। ६ ।।
अपि च–
उदय-क्षय-क्षयोपशमोपशमाः कर्मणां भवन्त्यत्र । द्रव्यं क्षेत्रं कालं भावं च भवं च संप्राप्य ।। ७ ।।
इति द्रव्यादिसामग्री-योगात् कर्माणि देहिनाम् । स्वं स्वं फलं प्रयच्छन्ति, तानि त्वष्टैव तद्यथा ।। ८ ।।
जन्तोः सर्वज्ञरूपस्य, ज्ञानमाव्रियते सदा । येन चक्षुः पटेनेव, ज्ञानावरणकर्म तत् ।। ९ ।।
मति-श्रुता-ऽवधि-मनः-पर्यायाः केवलं तथा । यदाव्रियन्ते ज्ञानानी-त्येतज्ज्ञानावृतेः फलम् ।। १० ।।
पञ्च निद्रा दर्शनानां, चतुष्कस्यावृतिश्च या । दर्शनावरणीयस्य, विपाकः कर्मणः स तु ।। ११ ।।
यथा दिदृक्षुः स्वाम्यत्र, प्रतीहारनिरोधतः । न पश्यति स्वमप्येवं, दर्शनावरणोदयात् ।। १२ ।।
मधुलिप्तासिधाराग्रा-स्वादाभं वेद्यकर्म यत् । सुख-दुःखानुभवन-स्वभावं परिकीर्तितम् ।। १३ ।।
सुरापानसमं प्राज्ञा मोहनीयं प्रचक्षते । यदनेन विमूढात्मा, कृत्याकृत्येषु मुह्यति ।। १४ ।।
तत्रापि दृष्टिमोहाख्यं, मिथ्यादृष्टिविपाककृत् । चारित्रमोहनीयं तु, विरतिप्रतिषेधनम् ।। १५ ।।
नृ-तिर्यङ्-नारका-ऽमर्त्य-भेदादायुश्चतुर्विधम् । स्वस्वजन्मनि जन्तूनां धारकं गुप्तिसन्निभम् ।। १६ ।।
गति-जात्यादिवैचित्र्य-कारि चित्रकरोपमम् । नामकर्म विपाकोऽस्य, शरीरेषु शरीरिणाम् ।। १७ ।।
उच्चैर्नीचैर्भवेद् गोत्रं कर्मोच्चैर्नीचगोत्रकृत् । क्षीरभाण्ड-सुराभाण्डभेदकारिकुलालवत् ।। १८ ।।
दानादिलब्धयो येन, न फलन्ति विबाधिताः । तदन्तरायं कर्म स्याद्, भाण्डागारिकसन्निभम् ।। १९ ।।
इति मूलप्रकृतीनां विपाकास्तान् विचिन्वतः । विपाकविचयं नाम, धर्म्यं ध्यानं प्रवर्तते ।। २० ।। ।। १३ ।।
—योगशास्त्रे, प्र.१० ।।

C **ध्यायेत्कर्मविपाकं च, तं तं योगाऽनुभावजम् । प्रकृत्यादिचतुर्भेदं शुभाऽशुभविभागतः ।। ३८ ।।**
**—अध्यात्मसारे, अ. १६ ।।**

D **चतुर्धा कर्मबन्धेन, शुभेनाप्यशुभेन वा । विपाकः कर्मणां जीवै-र्भुज्यमानो विचिन्त्यते ।। १२५ ।।**
**प्रतिक्षणसमुद्भूतो यत्र कर्मफलोदयः । चिन्त्यते चित्ररूपः स, विपाकविचयो मतः ।। १२६ ।।**
**या संपदाऽर्हतो या च, विपदा नारकात्मनः । एकातपत्रता तत्र, पुण्यापुण्यस्य कर्मणः ।। १२७ ।।**
**—ध्यानदीपिकायाम् ।।**

२ A **किंच-पएसभिन्नं शुभाशुभं यावत्-'कृत्वा पूर्व्वविधानम्**इत्यादि पूर्व्वमहर्षिवचनत्वाद्गम्भीरमिदमस्मादृशामगम्यम्, आम्नायानुसारतस्तु गमनिकामात्रं किञ्चिदुच्यते-इह प्रदेशभिन्नः- शुभाशुभरूपः

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

कर्म्मविपाको भावनीयः, प्रदेशाश्च जीवस्य कर्म्माणवोऽभिधीयन्ते, तैश्च कियद्भिरेकैको जीवप्रदेश आवेष्टितः परिवेष्टित इति चिन्तनीयम्, अयं च प्रदेशबन्धः **कर्म्मप्रकृत्यादिषु** विस्तरेणाभिहितोऽत एव शुभाशुभं यावदित्यत्र शास्त्रकृद् यावच्छब्दं चकार, स चात्र संक्षेपतः कथ्यते-असंख्यातप्रदेशस्यापि जीवस्यासत्कल्पनया किल षट्पञ्चाशदधिके द्वे शते प्रदेशानां स्थाप्येते २५६, अस्य चैतावन्मानस्य राशेर्घनीकृतस्य यदागतं फलं तावत्प्रमाणैः कर्म्मप्रदेशैः किलैते जीवप्रदेशा आवेष्टिताः, बहुत्वप्रदर्शनमात्रं चेदम्, एकैकस्यापि जीवप्रदेशस्यानन्तानन्तकर्म्मवर्गणावेष्टितत्वात्, तत्रास्य कल्पितजीवप्रदेशराशेर्घनीकरणार्थं करणकारिकामाह-'**कृत्वा पूर्वविधान**'**मि**त्यादि अस्याश्चार्थः-

'स्थाप्योऽन्तघनोऽन्त्यकृतिः स्थानाधिक्यं त्रिपूर्व्वगुणिता च ।
आद्यकृतिरन्त्यगुणिता त्रिगुणा च घनस्तथाऽऽद्यस्य ।। १ ।।

एतत्कारिकानुसारतो गणितविधिज्ञेन विज्ञेयः, तत्र **स्थाप्योऽन्त्यघन** इति अन्त्योऽत्र द्विकस्तस्य घनोऽष्टौ ८ स्थाप्यन्ते, **अन्त्यकृतिरि**ति अन्त्यस्य द्विकस्य कृतिः-वर्गश्चत्वारः, **त्रिपूर्व्वगुणिता चे**ति त्रिभिः पूर्वेण च पञ्चकेन गुण्यते जाता षष्टिः, **स्थानाधिक्यमि**ति सा षष्टिः पूर्वस्थापिताष्टकस्याधस्तात्स्थानाधिक्येन स्थाप्यते तद्यथा ८०/६ **आद्यकृति**रिति द्विकापेक्षया आद्यः पञ्चकस्तस्य कृतिः पञ्चविंशतिः, **अन्त्यगुणिते**ति एषा कृतिरन्त्येन द्विकेन गुणिता जाता पञ्चाशत् **त्रिगुणा चे**ति सा त्रिगुणिता जातं सार्द्धशतम्, तच्च स्थानाधिक्येन स्थाप्यते **- ८५०/६/१ घनस्तथाद्यस्ये**ति आद्यः पञ्चकस्तस्य घनः पञ्चविंशत्यधिकं शतं तदपि स्थानाधिक्येन स्थाप्यते तद्यथा - **८५२५/६१** एतावती च प्रक्रिया पूर्वगणितकारसंज्ञया पूर्व्वविधानमित्युच्यते। अत एतावता कृत्वा पूर्वविधानं पदयोरित्येतद्व्याख्यातमवसेयम्, स्थाप्योऽन्तघनो इत्यादि कारिका पुनरादित आवर्त्त्यते, तत्र च, **निर्युक्ते राशिरन्त्यमि**तिवचनादिदानीं पञ्चविंशतेरन्त्यसंज्ञा तस्याश्च घनः किल मीलित एवास्तेऽतः स्थाप्योऽन्त्यघन इत्युल्लङ्घ्यान्त्यकृतिः क्रियते, तत्र जातानि पञ्चविंशत्यधिकानि षट् शतानि, त्रिगुणिते जातानि पञ्चसप्तत्यधिकानि अष्टादशशतानि, पञ्चविंशतेः पूर्व्वः षट्कस्तेन गुणिते जातानि सार्द्धशतद्वयाधिकानि एकादशसहस्राणि स्थानाधिक्येन स्थाप्यन्ते यथा - ८५२५०/६१२५०/१०/१ अनेन चानन्तरविधिना तावैव पूर्व्ववद्वर्ग्यावित्येतद् व्याख्यातम्, तौ द्विकपञ्चकलक्षणौ पदविशेषौ पूर्व्वपूर्व्ववद् वर्ग्यावित्यस्यानुष्ठितत्वादुपलक्षणं चैतत् त्रिगुणषहड्गुणत्वयोरिति, आद्यस्य षट्कस्य कृतिरन्त्यभूतया पञ्चविंशत्या गुणिता त्रिगुणिता च जातानि शतानि सप्तविंशतिः पूर्व्वराशौ स्थानाधिक्येन स्थाप्यते, तद्यथा– ८५२५००/६१२५०/११२७/१ आद्यस्य षट्कस्य घने जातं शतद्वयं षोडशाधिकं स्थानाधिक्येन पूर्व्वराशौ क्षिप्यते तद्यथा– ८५२५२१६/६१२५०/११२७/१ अनेन च वर्गघनौ कुर्वतां तृतीयराशेः षट्कलक्षणस्येत्येतद् व्याख्यातम्, ननु यथा षट्कस्य वर्ग्गो विहितस्तथा पञ्चविंशत्या त्रिभिश्च गुणितस्तत्कथं लभ्यते ? इत्याह– **ततः प्राग्वदि**ति यदनुक्तं तत् पूर्व्ववत् सर्व्वं विधेयमिति भावः, अस्मिँश्च राशौ मीलिते आगतं १६७७७२१६। एतामेव कारिकां वृत्तिकृद् व्याचष्टे–**कृत्वा विधानमि**त्यादि, **पूर्वपदस्य घनादि** इत्यादि पूर्व्वपदस्य द्विकलक्षणस्य घनो विधेयः, आदिशब्दादवन्यादौ स्थापनं च कृत्वा तस्यैव द्विकलक्षणस्य पदस्य वर्ग्गः, आदिशब्दात् त्रिगुणकरणादिपरिग्रहः ततो द्वितीयस्य पदस्य पञ्चकलक्षणस्येदमेव यद् द्विकस्य कृतं तद्विपरीतं क्रियते, एतदुक्तं भवति-द्विकस्य प्रथमं घनादि कृतम्, ततो वर्ग्गादि पञ्चकस्य तु प्रथमं वर्ग्गादि ततो घनादि क्रियते, एतच्च सर्व्वं कृतमेव भावनीयम्, तदेतावता कृत्वा पूर्व्वविधानमिति व्याख्यातम्, साम्प्रतं **तावेव पूर्व्ववद्वर्ग्यावे**तद् व्याचष्टे–एतावेव द्विकपञ्चकौ वर्ग्येते इति वर्ग्गघनौ कुर्यातामित्यादि

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अणु-बायर-उद्धाइभेएहिं बद्धाणं वित्थरओ य कम्मपयडीए भणियाणं कम्मविवागं विचिंतेज्जा ।

किंच – अणुभावभिन्नं सुहासुहविहत्तं कम्मविवागं विचिंतेज्जा, तत्थ अणुभावोत्ति तासिं चेवऽट्ठण्हं पयडीणं पुट्ठ-बद्ध-निकाइयाणं उदयाउ अणुभवणं, तं च कम्मविवागं जोगाणुभावजणियं विचिंतेज्जा, तत्थ जोगा मण-वयण-काया, अणुभावो-जीवगुण एव, स च मिथ्यादर्शनाविरति-प्रमाद-कषायाः, तेहिं अणुभावेण य जणियमुप्पाइयं जीवस्स कम्मं जं तस्स विवागं उदयं विचिंतिज्जइ ।

उक्तस्**तृतीयो ध्यातव्यभेदः**, साम्प्रतं **चतुर्थ** उच्यते, तत्र-

**[1]जिणदेसियाइं लक्खण-संठाणाऽऽसण-विहाण-माणाइं ।**
**उप्पायट्ठिइभंगाइपज्जवा जे य दव्वाणं ।।५२।।**

**जिण० गाहा ।। जिनाः** प्राग्निरूपितशब्दार्थाः तीर्थकराः, तै**र्देशितानि** कथितानि

---

व्याख्यानयति, ततः षट्कलक्षणस्य तृतीयपदस्येत्यादि, एतच्च सर्व्वं केषुचित्पुस्तकेषु न दृश्यते तेषु च दुरवगमत्वेनोत्सारितमिति लक्ष्यते बहुष्वादर्शेषु दर्शनादित्यलं प्रसङ्गेनेति । **—आवश्यकटिप्पनके ।।**

[1] A **मू०** **आज्ञा-ऽपाय-विपाक-संस्थानविचयाय** x x x ।। ९-३७ ।।

**वृ०** x x x **संस्थानविचयं** नाम चतुर्थं धर्मध्यानमुच्यते—**संस्थानम्**-आकारविशेषो लोकस्य द्रव्याणां च । लोकस्य तावत् तत्राधोमुखमल्लकसंस्थानं वर्णयन्त्यधोलोकं स्थालमिव च तिर्यग्लोक-मूर्ध्वमधोमल्लकसमुद्गम्। तत्रापि तिर्यग्लोको ज्योतिर्व्यन्तराकुलः। असङ्ख्येया द्वीप-समुद्रा वलयाकृतयो धर्मा-ऽधर्मा-ऽऽकाश-पुद्गल-जीवास्तिकायात्मका अनादिनिधनसन्निवेशभाजो व्योम-प्रतिष्ठाः क्षितिवलयद्वीप-सागरनरकविमानभवनादिसंस्थानानि च । तथाऽऽत्मानमुपयोगलक्षणमनादिनिधनमर्थान्तरभूतं शरीराद्, अरूपं कर्तारमुपभोक्तारं च स्वकृतकर्मणः शरीराकारम्, मुक्तौ विभागहीनाकारम् । ऊर्ध्वलोको द्वादशकल्पा असकलसकलनिशाकरमण्डलाकृतयो नव ग्रैवेयकाणि पञ्च महाविमानानि मुक्ताधिवासश्च । अधोलोकोऽपि भवनवासिदेवा नारकाधिवसतिः। धर्माऽधर्मावपि लोकाकारौ गतिस्थितिहेतू, आकाशमवगाहलक्षणम्, पुद्गलद्रव्यं शरीरादिकार्यम्, इत्थं संस्थानस्वाभाव्यान्वेषणार्थं स्मृतिसमन्वाहारो धर्मध्यानमुच्यते । पदार्थस्वरूपपरिज्ञानं तत्त्वावबोधस्तत्वावबोधाच्च क्रियानुष्ठानं तदनुष्ठानान्मोक्षावाप्ति-रिति । x x x — **तत्वार्थ. सिद्ध. वृत्तौ ।।**

B **अव०** अथ संस्थानविचयमाह–

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

जिनदेशितानि, कान्यत आह-**लक्षण-संस्थानाऽऽसन-विधान-मानानि**, किम् ? विचिन्तयेदिति पर्यन्ते वक्ष्यति षष्ठ्यां गाथायामिति । तत्र लक्षणादीनि विचिन्तयेत्, अत्रापि गाथान्ते द्रव्याणामित्युक्तं तत्प्रतिपदमायोजनीयमिति।

तत्र **लक्षणं** धर्मास्तिकायादिद्रव्याणां गत्यादि। तथा [२]**संस्थानं** मुख्यवृत्त्या पुद्गलरचनाकारलक्षणं परिमण्डलाद्यजीवानाम्, यथोक्तम् – "परिमंडले य वट्टे तंसे चउरंस आयते चेव" [ ] । जीवशरीराणां च समचतुरस्रादि ।

यथोक्तम् –

---

**अनाद्यन्तस्य लोकस्य, स्थित्युत्पत्तिव्ययात्मनः। आकृतिं चिन्तयेद्यत्र, संस्थानविचयः स तु ।।१४।।**

**वृ०** **लोक**शब्देन लोकस्तद्गतानि च क्षित्यादीनि द्रव्याणि परिगृह्यन्ते । शेषं स्पष्टम् ।। १४।।

**अव०** लोकध्यानस्य फलमाह–

**नानाद्रव्यगतानन्त-पर्यायपरिवर्तने । सदा सक्तं मनो नैव, रागाद्याकुलतां व्रजेत् ।। १५ ।।**

**वृ०** स्पष्टः । अत्रान्तरश्लोकाः–

संस्थानविचयो लोक-भावनायां प्रपञ्चितः । तन्नेह वर्ण्यते भूयः, पुनरुक्तत्वभीरुभिः ।। १ ।।

अथ लोकभावनायाः, संस्थानविचयस्य च । को नाम भेदो येनोभौ, विभिन्नौ परिकीर्तितौ ।। २ ।।

उक्तमेतद्यथा चिन्ता-मात्रकं लोकभावना । स्थिरा तु लोकादिमतिः, संस्थानध्यानमुच्यते ।। ३ ।। १५।।

**—योगशास्त्रे, प्र. १० ।।**

C **उत्पादस्थितिभङ्गादि-पर्यायैर्लक्षणैः पृथक् ।**
**भेदैर्नामादिभिर्लोक-संस्थानं चिन्तयेद्भृतम् ।। ३९ ।।** **—अध्यात्मसारे, अ. १६ ।।**

D **अनन्तानन्तमाकाशं, सर्वतः सुप्रतिष्ठितम् । तन्मध्ये यः स्थितो लोको, नित्यो दृष्टो जिनौत्तमैः ।। १२८ ।।**
**स्थित्युत्पत्तिव्ययोपेतैः, पदार्थैश्चेतनेतरैः । सम्पूर्णोऽनादिसंसिद्धः, स्थितं यत्र जगत्त्रयम् ।। १२९ ।।**

**—ध्यानदीपिकायाम् ।।**

[२] A **संस्थानं मुख्यवृत्त्या पुद्गलरचनाकारलक्षण**मित्यादि, एतदुक्तं भवति-मुख्यवृत्त्या तावत्परिमण्डलसमचतुरस्राद्येव रूपिद्रव्यसम्बन्धि संस्थानमुच्यते, धर्माधर्माकाशानां त्वमूर्त्तत्वेन मुख्यवृत्त्या न सम्भवत्येव संस्थानम्, किन्तु लोकेन सर्व्वतोऽवच्छिन्नं सदुपचारतस्तु प्रतिष्ठकाद्याकारं लोकक्षेत्रमुच्यते धर्म्माधर्म्मयोरपि तद्वृत्तित्वात् तन्निबन्धन एवोपचारतः संस्थानव्यवहारः अत एवाह–

**—आवश्यकटिप्पनके ।।**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

"समचउरंसे नग्गोहमंडले साइ वामणे खुज्जे ।
हुंडेवि य संठाणे जीवाणं छ मुणेयव्वा ।।१।। " [ ]

तथा [३]धर्माधर्मयोरपि लोकक्षेत्रापेक्षया भावनीयमिति , उक्तं च–

"[४]हेट्ठा मज्झे उवरि छव्वी-झल्लरि-मुइंगसंठाणे ।
लोगो अद्धागारो 卐अद्धाखे[b]त्तागई णेओ ।।१।। " [ ]

तथाऽऽ**सनानि** आधारलक्षणानि धर्मास्तिकायादीनां लोकाकाशादीनि स्वस्वरूपाणि वा । तथा **विधानानि** धर्मास्तिकायादीनामेव भेदानित्यर्थः, यथा – "धम्मत्थिकाए धम्मत्थिकायस्स देसे धम्म[d]त्थिकायस्स [c]पएसे" [अनु.चू.पृ.१९९] इत्यादि । तथा **मानानि**-प्रमाणानि धर्मास्तिकायादीनामेवात्मीयात्मीयानि। **तथोत्पाद-स्थिति-भङ्गादिपर्याया ये च द्रव्याणां** धर्मास्तिकायादीनां तान् विचिन्तयेदिति, तत्रोत्पादादिपर्यायसिद्धिः "उत्पाद-व्यय-ध्रौव्ययुक्तं सत्" **[**तत्वार्थ, ५/२९**]** इति वचनात्, युक्तिः पुनरत्र –

"घट-मौलिसुवर्णार्थी [e]नाशोत्पाद-स्थितिष्वयम् ।
शोक-प्रमोद-माध्यस्थ्यं जनो याति सहेतुकम् ।।१।।

पयोव्रतो न दद्ध्यत्ति न पयोऽत्ति दधिव्रतः ।
अगोरसव्रतो नोभे तस्मात्तत्त्वं त्रयात्मकम् ।।२।। **[**आप्तमी.का.६०**]**

ततश्च धर्मास्तिकायो विवक्षितसमयसम्बन्धरूपापेक्षयोत्पद्यते, तदनन्तरातीतसमय-सम्बन्धरूपापेक्षया तु विनश्यति, धर्मास्तिकायो द्रव्यात्मना तु नित्य इति । उक्तं च –

---

卐 **अद्धाखेत्त** इति मनुष्यक्षेत्रम् । **–ध्यानशतकवृत्ति-विषयमपदपर्याये** ।।

[३] **धर्म्माधर्म्मयोरपि लोकक्षेत्रे**त्यादि, ननु लोकक्षेत्रस्यैव किं संस्थानमित्याह- **–आवश्यकटिप्पनके** ।।

[४] **'हिट्ठा मज्झे' गाहा व्याख्या**-अधस्तान्मध्ये उपरि च यथासंख्यं छव्विझल्लरिमृदङ्गसंस्थानो लोकोऽवसेयः। तत्र छव्वी-नाम विस्तीर्ण्णा पुष्पचङ्गेरी तदाकारोऽधोलोकः, तिर्यग्लोको झल्लर्याकारः, ऊर्ध्वलोकस्तु मृदङ्गाकार इति, नन्ववगतमुक्तक्रमेण धर्म्माधर्म्माकाशजीवपुद्गलानां संस्थानम्, अथ कालस्य किं संस्थानमित्याह-**अद्धागारो अद्धाखित्तागिती नेतो** त्ति अद्धायाः- कालस्याकारोऽद्धाक्षेत्रं-मनुष्यक्षेत्रं तदाकृतिर्ज्ञेयः,सूर्यक्रियाभिव्यङ्ग्यो हि कालः किल मनुजक्षेत्र एव वर्त्तते, अतो य एव तस्याकारः स एव कालस्याप्युपचारतो विज्ञेय इति गाथार्थः । **–आवश्यकटिप्पनके** ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सर्वव्यक्तिषु नियतं क्षणे क्षणेऽन्यत्वमथ च न विशेषः।
सत्योश्चित्यपचित्यो-राकृतिजातिव्यवस्थानात्।।१।।"[तत्वार्थभाष्य, ५/२९]

आदिशब्दादगुरुलघ्वादिपर्यायपरिग्रहः, **चशब्दः** समुच्चयार्थ इति गाथार्थः ।।५२।।

किञ्च –

**पंचत्थिकायमइयं लोगमणाइणिहणं जिणक्खायं ।**
**णामाइभेयविहियं तिविहमहोलोयभेयाइं ।।५३।।**

**पंचत्थिकाय० गाहा ।। पञ्चास्तिकायमयं लोकमनाद्यनिधनं जिनाख्यातम्** इति, क्रिया पूर्ववत् । तत्र**ास्तयः** प्रदेशास्तेषां **काया** अस्तिकायाः, **पञ्च** च ते अस्तिकायश्चेति विग्रहः, एते च धर्मास्तिकायादयो गत्याद्युपग्रहकरा ज्ञेया इति । उक्तं च –

"जीवानां पुद्गलानां च, गत्युपग्रहकारणम् ।
धर्मास्तिकायो ज्ञानस्य, दीपश्चक्षुष्मतो यथा ।।१।।

जीवानां पुद्गलानां च, स्थित्युपग्रहकारणम् ।
अधर्मः पुरुषस्येव, तिष्ठासोरवनिः[a] समा ।।२।।

जीवानां पुद्गलानां च, धर्माधर्मास्तिकाययोः ।
बदराणां घटो यद्वदाकाशमवकाशदम् ।।३।।

ज्ञानात्मा सर्वभावज्ञो, भोक्ता कर्ता च कर्मणाम् ।
नानासंसारि-मुक्ताख्यो, जीवः प्रोक्तो जिनागमे ।।४।।

स्पर्श-रस-गन्ध-वर्ण-शब्द-मूर्तस्वभावकाः[b] ।
सङ्घात-भेदनिष्पन्नाः, पुद्गला जिनदेशिताः ।।५।। "[ ]

**तन्मयं** तदात्मकम्, कम्[c] ? लोक्यत इति **लोकस्तम्**, कालतः किम्भूतमित्यत आह – **अनाद्यनिधनम्** अनाद्यपर्यवसितमित्यर्थः, अनेनेश्वरादिकृतव्यवच्छेदमाह, असावपि दर्शनभेदाच्चित्र एवेत्यत आह – **जिनाख्यातं** तीर्थंकरप्रणीतम् ।

आह – जिनदेशितान् इत्यस्माज्जिनप्रणीताधिकारोऽनुवर्तत एव, ततश्च जिनाख्यात-

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

मित्यतिरिच्यते ? न, अस्याऽऽदरख्यापनार्थत्वात्, आदरख्यापनादौ च पुनरुक्तदोषानुपपत्तेः । तथा चोक्तम् –

"अनुवादादरवीप्साभृशार्थ-विनियोगहेत्वसूयासु ।
ईषत्सम्भ्रमविस्मयगणनास्मरणेष्वपुनरुक्तम् ।।१।।"[द.वै.चूर्णि.अ.१०]

[d] तथा **नामादिभेदविहितं** भेदतो नामादिभेदावस्थापितमित्यर्थः । उक्तं च –

☆"नामं ठवणा दविए खित्ते काले [e] भवे य भावे य ।
पज्जवलोगो य तहा अट्ठविहो [f] लोगनिक्खेवो ।।१।।" [आव.नि.१०५७]

भावार्थश्चतुर्विंशतिस्तवविवरणादवसेयः, साम्प्रतं क्षेत्रलोकमधिकृत्याह – **त्रिविधं** त्रिप्रकारम् **अधोलोकभेदादि**[g] इति प्राकृतशैल्याऽधोलोकादिभेदम्, आदिशब्दात्तिर्यगूर्ध्वलोकपरिग्रह इति गाथार्थः ।।५३।।

किञ्च, तस्मिन्नेव क्षेत्रलोक इदं चेदं च विचिन्तयेदिति प्रतिपादयन्नाह-

**खिइ-वलय-दीव-सागर-नरय-विमाण-भवणाइसंठाणं ।**
**वोमाइपइट्ठाणं निययं लोगट्ठिइविहाणं ।।५४।।**

**खिइ० गाहा ।। क्षिति-वलय-द्वीप-सागर-निरय-विमान-भवनादिसंस्थानं** तत्र **क्षितयः** खलु घर्माद्या ईषत्प्राग्भारावसाना अष्टौ भूमयः परिगृह्यन्ते, **वलयानि** घनोदधि-घनवात-तनुवातात्मकानि घर्मादिसप्तपृथिवीपरिक्षेपीण्येकविंशतिः, **द्वीपा**[a] जम्बूद्वीपादयः स्वयम्भूरमणद्वीपान्ता असंख्येयाः, **सागरा** लवणसागरादयः स्वयम्भूरमणसमुद्रपर्यन्ता असंख्येया एव, **निरयाः** सीमन्तकाद्या अप्रतिष्ठानावसानाः संख्येयाः, यत उक्तम् –

"तीसा य पन्नवीसा पनर[b]स दसेव सयसहस्साइं ।
तिन्नेगं पंचूणं पंच य निरया जहाकमसो ।।१।।" [ ]

**विमानानि** ज्योतिष्कादिसम्बन्धीन्यनुत्तरविमानान्तान्यसंख्येयानि, ज्योतिष्कविमानानामसंख्येयत्वात्, **भवनानि** भवनवास्यालयलक्षणानि असुरादिदशनिकायसम्बन्धीनि [c] संख्येयानि, उक्तं च –

☆ परिशिष्ट - १D

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

"सत्तेव य कोडीओ हवंति बावत्तरिं सयसहस्सा ।
[d] भवणसमासो एसो भवणवईणं वियाणेज्जा ।।१।। " [ ]

आदिशब्दादसंख्येयव्यन्तरनगरपरिग्रहः, उक्तं च –

"हेट्ठोवरिजोयणसयरहिए रयणाए जोयणसहस्से ।
पढमे वंतरियाणं भोमा नयरा असंखेज्जा ।।१।।" [ ]

ततश्च क्षितयश्च वलयानि चेत्यादिद्वन्द्वः, एतेषां **संस्थानम्** आकारविशेषलक्षणं विचिन्तयेदिति, तथा **व्योमादिप्रतिष्ठानम्** इत्यत्र प्रतिष्ठितिः प्रतिष्ठानम्, भावे ल्युट्, **व्योम** आकाशम्, **आदि**शब्दाद्वाय्वादिपरिग्रहः, व्योमादौ प्रतिष्ठानमस्येति व्योमादिप्रतिष्ठानम् लोकस्थितिविधानमिति योगः, विधिः विधानं प्रकार इत्यर्थः, लोकस्य स्थितिः **लोकस्थितिः,** स्थितिः व्यवस्था मर्यादा इत्यनर्थान्तरम्, **तद्विधानम्,** किम्भूतम् ? **नियतम्** नित्यं-शाश्वतम्, क्रिया पूर्ववदिति गाथार्थः ।।५४।।

किञ्च –

**[१] उवओगलक्खणमणाइनिहणमत्थंतरं सरीराओ ।**
**जीवमरूविं कारिं [a] भोइं च सयस्स कम्मस्स ।।५५।।**

**उवउ० गाहा** ।। उपयुज्यतेऽनेनेत्यु**पयोगः** साकारानाकारादिः, उक्तं च-"स द्विविधोऽष्ट-चतुर्भेदः" [तत्त्वार्थ, २/९], स एव **लक्षणं** यस्य स उपयोगलक्षणस्तम्, जीवमिति वक्ष्यति, तथा **अनाद्यनिधनम्** अनाद्यपर्यवसितम्, भवापवर्गप्रवाहापेक्षया नित्यमित्यर्थः, तथा **अर्थान्तरम्** पृथग्भूतम्, कुतः ? **शरीरात्,** जातावेकवचनम् शरीरेभ्यः औदारिकादिभ्य इति, [b] कमित्यत आह-जीवति जीविष्यति जीवितवान् वा **जीव** इति तम्, किम्भूतमित्यत आह - **अरूपिणम्** अमूर्तमित्यर्थः, तथा **कर्तारम्** निर्वर्तकम्, कर्मण इति गम्यते, तथा **भोक्तारम्** उपभोक्तारम्, कस्य ? [c] **स्वकस्य** आत्मीयस्य **कर्मणो** ज्ञानावरणीयादेरिति गाथार्थः ।।५५।।

---

१ चिन्तयेत्तत्र कर्त्तारं, भोक्तारं निजकर्मणाम् । अरूपमव्ययं जीव-मुपयोगस्वलक्षणम् ।। ४०।।
—अध्यात्मसारे, अ. १६ ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**तस्स[२] य सकम्मजणियं जम्माइजलं कसायपायालं ।**
**वसणसयसावयमणं मोहावत्तं महाभीमं ।।५६।।**

**अण्णाण-मारुएरियसंजोग-विजोगवीइसंताणं ।**
**संसारसागरमणोरपारमसुहं विचिंतेज्जा ।।५७।।**

**तस्य य० गाहा ।। तस्य च** जीवस्य **स्वकर्मजनितम्** आत्मीयकर्मनिर्वर्तितम्, कम् ? संसारसागरमिति वक्ष्यति तम्, किम्भूतमित्यत आह – **जन्मादिजलम्** जन्म प्रतीतम्, आदिशब्दाज्जरामरणपरिग्रहः, एतान्येवातिबहुत्वाज्जलमिव जलं यस्मिन् स तथाविधस्तम्, तथा **कषायपातालम्** कषायाः पूर्वोक्तास्त एवागाधभवजननसाम्येन पातालमिव पातालं यस्मिन् स तथाविधस्तम्, तथा **व्यसनशतश्वापदवन्तम्** व्यसनानि-दुःखानि द्यूतादीनि वा, तच्छतान्येव पीडाहेतुत्वात् श्वापदानि, तान्यस्य विद्यन्त इति तद्वन्तम् **'मणं'** ति देशीशब्दो मत्वर्थीयः, उक्तं च – "मतुयत्थंमि मुणिज्जह आलं इल्लं मणं च मणुयं चे"[ ]ति, तथा **मोहावर्तम्** मोहः-मोहनीयं कर्म, तदेव तत्र विशिष्टभ्रमिजनकत्वादावर्तो यस्मिन् स तथाविधस्तम्, तथा **महाभीमम्** अतिभयानकमिति गाथार्थः ।।५६।। किञ्च –

**अण्णाण० गाहा ।। अज्ञानम्** ज्ञानावरणकर्मोदयजनित आत्मपरिणामः स एव तत्प्रेरकत्वान्**मारुतो** वायुस्तेने**रितः** प्रेरितः, कः ? **संयोग-वियोग-वीचिसन्तानो** यस्मिन् स तथाविधस्तम्, तत्र **संयोगः** केनचित् सह सम्बन्धः, **वियोग**स्तेनैव विप्रयोगः, एतावेव [d]सततप्रवृत्तत्वाद् **वीचय** ऊर्मयस्तत्प्रवाहः **सन्तान** इति भावना, संसरणं [e]संसारः स सागर इव **संसारसागर**स्तम्, किम्भूतम् ? **अनोरपारम्** अनाद्यपर्यवसितम्, **अशुभम्** अशोभनं **विचिन्तयेत्,** तस्य गुणरहितस्य जीवस्येति गाथार्थः ।।५७।।

---

[२] तत्कर्मजनितं जन्म-जरामरणवारिणा । पूर्णं मोहमहावर्त्त-कामौर्वानलभीषणम् ।। ४१ ।।
आशामहाऽनिलापूर्ण-कषायकलशोच्छलत् । असद्विकल्पकल्लोल-चक्रं दधतमुद्धतम् ।। ४२ ।।
हृदि स्त्रोतसिकावेला-सम्पातदुरतिक्रमम् । प्रार्थनावीचिसंतानं, दुष्पूरविषयोदरम् ।। ४३ ।।
अज्ञानदुर्दिनं व्यापद्-विद्युत्पातोद्भवद्भयम् । कदाग्रहकुवातेन, हृदयोत्कम्पकारिणम् ।। ४४ ।।
विविधव्याधिसम्बन्ध-मत्स्यकच्छपसंकुलम् । चिन्तयेच्च भवाऽम्भोधिं चलद्दोषाऽदिदुर्गमम् ।। ४५ ।।
—अध्यात्मसारे, अ. १६ ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

[१] तस्स य संतरणसहं सम्मद्दंसणसुबंधणमणहं [a] ।
णाणमयकण्णधारं [b] चारित्तमयं महापोयं ।।५८।।

संवरकयनिच्छिद्दं तवपवणाइद्ध[c]जवणतरवेगं ।
वेरग्गमग्गपडियं विसोत्तियावीइनिक्खोभं ।।५९।।

आरोढुं मुणि-वणिया महग्घसीलंग-रयणपडिपुन्नं ।
[d] जह तं निव्वाणपुरं सिग्घमविग्घेण [e] पाविंति ।।६०।।

**तस्स य० गाहा ।। तस्य च** संसारसागरस्य **संतरणसहम्** सन्तरणसमर्थं पोतमिति वक्ष्यति, किंविशिष्टम् ? **सम्यग्दर्शनमेव शोभनं बन्धनं** यस्य स तथाविधस्तम्, **अनघम्** अपापम्, **ज्ञानं** प्रतीतं तन्**मय**स्तदात्मकः **कर्णधारो** निर्यामकविशेषो यस्य यस्मिन् वा स तथाविधस्तं **चारित्रं** प्रतीतं तदात्मकम्, **महापोतम्** इति [f] महाबोधित्थम्, क्रिया पूर्ववदिति गाथार्थः ।।५८।।

---

[१] A तस्य सन्तरणोपायं, सम्यक्त्वदृढबन्धनम् । बहुशीलाऽङ्गफलकं, ज्ञाननिर्यामकाऽन्वितम् ।। ४६ ।।
संवरास्ताश्रवच्छिद्रं, गुप्तिगुप्तं समन्ततः । आचारमण्डपोद्दीप्ता-पवादोत्सर्गभूद्वयम् ।। ४७ ।।
असङ्ख्यैर्दुर्धरैर्योधै-र्दुष्प्रधृष्यं सदाशयैः । सद्योगकूपस्तम्भाग्र-न्यस्ताऽध्यात्मसितांशुकम् ।। ४८ ।।
तपोऽनुकूलपवनोद्-भूतसंवेगवेगतः । वैराग्यमार्गपतितम्, चारित्रवहनं श्रिताः ।। ४९ ।।
सद्भावनाख्यमञ्जूषा-न्यस्तसच्चित्तरत्नतः । यथाऽविघ्नेन गच्छन्ति, निर्वाणनगरं बुधा ।। ५० ।।
यथा च मोहपल्लीशे, लब्धव्यतिकरे सति । संसारनाटकोच्छेदा-शङ्कापङ्काऽऽविले मुहुः ।। ५१ ।।
सज्जीकृतस्वीयभटे, नावं दुर्बुद्धिनामिकाम् । श्रिते दुर्नीतिनौवृन्दा-रूढशेषभटाऽन्विते ।। ५२ ।।
आगच्छत्यथ धर्मेश - भटौघे रणमण्डपम् । तत्वचिन्ताऽऽदि-नाराच-सज्जीभूते समाश्रिते ।। ५३ ।।
मिथो लग्ने रणाऽऽवेशे, सम्यग् दर्शनमन्त्रिणा । मिथ्यात्वमन्त्री विषमां, प्राप्यते चरमां दशाम् ।। ५४ ।।
लीलयैव निरूद्ध्यन्ते, कषायचरटा अपि । प्रशमादिमहायोधैः, शीलेन स्मरतस्करः ।। ५५ ।।
हास्यादिषट्कलुण्टाक-वृन्दं वैराग्यसेनया । निद्रादयश्च ताड्यन्ते, श्रुतोद्योगादिभिर्भटैः ।। ५६ ।।
भटाभ्यां धर्मशुक्लाभ्या-मार्त्तरौद्राऽभिधौ भटौ । निग्रहेणेन्द्रियाणां च जीयते द्रागसंयमः ।। ५७ ।।
क्षयोपशमतश्चक्षु-र्दर्शनाऽऽवरणादयः । नश्यन्त्यसातसैन्यं च, पुण्योदयपराक्रमात् ।। ५८ ।।
सह द्वेषगजेन्द्रेण, रागकेसरिणा तथा । सुतेन मोहभूपोऽपि, धर्मभूपेन हन्यते ।। ५९ ।।
ततः प्राप्तमहानन्दा, धर्मभूपप्रसादतः । यथा कृतार्था जायन्ते, साधवो व्यवहारिणः ।। ६० ।।
विचिन्तयेत्तथा सर्वम्, धर्मध्याननिविष्टधीः । ईदृगन्यदपि न्यस्त-मर्थजातं यदागमे ।। ६१ ।।
—अध्यात्मसारे, अ. १६ ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**संवर० गाहा** ।। इहाऽऽश्रवनिरोधः **संवरस्तेन** [g] **कृतनिश्छिद्रं** स्थगितरन्ध्रमित्यर्थः, अनशनादिलक्षणं **तपस्तदेवेष्टपुरं** प्रति प्रेरकत्वात् पवन इव **तपःपवनस्तेनाऽऽविद्धस्य** प्रेरितस्य [h] **जवनतरः** शीघ्रतरो **वेगो** रयो यस्य स तथाविधस्तम्, तथा [i] विरागस्य भावो **वैराग्यम्** तदेवेष्टपुरप्रापकत्वान्**मार्ग** इव वैराग्यमार्गस्तस्मिन् **पतितो** गतस्तम्, तथा **विस्त्रोतसिका** अपध्यानानि ता[j] एवेष्टपुरप्राप्तिविघ्नहेतुत्वा**द्वीचय** इव विस्त्रोतसिकावीचयस्ताभि**र्निक्षोभ्यः** निष्प्रकम्पस्तमिति गाथार्थः ।।५९।।

**आरोढुं मुणि० गाहा** ।। एवम्भूतं पोतं किम् ? **आरोढुम्** इत्यारुह्य, के ? **मुनिवणिजो** मन्यन्ते जगतस्त्रिकालावस्थामिति मुनयः, त एवातिनिपुणमाय-व्ययपूर्वकं प्रवृत्तेर्वणिज इव मुनिवणिजः, पोत एव विशेष्यते-[k]**महार्घाणि** महार्हाणि **शीलाङ्गानि**-पृथिवीकायस[l]मारम्भपरित्यागादीनि वक्ष्यमाणलक्षणानि, तान्येवैकान्तिकात्यन्तिकसुख-हेतुत्वा**द्रत्नानि** महार्घशीलाङ्गरत्नानि, तैः [m] **प्रतिपूर्णो** भृतस्तम्, येन प्रकारेण **यथा तत्** प्रकान्तं **निर्वाणपुरं** सिद्धिपत्तनम्, परिनिर्वाणपुरं वेति पाठान्तरं **शीघ्रम्** आशु स्वल्पेन कालेनेत्यर्थः, **अविघ्नेन** अन्तरायमन्तरेण **प्राप्नुवन्ति** आसादयन्ति, तथा विचिन्तयेदिति वर्तत इत्ययं गाथार्थः ।।६०।।

**तत्थ य तिरयणविणिओगमइयमेगंतियं निराबाहं ।**
**साभावियं निरुवमं जह[a] सोक्खं अक्खयमुवेंति ।।६१।।**

**तत्थ य० गाहा ।। तत्र च** परिनिर्वाणपुरे **त्रिरत्नविनियोगात्मकम्** इति त्रीणि रत्नानि ज्ञानादीनि, विनियोगश्चैषां क्रियाकरणम्, ततः प्रसूतेस्तदात्मकमुच्यते, तथा **ऐकान्तिकम्** इत्येकान्तभावि, **निराबाधम्** इत्याबाधारहितम्, **स्वाभाविकम्** न कृत्रिमम्, **निरुपमम्** उपमातीतमिति, उक्तं च - "नवि अत्थि माणुसाणं तं सोक्खम्"[धर्मो.विव.] इत्यादि **यथा** येन प्रकारेण **सौख्यम्** प्रतीतम्, **अक्षयम्** अपर्यवसानम् **उपयान्ति** सामीप्येन प्राप्नुवन्ति, क्रिया [b] पूर्ववदिति गाथार्थः ।।६१।।

**किं बहुणा ? सव्वं चिय जीवाइपयत्थवित्थरोवेयं ।**
**सव्वनयसमूहमयं झाइज्जा समयसब्भावं ।।६२।।**

Jain Education International 2010_02　For Private & Personal Use Only　www.jainelibrary.org

**किं बहुणा० गाहा ।।** **किं बहुना** भाषितेन? **सर्वमेव** निरवशेषमेव **जीवादिपदार्थविस्तरोपेतम्**[a] जीवा-ऽजीवा-ऽऽश्रव-बन्ध-संवर-निर्जरा-मोक्षाख्यपदार्थ-प्रपञ्चसमन्वितं समयसद्भावमिति योगः, किंविशिष्टम् ? **सर्वनयसमूहात्मकं** द्रव्यास्तिकादिनयसङ्घातमयमित्यर्थः, **ध्यायेद्** विचिन्तयेदिति भावना, **समयसद्भावं** सिद्धान्तार्थमिति हृदयम्, अयं गाथार्थः[१] ।।६२।।

---

[१] A  x x x **धम्मे झाणे चउव्विहे चउप्पडोयारे पं० तं० आणाविजते अवायविजते विवागविजते संठाणविजते** x x x ।।

**—स्था. सू. - २४७, औप. सू. -२०, भग सू. ८०३ ।।**

वृ० x x x अथ **धर्म्यं चतुर्विधमिति** स्वरूपेण **चतुर्षु पदेषु**-स्वरूपलक्षणालम्बनानुप्रेक्षालक्षणेष्ववतारो विचारणीयत्वेन यस्य तच्चतुष्पदावतारं चतुर्विधस्यैव पर्यायो वाऽयमिति, क्वचित् **चउप्पडोयारमिति** पाठस्तत्र चतुर्षु पदेषु प्रत्यवतारो यस्येति विग्रह इति, **आणाविजए** त्ति आ-अभिविधिना ज्ञायन्तेऽर्था यया साऽऽज्ञा-प्रवचनं सा विचीयते-निर्णीयते पर्यालोच्यते वा यस्मिंस्तदाज्ञाविचयं धर्म्मध्यानमिति, प्राकृतत्वेन विजयमिति आज्ञा या विजीयते अधिगमद्वारेण परिचिता क्रियते यस्मिन्नित्याज्ञाविजयम्, एवं शेषाण्यपि, नवरं **अपाया**-रागादिजनिताः प्राणिनामैहिकामुष्मिका अनर्थाः, **विपाकः**- फलं कर्म्मणां ज्ञानाद्यावारकत्वादि **संस्थानानि** लोकद्वीपसमुद्रजीवादीनामिति, आह च—

"आप्तवचनं प्रवचनमाज्ञा विचयस्तदर्थनिर्णयनम्। आश्रवविकथागौरवपरीषहाद्यैरपायस्तु ।। १ ।।
अशुभशुभकर्म्मपाकानुचिन्तनार्थो विपाकविचयः स्यात् ।
द्रव्यक्षेत्राकृत्यनुगमनं संस्थानविचयस्त्विति ।। २ ।।" x x x ।।

**—स्थानाङ्गसूत्रवृत्तौ ।।**

B  **धम्मे चतुव्विधे चउप्पडोयारे पण्णत्ते,** तंजथा-झाणे अणुप्पेहाउ लक्खणे आलंबणे, एतं चतुव्विधं, चउप्पडोयारं नाम एक्केक्कं तत्थ चतुव्विधं झाणं, चतुव्विधं तंजथा-आणाविजये अवायविजए विवागविजए संठाणविजये,

तत्थ आणाविजए आणं विवेएति, जथा पंचत्थिकाए छज्जीवनिकाए अट्ठ पवयणमाता, अण्णे य सुत्तनिबद्धे भावे अबद्धे य पेच्छ कहं आणाए परियाणिज्जंति ?, एवं चिंतेति भासति य, तथा पुरिसादिकारणं पडुच्च किच्छासज्झेसु हेतुविसयातीतेसुवि वत्थुसु सव्वण्णुणा दिट्ठेसु एवमेव सेतंति चिंततो भासंतो य आणा विवेयेति १,

एवं अवायविजयेति, पाणातिवातेणं निरयं गच्छति अप्पाउओ काणकुंटादी भवति एवमादि त्वाज्ञा, अहवा मिच्छत्त-अविरति-पमाय-कसाय-जोगाणं अवायमणुचिंतेति, णाणदंसणचरित्ताणं वा विराधणा-वायमणुचिंतेति २,

विवागविजयो विविधो पागो विवागो कंमाणुभावोति भणितं होति, सुभासुभा य जे कंमोदयभावा ते चिंतेति ३,

Jain Education International 2010_02    For Private & Personal Use Only    www.jainelibrary.org

संठाणविजयो, संठाणाणि विवेचयति, सव्वदव्वाणं संठाणं चिंतेति, जथा लोए सुपत्तिट्ठासंठिते, अलोए सुसिरगोलकसंठिते, नरगा हुंडसंठिता, एवं सव्वदव्वाणं । एत्थ इमाओ चउण्हंपि कारगगाथाओ-

पंचत्थिकाए आणाए, जीवा आणाए छव्विहे । विजए जिणपण्णत्ते, धम्मज्झाणं झियायइ ।। १ ।।

इहलोइए अवाए, तधा य पारलोइए । चिंतयंतो जिणक्खाए, धम्मज्झाणं झियायती ।। २ ।।

इहलोइयं अवायं, बितियं पारलोइयं । अप्पमत्तो पमत्तो वा, धम्मज्झाणं झियायती ।। ३ ।।

सुभमसुभं अणुभावं कंमविवागं विवागविजयंमि । संठाण सव्वदव्वे णरगविमाणाणि जीवाणं ।। ४।।

देहादीयं परीणामं, नारगादीसु णेकधा । लेस्सातिगं च चिंतेति, विवागं तु झियायती ।। ५ ।।

सुभाणं असुभाणं च, कंमाणं जो विजाणती । समुतिण्णाणमप्पाणं, विवागं तु झियायती ।। ६।।

**—आवश्यकचूर्णौ ।।**

C तत्र बाह्याध्यात्मिकभावनां याथात्म्यं धर्मः तस्माद् अनपेतं धर्म्यम् । तच्च द्विविधम् बाह्यम् आध्यात्मिकं च । सूत्रार्थपर्यालोचनम् दृढव्रतता शीलगुणानुरागो निभृतकायवाग्व्यापारादिरूपं बाह्यम् आत्मनः स्वसंवेदनग्राह्यमन्येषामनुमेयमाध्यात्मिकं तत्त्वार्थसंग्रहादौ चातुर्विध्येन प्रदर्शितं संक्षेपतः अन्यत्र दशविधम् । तद्यथा—अपायोपायजीवाऽजीवविपाकविरागभवसंस्थानाज्ञाहेतुविचयानि चेति । लोक-संसारविचययोः संस्थान-भवविचययोरन्तर्भावान्नोद्दिष्टदशभेदेभ्यः पृथगभिधानम्। तत्र अपाये विचयो विचारो यस्मिन् तद् **अपायविचयम्** । एवम् अन्यत्रापि योज्यम् । 'दुष्टमनो-वाक्-कायव्यापारविशेषाणामपायः कथं नु नाम स्यात्' इत्येवंभूतः संकल्पप्रबन्धो दोषपरिवर्जनस्य कुशलप्रवृत्तित्वाद् अपायविचयम् । 'तेषामेव कुशलानां स्वीकरणमुपायः स कथं नु मे स्याद्' इति संकल्पप्रबन्ध **उपायविचयम्** । असंख्येयप्रदेशात्मकसाकाराऽनाकारोपयोगलक्षणाऽनादिस्वकृतकर्मफलोपभोगित्वादि जीवस्वरूपानुचिन्तनं **जीवविचयम्** । धर्माधर्माकाशकालपुद्गलानामनन्तपर्यायात्मकानामजीवानामनुचिन्तन**मजीवविचयम्** । मूलोत्तरप्रकृतिभेदभिन्नस्य पुद्गलात्मकस्य मधुरकटुफलस्य कर्मणः संसारिसत्त्वविषयविपाकविशेषानुचिन्तनं **विपाकविचयम्**। 'कुत्सितमिदं शरीरकम् शुक्रशोणितसमुद्भूतम् अशुचिभृतघटोपमम् अनित्यम् अपरित्राणम् । गलदशुचिनवच्छिद्रतया अशुचि आधेयशोचम् न किञ्चिदत्र कमनीयतरं समस्ति किंपाकफलोपभोगोपमाः प्रमुखरसिका विपाककटवः प्रकृत्या भङ्गुराः पराधीनाः संतोषामृतास्वादपरिपन्थिनः सद्भिर्निन्दिता विषयाः तदुद्भवं च सुखं दुःखानुषङ्गि दुःखजनकं च नातो देहिनां तृप्तिः न च एतद् आत्यन्तिकमिति नात्र आस्था विवेकिना आधातुं युक्तेति विरतिरेव अतः श्रेयस्कारिणी' इत्यादिरागहेतुविरोधानुचिन्तनं **वैराग्यविचयम्** । 'प्रेत्य स्वकृतकर्म-फलोपभोगार्थं पुनः प्रादुर्भावो भवः स च अरघट्टघटीयन्त्रवद् मूत्र-पुरीषाऽन्त्रतन्त्रनिबद्धदुर्गन्धजठरपुटकोटरादिषु अजस्रमावर्तनम् न चात्र किञ्चिद् जन्तोः स्वकृतकर्मफलमनुभवतः चेतनमचेतनं वा सहायभूतं शरणतां प्रतिपद्यते' इत्यादि भवसंक्रान्तिदोषपर्यालोचनं **भवविचयम्** । 'भवन-नग-सरित्-समुद्र-भूरुहादयः पृथिवीव्यवस्थिताः साऽपि घनोदधि-घनवात-तनुवातप्रतिष्ठा तेऽपि आकाशप्रतिष्ठाः तदपि स्वात्मप्रतिष्ठम् तत्र अधोमुखमल्लकसंस्थानं वर्णयन्ति अधोलोकम्' इत्यादि च संस्थानानुचिन्तनं **संस्थानविचयम्** । अतीन्द्रियत्वाद् हेतूदाहरणादिसद्भावेऽपि बुद्ध्यतिशयशक्तिविकलैः परलोक-बन्ध-मोक्ष-धर्माऽधर्मादिभावेषु अत्यन्तदुःखबोधेषु आप्तप्रामाण्यात् तद्विषयं तद्वचनं तथैवेति **आज्ञाविचयम्** । आगमविषयविप्रतिपत्तौ तर्कानुसारिबुद्धेः पुंसः स्याद्वादप्ररूपकागमस्य कष-

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

च्छेद-तापशुद्धितः समाश्रयणीयत्वगुणानुचिन्तनं **हेतुविचयम्** । एतच्च सर्वं धर्मध्यानम् श्रेयोहेतुत्वात् एतच्च संवररूपम् अशुभास्रवप्रत्यनीकत्वात् "आस्रवनिरोधः संवरः" [तत्त्वार्थ० ९/१] इति वचनात् । गुप्ति-समिति-धर्मानुप्रेक्षादीनां चास्रवप्रतिबन्धकारित्वात् । अयमपि जीवाऽजीवाभ्यां कथंचिदभिन्नः भेदाभेदैकान्ते दोषोपपत्तेः । न चायमेकान्तवादिनां घटते मिथ्याज्ञानाद् मिथ्याज्ञानस्य निरोधानुपपत्तेः। संवरश्च द्विविधः सर्व-देशभेदात् । पीत-पद्मलेश्याबलाधानमप्रमत्तसंयतस्य अन्तर्मुहूर्तकालप्रमाणं स्वर्गसुखनिबन्धनमेतद् धर्मध्यानं प्रतिपत्तव्यम् ।

**—सम्मतिवृत्तौ, का. ३ ।।**

D **अव०** x x x अथ भेदप्रतिपादनद्वारेण ध्येयस्य स्वरूपमाह—

**पिण्डस्थं च पदस्थं च, रूपस्थं रूपवर्जितम् ।**
**चतुर्धा ध्येयमाम्नातं, ध्यानस्यालम्बनं बुधैः ।। ८ ।।** **—योगशास्त्रे, प्र. ७ ।।**

**अव०** पिण्डस्थादिक्रमेण चतुर्विधं ध्येयमभिधाय प्रकारान्तरेण तस्य चातुर्विध्यमाह—

**आज्ञाऽपाय-विपाकानां, संस्थानस्य च चिन्तनात् ।**
**इत्थं वा ध्येयभेदेन, धर्म्यं ध्यानं चतुर्विधम् ।। ७ ।।**

**वृ०** ध्येयभेदाच्चातुर्विध्यं ध्यानस्य ।। ७ ।।

**—योगशास्त्रे, प्र. १० ।।**

E **अव०** तच्च **धर्मध्यानं चतुर्धा प्राह** -

**आज्ञाविचयमपायविचयं च सद्ध्यानयोगमुपसृत्य ।**
**तस्माद्विपाकविचयमुपयाति संस्थानविचयं च ।।२४६।।**

**वृ०** **आज्ञाविचयमाद्यमपायविचयं** द्वितीयं **सद्ध्यानयोगं** सद्बुद्धिसम्पर्कमु**पसृत्य** प्राप्य **तस्मात्** तदनन्तरं **विपाकविचयं** तृतीयं भेदं धर्मध्यान**स्योपयाति** प्राप्नोति । **संस्थानविचयं च** चतुर्थभेदमिति ।।२४६।।

**आप्तवचनं प्रवचनं, चाज्ञा विचयस्तदर्थनिर्णयनम् ।**
**आस्रवविकथागौरवपरीषहाद्यैरपायस्तु ।।२४७।।**

**वृ०** एतानेव लेशतो व्याचष्टे - **आप्तस्य**-रागादिरहितस्य **वचनमा**प्तवचनं प्रवचनं च, किम् ? **आज्ञा,** तस्या **विचयः** कः ?, उच्यते, **तदर्थनिर्णयनं** तस्या-आज्ञाया अर्थो-वाच्यः तस्य निर्णयनमिति । **आस्रवाः**- प्राणातिपातादयः, **विकथाः**-स्त्रीकथाद्याः, **गौरवाणि**-ऋद्धिप्रभृतीनि, **परीषहाः**-क्षुदादयः । एताद्यैरनुष्ठानैः शास्त्रनिषिद्धैर्यो**ऽपायस्त्वै**हिकः पारत्रिकश्च, चिन्त्यते धर्मार्थिना सोऽपायविचयः स्यादिति सम्बन्ध इति ।। २४७ ।।

**अशुभशुभकर्मपाकानुचिन्तनार्थो विपाकविचयः स्यात् ।**
**द्रव्यक्षेत्राकृत्यनुगमनं संस्थानविचयस्तु ।।२४८।।**

**वृ०** तृतीयचतुर्थभेदयोः स्वरूपमाह-**अशुभानि** च द्व्यशीतिप्रमाणानि पूर्वोक्तानि, **शुभानि** द्विचत्वारिंशत्प्रमाणानि च तानि च तानि **कर्माणि** च तेषां **पाका**-विपाका रसविशेषा एकद्वित्रिचतुःस्थानिकाः

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

कथ्यमानकटुकमधुररसोन्नीयमानस्वरूपास्तेषा**मनुचिन्तनमेवार्थो** वाच्यं यस्य स तथा । क एवंविधः ? **विपाकविचय** इति तृतीयभेदः **स्यादिति** । **द्रव्याणि** षट्, **क्षेत्रम्** ऊर्ध्वाधस्तिर्यग्लक्षणं तयोराकाराः- **आकृतयस्तासामनुगमनं**-चिन्तनम् । तत्किम् ? **संस्थानविचयस्तु** स्यादिति चतुर्थभेद इति ।।२४८।।

**अव०** एकैकभेदं चिन्तयतो यत् स्यात् तदाह-

**जिनवरवचनगुणगणं, सञ्चिन्तयतो वधाद्यपायांश्च ।**
**कर्मविपाकान् विविधान्, संस्थानविधीननेकांश्च ।।२४९।।**

**वृ०.** एकैकभेदं चिन्तयतो यत्स्यात्तदाह-तस्य शीलधारिणो **जिनवरवचनगुणगणं** प्रथममाज्ञाविचयम् १, **वधाद्यपायांश्च** चिन्तयतो द्वितीयमपायविचयम् २, **कर्मविपाकान् विविधान्** विचिन्तयतस्तृतीयं कर्मविपाकविचयम् ३, **संस्थानविधीननेकांश्च** चतुर्थं संस्थानविचयमिति ।।२४९।।

**–प्रशमरतौ ।।**

F **मू०** **परिचत्तअट्ट** x x x ।।४८४।।

**वृ०.** तत्राज्ञाविचय-अपायविचय-विपाकविचय-संस्थानविचयभेदाद् धर्मध्यानमपि चतुर्द्धा-तत्र क्षीणाशेषरागद्वेषमोहस्य भगवतोऽर्हतः शङ्कादिरहितं द्वादशाङ्गागमरूपं वचनामाज्ञा । तस्या विचयो गवेषणं गुणवत्त्वेन निर्दोषत्वेन उपादेयत्वेन चार्थनिर्णयः । तथा अपाया आश्रवविकथागौरवपरीषहा-समितत्वागुप्तत्वादयः । तेषां विचयो नारकतिर्यग्नरामरजन्मसु विविधवेदनोत्पादकत्वम् । अशुभं [शुभं] च कर्म द्वयोः कोट्योर्वर्त्तते । तस्य पाको विपाकोऽनुभावो रस इत्यर्थः । तस्यानुचिन्तनम् । अशुभानां कर्मांशानामयं विपाकः । शुभानां चायमिति संसारभाजां जीवानां तदन्वेषणं विपाकविचयः । तथा धर्माधर्मौ गतिस्थित्यात्मकौ लोकाकाशप्रमाणौ । आकाशं तु लोकालोकव्यापकमवकाशदम् । लोकश्चोर्ध्वा-धस्तिर्यग्रूपः । पुद्गलद्रव्यं सचित्ताचित्ताणुस्कन्धादिभेदादनेकप्रकारम् । जीवोऽपि शरीरादिभेदेनानेकाकारः, समुद्घातकाले च सकललोकाकारः । कालोऽपि यदा क्रियामात्रो द्रव्यपर्यायस्तदा द्रव्याकार एव । यदा तु स्वतन्त्रं कालद्रव्यं तदेकसमयोऽर्द्धतृतीयद्वीपसमुद्राकृतिरित्येष संस्थानविचयः । एषामाज्ञाविचयादीनां सर्वज्ञोपज्ञतयाऽवितथत्वेनानुचिन्तनं धर्मध्यानम् । x x x ।।४८४।।

**–हितोपदेशवृत्तौ ।।**

G **धर्मध्यानं भवत्यत्र, मुख्यवृत्त्या जिनोदितम्** । x x x ।। ३५ ।।

**वृ०** x x x जिनोदितम् जिनप्रणीतं धर्मध्यानं मैत्र्यादि भेदभिन्नमनेकविधम्, यदाह-
मैत्र्यादिश्चतुर्भेदं यदाऽऽज्ञादिचतुर्विधम् ।
पिण्डस्थादि चतुर्धा या धर्मध्यानं प्रकीर्त्तितम् ।। १ ।। x x x ।।३५।।

**–गुणस्थानकक्रमारोहे ।।**

H **आज्ञाऽपायविपाकानां, संस्थानस्य च चिन्तनात् ।**
**धर्मध्यानोपयुक्तानां, ध्यातव्यं स्याच्चतुर्विधम् ।।३५।।**

**–अध्यात्मसारे, अ. १६ ।।**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

गतं **ध्यातव्यद्वारम्**, साम्प्रतं येऽस्य **ध्यातारस्तान्** प्रतिपादयन्नाह –

**सव्वप्पमायरहिया[1] मुणओ खीणोवसंतमोहा य[2] ।**
**झायारो नाणधणा धम्मज्झाणस्स निद्दिट्ठा ।।६३।।**

**सव्वप्पमाय० गाहा ।।** प्रमादा मद्यादयः, यथोक्तम् – "मज्जं विसय-कसाया निद्दा विकहा य पंचमी [a]भणिया ।"[ ] सर्वप्रमादै रहिताः **सर्वप्रमादरहिता** अप्रमादवन्त इत्यर्थः,

---

[१] A पंचासवपडिविरओ, चरित्तजोगंमि वट्टमाणो उ । सुत्तत्थमणुसरंतो, धम्मज्झायी मुणेयव्वो ।। ७ ।।
—आवश्यकचूर्णौ ।।

B "विरज्य कामभोगेषु, विमुच्य वपुषि स्पृहाम् । यस्य चित्तं स्थिरीभूतं, स हि ध्याता प्रशस्यते ।। ३ ।।
सत्संयमधुरा धीरै-र्न हि प्राणात्ययेऽपि यैः । त्यक्ता महत्त्वमालम्ब्य, ते हि ध्यानधनेश्वराः ।। ४ ।।
परीषहमहाव्यालै-र्ग्राम्यैर्वाक्कण्टकैर्दृढैः । मनागपि मनो येषां, न स्वरूपात् परिच्युतम् ।। ५ ।।
क्रोधादिभीमभोगीन्द्रै, रागादिरजनीचरैः । अजय्यैरपि विध्वस्तं, न येषां यमजीवितम् ।। ६ ।।
मनः प्रीणयितुं येषां, क्षमास्ता दिव्ययोषितः । मैत्र्यादयः सतां सेव्या, ब्रह्मचर्येऽप्यनिन्दिते ।। ७।।
तपस्तरलतीव्रार्चिः-प्रचये पातितः स्मरः। यै रागरिपुभिः सार्धं, पतङ्गप्रतिमीकृतः ।। ८ ।।
निःसङ्गत्वं समासाद्य, ज्ञानराज्यं समीप्सितम् । जगत्त्रयचमत्कारि, चित्रभूतं च चेष्टितम् ।। ९ ।।
अत्युग्रतपसाऽऽत्मानं, पीडयन्तोऽपि निर्दयम् । जगद् विध्यापयन्त्युच्चै-र्ये मोहदहनक्षतम् ।। १० ।।
स्वभावजनिरातङ्क-निर्भरानन्दनन्दिताः । तृष्णार्चिःशान्तये धन्या, येऽकालजलदोद्गमाः ।। ११ ।।
अशेषसङ्गसंन्यास-वशाज्जितमनोद्विजाः । विषयोद्दाममातङ्ग-घटासंघट्टघातकाः ।। १२ ।।
वाक्पथातीतमाहात्म्या, विश्वविद्याविशारदाः । शरीराहारसंसार-कामभोगेषु निःस्पृहाः ।। १३ ।।
विशुद्धबोधपीयूष-पानपुण्यीकृताशयाः। स्थिरेतरजगज्जन्तु-करुणावारिवार्धयः ।। १४ ।।
स्वर्णाचल इवाकम्पा, ज्योतिःपथ इवामलाः। समीर इव निःसङ्गा, निर्ममत्वं समाश्रिताः ।। १५ ।।
हितोपदेशपर्जन्यै-र्भव्यसारङ्गतर्पकाः । निरपेक्षाः शरीरेऽपि, सापेक्षाः सिद्धिसंयमे ।। १६ ।।
इत्यादिपरमोदार-पुण्याचरणलक्षिताः । ध्यानसिद्धेः समाख्याताः, पात्रं मुनिमहेश्वराः ।। १७ ।।
—ज्ञानार्णवे, सर्ग. ५ ।।

C अव० अथ ध्यातारं षड्भिः श्लोकैराह—
अमुञ्चन् प्राणनाशेऽपि, संयमैकधुरीणताम् । परमप्यात्मवत् पश्यन्, स्वस्वरूपापरिच्युतः ।। २ ।।
उपतापमसंप्राप्तः शीतवातातपादिभिः । पिपासुरमरीकारि, योगामृतरसायनम् ।। ३ ।।
रागादिभिरनाक्रान्तं, क्रोधादिभिरदूषितम् । आत्मारामं मनः कुर्वन्, निर्लेपः सर्वकर्मसु ।। ४ ।।
विरतः कामभोगेभ्यः, स्वशरीरेऽपि निःस्पृहः । संवेगह्रदनिर्मग्नः, सर्वत्र समतां श्रयन् ।। ५ ।।
नरेन्द्रे वा दरिद्रे वा, तुल्यकल्याणकामनः । अमात्रकरुणापात्रं, भवसौख्यपराङ्मुखः ।। ६ ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

मुनयः साधवः [२] क्षीणोपशान्तमोहाश्च इति क्षीणमोहाः-क्षपकनिर्ग्रन्था उपशान्तमोहाः -

---

सुमेरुरिव निष्कम्पः, शशीवानन्ददायकः । समीर इव निःसङ्गः, सुधीर्ध्याता प्रशस्यते ।। ७ ।।
—योगशास्त्रे प्र-७ ।।

D मनसश्चेन्द्रियाणां च, जयाद्यो निर्विकारधीः । धर्मध्यानस्य स ध्याता, शान्तो दान्तः प्रकीर्तितः ।। ६२ ।।
परैरपि यदिष्टं च, स्थितप्रज्ञस्य लक्षणम् । घटते ह्यत्र तत्सर्वं, तथा चेदं व्यवस्थितम् ।। ६३ ।।
प्रजहाति यदा कामान्, सर्वान् पार्थ ! मनोगतान् ।
आत्मन्येवाऽऽत्मना तुष्टः, स्थितप्रज्ञस्तदोच्यते ।। ६४ ।।
दुःखेष्वनुद्विग्नमनाः, सुखेषु विगतस्पृहः । वीतरागभयक्रोधः, स्थितधीर्मुनिरुच्यते ।। ६५ ।।
यः सर्वत्राऽनभिस्नेह-स्तत्तत् प्राप्य शुभाऽशुभम् ।
नाऽभिनन्दति न द्वेष्टि, तस्य प्रज्ञा प्रतिष्ठिता ।। ६६ ।।
यदा संहरते चाऽयं, कूर्मोऽङ्गानीव सर्वशः । इन्द्रियाणीन्द्रियार्थेभ्य-स्तस्य प्रज्ञा प्रतिष्ठिता ।। ६७ ।।
शान्तो दान्तो भवेदीदृ-गाऽऽत्मारामतया स्थितः ।
सिद्धस्य हि स्वभावो यः, सैव साधकयोग्यता ।। ६८ ।।
—अध्यात्मसारे, अ. १६ ।।

E जितेन्द्रियस्य धीरस्य, प्रशान्तस्य स्थिराऽऽत्मनः ।
सुखाऽऽसनस्य नासाग्र-न्यस्तनेत्रस्य योगिनः ।। ६ ।।
रुद्धबाह्यमनोवृत्ते-र्धारणाधारया रयात् । प्रसन्नस्याप्रमतस्य, चिदानन्दसुधालिहः ।। ७ ।।
साम्राज्यमप्रतिद्वन्द्व-मन्तरे च वितन्वतः । ध्यानिनो नोपमा लोके, सदेवमनुजेऽपि हि ।। ८ ।।
—ज्ञानसारे, अ.३० ।।

F ज्ञानवैराग्यसम्पन्नः, संवृतात्मा स्थिराशयः । क्षीणोपशान्तमोहश्चाऽ-प्रमादी ध्यानकारकः ।। १३० ।।
शुद्धसम्यक्त्वदर्शी च, श्रुतज्ञानोपयोगवान् । दृढसंहननो धीरः, सर्वषट्जीवपालकः ।। १३१ ।।
सत्यवाक् दत्तभोजी च, ब्रह्मचारी पवित्रहृत् । स्त्रीकामचेष्टयास्पृष्टो, निःसंगो वृद्धसेवकः ।। १३२ ।।
निराशो निष्कषायी च, जिताक्षो निष्परिग्रही । निर्ममः समतालीनो ध्याता स्यात् शुद्धमानसः ।। १३३ ।।
—ध्यानदीपिकायाम् ।।

[अवबुध्यते ज्ञातुरभ्यन्तरस्वरूपं गुणगरिमाद्वारेण । - सम्पा०]

२ A मू० x x x**आज्ञाऽपाय-विपाक-संस्थानविचयाय धर्ममप्रमत्तस्य** ।। ९-३७ ।।

वृ० x x xतदेतदप्रमत्तसंयतस्य भवति धर्मध्यानं प्रमत्तसंयतस्थानाद् विशुद्ध्यमानाध्यवसायोऽप्रमत्तस्थान-मामोति । यथोक्तम्-

"निर्ज्ञाता एव तथा, विशोधयोऽसङ्ख्यलोकमात्रास्ताः ।
तरतमयुक्ता या अधि-तिष्ठन् यतिरप्रमत्तः स्यात् ।। १ ।।"

अतो विशुद्धाद्धायां वर्तमानोऽप्रमत्तसंयतस्तस्य च भगवतो धर्मध्यानादितपोयोगैः कर्माणि क्षपयतो विशोधिस्थानान्तराणि आरोहतः ऋद्धिविशेषाः प्रादुर्भवन्त्यणिमादयः। उक्तं हि —

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

"अवगाहते च स श्रुत-जलधिं प्राप्नोति चावधिज्ञानम् ।
मनःपर्यायं वा, विज्ञानं वा कोष्टादिबुद्धिर्वा ।। १ ।।
चारणवैक्रियसर्वौ-षधा(व)द्यावापि लब्धयस्तस्य । प्रादुर्भवन्ति गुणतो, बलानि वा मानसादीनि ।। २ ।।"
अत्र च श्रेणिप्राप्त्यभिमुखः प्रथमकषायान् दृष्टिमोहत्रयं चाविरतसम्यग्दृष्टिदेशविरतप्रमत्ताप्रमत्तसंयतानामन्यतम उपशमश्रेण्याऽऽभिमुख्यादुपशमयति, क्षपकश्रेण्याभिमुख्यात् क्षपयति । यथोक्तम्–
"क्षपयति तेन ध्याने-न ततोऽनन्तानुबन्धिनश्चतुरः ।
मिथ्यात्वं संमिश्रं, सम्यक्त्वं च क्रमेण ततः ।। १ ।।
क्षीयन्ते हि कषायाः, प्रथमास्त्रिविधोऽऽपि दृष्टिमोहश्च । देशयतायतसम्यग्दृगप्रमत्तप्रमत्तेषु ।। २ ।।
पार्ष्णिग्राहारींस्तान्, निहत्य विगतस्पृहो विदीर्णभयः ।
प्रीतिसुखमपक्षोभः, प्राप्नोति समाधिमत्स्थानम् ।। ३ ।।" इति ।।३७।।

**अव०** किञ्चान्यदित्यनेन स्वाम्यन्तरं सम्बध्नाति–

**मू० उपशान्तक्षीणकषाययोश्च ।। ९-३८ ।।**

**भा० उपशान्तकषायस्य क्षीणकषायस्य च धर्मं ध्यानं भवति** ।। ३८ ।।

किञ्चान्यत्–

**वृ० चशब्दः** समुच्चये । **कषायशब्दः** प्रत्येकमभिसम्बध्यते । उपशान्ताः कषाया यस्यासावु**पशान्तकषायः** एकादशगुणस्थानवर्ती। क्षीणाः कषाया यस्य स **क्षीणकषायः ।** भस्मच्छन्नाग्निवदुपशान्ताः निरवशेषतः परिशटिताः क्षीणा विध्मातहुताशनवदनयोश्च उपशान्तक्षीण-कषाययोरप्रमत्तसंयतस्य **च ध्यानं धर्मं भवति ।** तत्रोपशान्तक्षीणकषायस्वरूपनिर्ज्ञानाय अधस्तनं गुणस्थानत्रयमवश्यंतया प्ररूपणीयम्, अन्यथा तदपरिज्ञानमेव स्यादिति । **अप्रमत्तस्थाना**दसङ्ख्येयानि विशोधिस्थानान्यारुह्यापूर्वकरणं प्रविशति । समये समये स्थितिघात-रसघात-स्थितिबन्ध-गुणश्रेणि-गुणसङ्क्रमणकरणमपूर्वं निर्गच्छतीत्यपूर्वकरणम्। अप्राप्तपूर्वकत्वाद् वा संसारे तदपूर्वकरणम्। न तत्र कस्याश्चिदपि कर्मप्रकृतेरुपशम क्षयो वा । उपशमनाभिमुख्यात् तत्पुरस्कारादुपशमकः क्षपणार्हत्वाच्च क्षपक इति । उक्तं च–
" स ततः क्षपकश्रेणिं, प्रतिपद्य चारित्रघातिनीः शेषाः । क्षपयन् मोहप्रकृतीः, प्रतिष्ठते शुद्धलेश्याकः ।। १ ।।
प्रविशत्यपूर्वकरणं, प्रस्थित एवं ततोऽपरं स्थानम् । तदपूर्वकरणमिष्टं, कदाचिदप्राप्तपूर्वत्वात् ।। २ ।।"
ततोऽप्युत्तरोत्तरविशोधिस्थानप्राप्त्या अनिवृत्तिस्थानं भवति । परस्परं नातिवर्तन्ते इत्यनिवृत्तयः। परस्परतुल्यवृत्तय इत्यर्थः। सम्परायाः कषायास्तदुदयो बादरो येषां ते बादरसम्परायाः। अनिवृत्तयश्च ते बादरसम्परायाश्च त इत्यर्थः । ते उपशमकाः क्षपकाश्च । तत्र नपुंसकस्त्रीवेदषट्नोकषायादि-क्रमान्मोहप्रकृतीरुपशमकः शमयति–
"अणदंसणपुंसगइत्थिवेयछक्कं च पुरुसवेयं च । दो दो एगंतरिए, सरिसे सरिसं उवसमेइ ।। १ ।।"
[आवश्यकनिर्युक्तौ गा० ११६]

क्षपको निद्रानिद्रादित्रयक्षयात् त्रयोदशनामकर्मक्षयाच्चाप्रत्याख्यानावरणादिकषायाष्टकनपुंसकस्त्रीवेदक्रमाच्च क्षपयति। उक्तं च–

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

"अथ स क्षपयति निद्रा-निद्रादित्रयमशेषतस्तत्र । नरकगमनानुपूर्वी, नरकगतिं चापि कात्स्न्येन ।। १ ।।
सूक्ष्मस्थावरसाधा-रणातपोद्योतनामकर्माणि। तिर्यग्गतिनाम तथा, तिर्यग्गत्यानुपूर्व्यां च ।। २ ।।
चतुरेकद्वित्रीन्द्रिय-नामानि तथैव नाशमुपयान्ति । तिर्यग्गतियोग्यास्ताः, प्रकृतय एकादश प्रोक्ताः ।। ३ ।।
अष्टौ ततः कषायान्, पण्डकवेदं ततस्ततः स्त्रीत्वम् । क्षपयति पुंवेदे सङ्-क्रमय्य षण्णोकषायांश्च ।। ४ ।।
पुंस्त्वं क्रोधे क्रोधं, माने मानं तथैव मायायाम् । मायां च तथा लोभे, स क्षपयति सङ्क्रमय्य ततः ।। ५ ।।
लोभस्य यावद् बादरप्रकृतीर्वेदयति तावदनिवृत्तिबादरसम्परायसंयताः। ततः सूक्ष्मप्रकृतिवेदनाल्लोभकषायस्य सूक्ष्मसम्परायसंयतः उपशमकः सञ्ज्वलनलोभमुपशमयति क्षपकः क्षपयति । यथोक्तम्—
"अथ सूक्ष्मसम्पराय-स्थानं प्राप्नोति बादरे लोभे । क्षीणे सूक्ष्मे लोभे-कषायशेषे विशुद्धात्मा ।। १ ।।
यत् सम्परायमुपजन-यन्ति स्वयमपि च सम्परायन्ति । व्यासङ्गहेतवस्ते-न कषायाः सम्परायाख्याः ।। २ ।।
सम्यग्भावपरायण-हेतुत्वाद् वाऽपि सम्परायास्ते । प्रकृतिविशेषाच्च पुन-र्लोभकषायस्य सूक्ष्मत्वम् ।। ३ ।।
स ततो विशुद्धियोगे, नयति स्थानान्तरं व्रजंस्तमपि । क्षपयन् गच्छति यावत्, क्षीणकषायत्वमाप्नोति ।। ४ ।।"
ततोऽष्टाविंशतिविधमोहनीयोपशमादुपशान्तकषायवीतरागछद्मस्थः वीतो-गतो (रागो यस्मादिति वीतरागः) छद्म आवरणं तत्र स्थितः छद्मस्थः मोहनीयस्य कृत्स्नक्षयात् स क्षीणकषायवीतरागच्छद्मस्थः ततः क्षीणकषायो धर्मशुक्लाद्यद्वयध्यानविशेषाद् यथाख्यातसंयमविशुद्ध्याऽवशेषाणि कर्माणि क्षपयति । तत्र निद्राप्रचले द्विचरमसमये क्षपयति । ततोऽस्य चरमसमये आवरणद्वयान्तरायक्षयात् केवलज्ञानदर्शनमुत्पद्यत इति । x x x ।।

**—तत्वार्थ. सिद्ध. वृत्तौ ।।**

B **अव०** तत्र-

**अपुनर्बन्धकस्यायं, व्यवहारेण तात्त्विकः । अध्यात्मभावनारूपो, निश्चयेनोत्तरस्य तु ।। ३६९ ।।**

**वृ०** **अपुनर्बन्धकस्यो**पलक्षणत्वात्सम्यग्दृष्टेश्च **अयं** योगः **व्यवहारेण** कारणस्यापि कार्यत्वोपचाररूपेण, **तात्त्विकः** कारणस्यापि कथंचित्कार्यत्वादिति । किंरूपः सन्नित्याह-**अध्यात्मभावनारूपः** अध्यात्मरूपो भावनारूपश्च । **निश्चयेन** निश्चयनयमतेनोपचारपरिहाररूपेण । **उत्तरस्य त्व**पुनर्बन्धकसम्यग्दृष्ट्यपेक्षया चारित्रिण इति ।। ३६९ ।।

**चारित्रिणस्तु विज्ञेयः, शुद्ध्यपेक्षो यथोत्तरम् ।**
**ध्यानादिरूपो नियमात्, तथा तात्त्विक एव तु ।। ३७१ ।।**

**वृ०** **चारित्रिणस्तु** चारित्रिणः पुनः **विज्ञेयः। शुद्धपेक्षो यथोत्तर**मुत्तरोत्तरां शुद्धिमपेक्ष्य किमित्याह-**ध्यानादिरूपो** ध्यानसमतावृत्तिसंक्षयलक्षणो योगः। **नियमात्** अवश्यतया न त्वन्यस्य । **तथा** इति समुच्चये । **तात्त्विक एव तु** तत्त्वरूप इति ।। ३७१ ।। **—योगबिन्दौ ।।**

C **अव०** अथ देशविरतौ ध्यानसंभवमाह-

**आर्त्तं रौद्रं भवेदत्र, मन्दं धर्म्यं तु मध्यमम् । षट्कर्मप्रतिमाश्राद्ध-व्रतपालनसंभवम् ।। २५ ।।**

**वृ०** x x x **अत्र** देशविरतिगुणस्थानके x x x तु पुन**र्धर्मध्यानं** यथा यथा देशविरतिरधिकाऽधिका स्यात्तथा तथा **मध्यमं** यावदधिकाधिकं भवति, न तूत्कृष्टं धर्मध्यानं स्यादित्यर्थः, यदि पुनस्तत्राप्युत्कृष्टं धर्मध्यानं परिणमति, तदा भावतः सर्वविरतिरेव संजायते, कथंभूतं धर्मध्यानम् ? **षट्कर्मप्रतिमा-श्राद्धव्रतपालनसंभवं** षट्कर्माणि देवपूजादीनि, यदुच्यते—

देवपूजा गुरुपास्तिः, स्वाध्यायः संयमस्तपः । दानं चेति गृहस्थानाम्, षट् कर्माणि दिने दिने ।। १।।
प्रतिमा - अभिग्रहविशेषा दर्शनप्रतिमाद्या एकादश, यदाह-
दंसणवयसामाइअपोसहपडिमा अबंभसच्चित्ते । आरंभपेसउद्दिट्ठ वज्जए समणभूए अ ।। १ ।।
श्राद्धव्रतान्यणुव्रतादीनि द्वादश, यदाह—
पाणिवहमुसावाए, अदत्तमेहुणपरिग्गहे चेव । दिसिभोगदण्डसमईअ देसे पोसह तह विभागे ।। २ ।।
षट्कर्मादिविस्तरो ग्रन्थान्तरादवसेयः, तथैतेषां पालनात्संभवतीति षट्कर्मप्रतिमाश्राद्धव्रतपालनसंभवं धर्मध्यानं मध्यममिति। x x x ।। २५ ।।

**अव०** x x xअथ प्रमत्तसंयतगुणस्थाने ध्यानसंभवमाह—

**अस्तित्वान्नोकषायाणामत्रार्त्तस्यैव मुख्यता ।**
**आज्ञाद्यालम्बनोपेतधर्मध्यानस्य गौणता ।। २८ ।।**

**वृ०** **अत्र** प्रमत्तगुणस्थानके **मुख्यता** मुख्यत्वम् **आर्त्तस्य** ध्यानस्यैवोपलक्षणत्वाद्रौद्रस्यापि, कस्मात् ? **नोकषायाणां** हास्यषट्कादीनाम् **अस्तित्वाद्** विद्यमानत्वात्, तथा **आज्ञाद्यालम्बनोपेतधर्मध्यानस्य गौणता** आज्ञादीन्याज्ञापायविपाकसंस्थानविचयलक्षणान्यालम्बनानि आज्ञाद्यालम्बनानि तैरुपेतं च तद्धर्मध्यानं चाज्ञाद्यालम्बनोपेतधर्मध्यानं तस्य, अत्र धर्मध्यानमपि चतुष्पादम्, यथा—
आज्ञापायविपाकानां, संस्थानस्य च चिन्तनात् । इत्थं वा ध्येयभेदेन, धर्मध्यानं चतुर्विधम् ।। १ ।।
आज्ञां यत्र पुरस्कृत्य, सर्वज्ञानामबाधिताम् । तत्त्वतश्चिन्तयेदर्थान्, तदाज्ञाध्यानमुच्यते ।। २ ।।
रागद्वेषकषायाद्यै-र्जायमानान् विचिन्तयेत् । यत्रापायांस्तदपाय-विचयध्यानमुच्यते ।। ३ ।।
प्रतिक्षणं समुद्भूतो, यत्र कर्मफलोदयः । चिन्त्यते चित्ररूपः स, विपाकविचयो मतः ।। ४ ।।
अनाद्यन्तस्य लोकस्य, स्थित्युत्पादव्ययात्मनः । आकृतिं चिन्तयेद्यत्र, संस्थानविचयः स तु ।। ५ ।।
इत्याज्ञाद्यालम्बनोपेतधर्मध्यानस्य गौणता अत्र सप्रमादत्वादुच्यत इति ।। २८ ।।

**अव०** अथ ये प्रमत्तस्था निरालम्बनमपि धर्मध्यानं समहीन्ते, तान् प्रति तन्निषेधमाह—

**यावत्प्रमादसंयुक्त-स्तावत्तस्य न तिष्ठति । धर्मध्यानं निरालम्ब-मित्यूचुर्जिनभास्कराः ।। २९ ।।**

**वृ०** **जिनभास्करा** जिनसूर्या **इत्यूचुः** इत्येतदेव कथयन्ति स्म, किं तदित्याह - यः साधु**र्यावत्प्रमादसंयुक्तो** भवति, **तावत्तस्य** साधोर्गोचरे **निरालम्बं ध्यानं न तिष्ठती**ति निश्चयः, यतोऽत्र प्रमत्तगुणस्थाने **मध्यमधर्मध्यानस्या**पि **गौणतैवोक्ता,** न तु मुख्यता, ततोऽत्र निरालम्बनोत्कृष्टधर्मध्यानस्यासंभव एव ।। २९ ।।

**अव०** अथ यथाऽप्रमत्तस्थ एव मोहनीयकर्मोपशमक्षपणनिपुणः सद्ध्यानारम्भकत्वं कुरुते, तथा श्लोकद्वयेनाह-

**नष्टाशेषप्रमादात्मा, व्रतशीलगुणान्वितः । ज्ञानध्यानधनो मौनी, शमनक्षपणोन्मुखः ।। ३३ ।।**
**सप्तकोत्तरमोहस्य, प्रशमाय क्षयाय वा । सद्ध्यानसाधनारम्भं, कुरुते मुनिपुङ्गवः ।। ३४ ।।**
**युग्मम् ।**

**वृ०** **नष्टाशेषप्रमादो** निर्द्धाटिताखिलप्रमादः आत्मा जीवो यस्यासौ नष्टाशेषप्रमादात्मा, **व्रतानि** महाव्रतादीनि, **शीलगुणा** अष्टादशसहस्रशीलाङ्गलक्षणास्तै**रन्वितः** संयुक्तो व्रतशीलगुणान्वितः, **ज्ञानं** सदागमाभ्यासलक्षणम्, **ध्यानम्** एकाग्रतारूपं तद्, ज्ञानं च ध्यानं च **धनं** सर्वस्वं यस्यासौ ज्ञानध्यानधनः, अत एव **मौनी** मौनवान्, यतो मौनवानेव ध्यानधनः स्यात्, **यदाह** —

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

उपशामकनिर्ग्रन्थाः, **चशब्दादन्ये** वाऽप्रमादिनः, **ध्यातारश्चिन्तकाः**, **धर्मध्यानस्येति** सम्बन्धः, ध्यातार एव विशेष्यन्ते - **ज्ञानधना** ज्ञानवित्ता विपश्चित इत्यर्थः, **निर्दिष्टाः** प्रतिपादितास्तीर्थकर-गणधरैरिति गाथार्थः[३] ।।६३।।

---

तत्र मनो (तं नमत०) गृहीताखिलकालत्रयगतजगत्त्रयव्याप्तिः ।
यत्रास्तमेति सहसा, सकलोऽपि हि वाक्परिस्पन्दः ।। १ ।।

ततो ज्ञानध्यानधनो मौनी **शमनाय** शमनार्थं **क्षपणाय** क्षपणार्थं वा **उन्मुखः** संमुखः कृतोद्यम इत्यर्थः, शमनक्षपणोन्मुखः, एवंविधो **मुनिपुङ्गवः**, **सप्तकोत्तरमोहस्य** पूर्वोक्तसप्तकातिरिक्तैकविंशतिप्रकृतिरूपस्य मोहनीयस्य शमनोन्मुखः **प्रशमाय** क्षपणोन्मुखः **क्षयाय वा सद्ध्यानसाधनारम्भं** निरालम्बध्यानप्रवेशप्रारम्भं **कुरुते,** निरालम्बे ध्यानप्रवेशे हि योगिनस्त्रिविधा भवन्ति – यथा प्रारम्भकाः, तन्निष्ठाः, निष्पन्नयोगाश्च, यदाह–

सम्यग्नैसर्गिकीं वा विरतिपरिणतिं प्राप्य सांसर्गिकीं वा,
क्वाप्येकान्ते निविष्टाः कपिचपलचलन्मानसस्तम्भनाय ।
शश्वन्नासाग्रपालीघनघटितदृशो धीरवीरासनस्था,
ये निष्कम्पाः (निष्प्राणाः) समाधेर्विदधति विधिनारम्भमारम्भकास्ते ।। १ ।।
कुर्वाणो मरुदासनेन्द्रियमनःक्षुत्तर्षनिद्राजयं, योऽन्तर्जल्पनिरूपणाभिरसकृत्तत्त्वं समभ्यस्यति ।
सत्त्वानामुपरि प्रमोदकरुणामैत्रीर्भृशं मन्यते, ध्यानाधिष्ठितचेष्टयाऽभ्युदयते तस्येह तन्निष्ठता ।। २ ।।
उपरतबहिरन्तर्जल्पकल्लोलमाले, लसदविकलविद्यापद्मिनीपूर्णमध्ये ।
सततममृतमन्तर्मानसे यस्य हंसः, पिबति निरुपलेपः स्यात्तु(सोऽत्र) निष्पन्नयोगी ।। ३ ।। ३४ ।।

**अव०** अथाप्रमत्तगुणस्थाने ध्यानसंभवमाह—

**धर्मध्यानं भवत्यत्र, मुख्यवृत्त्या जिनोदितम् । रूपातीततया शुक्ल-मपि स्यादंशमात्रतः ।। ३५ ।।**

**वृ०** **x x x जिनोदितं** जिनप्रणीतं **धर्मध्यानं** मैत्र्यादिभेदभिन्नमनेकविधम्, यदाह–

मैत्र्यादिश्चतुर्भेदं यदाऽऽज्ञादिचतुर्विधम् । पिण्डस्थादि चतुर्धा वा, धर्मध्यानं प्रकीर्तितम् ।। १ ।। तत्र-
मैत्रीप्रमोदकारुण्य-माध्यस्थ्यानि नियोजयेत् । धर्मध्यानमुपस्कर्त्तुं, तद्धि तस्य रसायनम् ।। २ ।।
आज्ञापायविपाकानां, संस्थानस्य च चिन्तनात् । इत्थं वा ध्येयभेदेन, धर्मध्यानं प्रकीर्तितम् ।। ३ ।।

इति पूर्वमेव प्रदर्शितं—

स्यात्पिण्डस्थं ध्यानमात्माङ्गसङ्गि, स्वान्तं स्वान्तव्यापरूपं पदस्थम् ।
रूपस्थं संकल्पितात्मस्वरूपं, रूपातीतं कल्पनामुक्तमेव ।। १ ।।

तदेवंविधं जिनोदितं धर्मध्यानम् **अत्र** अप्रमत्तगुणस्थाने **मुख्यवृत्त्या** प्रधानतया **भवति,** तथा **रूपातीततया** कृत्वा **शुक्लध्यानमपि अंशमात्रतः** अत्र गौणतया **स्यादेवेति ।। ३५ ।।–गुणस्थानकक्रमारोहे ।।**

[३] A असंजदसम्मादिट्ठि-संजदासंजद-पमत्तसंजद-अप्पमत्तसंजद-अपुव्वसंजद-अणियट्टिसंजद-सुहुमसांपराइय खवगोवसामएसु धम्मज्झाणस्स पवुत्ती होदि त्ति जिणोवएसादो ।।

**–धवलायां - पु. १३, पृ. ७४ ।।**

B **मू०** **आज्ञापायविपाकसंस्थानविचयाय धर्म्यम् ।। ९-३६ ।।**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

वृ० xxx तस्मादनपेतं धर्म्यं ध्यानं चतुर्विकल्पमवसेयम् । तदविरत-देशविरत-प्रमत्ताऽ-प्रमत्तसंयतानां भवति ।।

**—तत्त्वार्थ. सर्वा. वृत्तौ ।।**

C मू० **आज्ञापायविपाकसंस्थानविचयाय धर्म्यम् ।। ९-३६ ।।**

वृ० xxx धर्म्यमप्रमत्तस्येति चेत्, न, पूर्वेषां विनिवृत्तिप्रसङ्गात् ।। १३ ।। कश्चिदाह- धर्म्यमप्रमत्तसंयतस्यैवेति, तन्न, किं कारणम्? पूर्वेषां विनिवृत्तिप्रसङ्गात् । असंयतसम्यग्दृष्टिसंयतासंयतप्रमत्तसंयतानामपि धर्म्यध्यानमिष्यते सम्यक्त्वप्रभवत्वात् । यदि धर्म्यमप्रमत्तस्यैवैत्युच्येत तर्हि; तेषां निवृत्तिः प्रसज्येत् । उपशान्तक्षीणकषाययोश्चेति चेत्, न, शुक्लाभावप्रसङ्गात् ।। १४ ।। कश्चिदाह—उपशान्तक्षीणकषाययोश्च धर्म्यं ध्यानं भवति न पूर्वेषामेवेति; तन्न; किं कारणम् ? शुक्लाभावप्रसङ्गात् । उपशान्तक्षीणकषाययोर्हि शुक्लध्यानमिष्यते तस्याभावः प्रसज्येत।

तदुभयं तत्रेति चेत्; न; पूर्वस्यानिष्टत्वात् । १५ । स्यादेतत् – उभयं धर्म्यं शुक्लं चोपशान्तक्षीणकषाययोरस्तीति? तन्न; किं कारणम् ? पूर्वस्यानिष्टत्वात् । पूर्वं हि धर्म्यं ध्यानं श्रेण्योर्नेष्यते आर्षे, पूर्वेषु चेष्यते । xxx ।। ९-३६ ।।

आह – यदि धर्म्यध्यानमविरतदेशविरतप्रमत्ताप्रमत्तसंयतान्तानां भवति, अथ शुक्लध्यानं कस्येति? xxx ।।

**—तत्त्वार्थवार्त्तिके ।।**

D **तदप्रमत्ततालम्बं, स्थितिमान्तर्मुहूर्तिकीम् । दधानमप्रमत्तेषु, परां कोटिमधिष्ठितम् ।। १५५ ।।**
**सद्दृष्टिषु यथाम्नायं, शेषेष्वपि कृतस्थितिः । प्रकृष्टशुद्धिमल्लेश्या-त्रयोपोद्बलबृंहितम् ।। १५६ ।।**

**—आदिपुराणे, पर्व २१ ।।**

E **अनपेतस्य धर्म्यस्य, धर्मतो दशभेदतः। चतुर्थः पञ्चमः षष्ठः, सप्तमश्च प्रवर्तकः ।। १७ ।।**

**—अमि. श्रावकाचारे, परि. १५ ।।**

F **तत्रासन्नीभवन्मुक्तिः, किञ्चिदासाद्य कारणम् । विरक्तः कामभोगेभ्य-स्त्यक्तसर्वपरिग्रहः ।। ४१ ।।**
**अभ्येत्य सम्यगाचार्यं, दीक्षां जैनेश्वरीं श्रितः । तपःसंयमसम्पन्नः, प्रमादरहिताशयः ।। ४२ ।।**
**सम्यग्निर्णीतजीवादि-ध्येयवस्तुव्यवस्थितिः । आर्त्तरौद्रपरित्यागा-ल्लब्धचित्तप्रसत्तिकः ।। ४३ ।।**
**मुक्तलोकद्वयापेक्षः, षोढाऽशेषपरिषहः । अनुष्ठितक्रियायोगो, ध्यानयोगे कृतोद्यमः ।। ४४ ।।**
**महासत्वः परित्यक्त-दुर्लेश्याऽशुभभावनः । इतीदृग्लक्षणो ध्याता, धर्मध्यानस्य सम्मतः ।। ४५ ।।**
**अप्रमत्तः प्रमत्तश्च, सद्दृष्टिर्देशसंयतः । धर्मध्यानस्य चत्वार-स्तत्त्वार्थे स्वामिनः स्मृताः ।। ४६ ।।**
**मुख्योपचारभेदेन, धर्मध्यानमिह द्विधा । अप्रमत्तेषु तन्मुख्य-मितरेष्वौपचारिकम् ।। ४७ ।।**

**—तत्त्वानुशासने ।।**

G **मुख्योपचारभेदेन, द्वौ मुनी स्वामिनौ मतौ । अप्रमत्तप्रमत्ताख्यौ, धर्मस्यैतौ यथायथम् ।। २५ ।।**
**अप्रमत्तः सुसंस्थानो, वज्रकायो वशी स्थिरः । पूर्ववित्संवृत्तो धीरो, ध्याता संपूर्णलक्षणः ।। २६ ।।**
**श्रुतेन विकलेनापि, स्वामी सूत्रे प्रकीर्त्तितः । अधः श्रेण्यां प्रवृत्तात्मा, धर्मध्यानस्य सुश्रुतः ।। २७ ।।**

**—ज्ञानार्णवे, सर्ग २८ ।।**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

H सद्दृष्टिज्ञानवृत्तानि, मोहक्षोभविवर्जितः । यश्चात्मनो भवेद् भावो, धर्मः शर्मकरो हि सः ।। १४ ।।
अनपेतं ततो धर्माद्, धर्मध्यानमनेकधा । शमकक्षपकयोः प्राक्, श्रेणिभ्यामप्रमत्तके ।। १५ ।।
मुख्यं धर्म्यं प्रमत्तादि-त्रये गौणं हि तत्प्रभो । धर्म्यमेवातिशुद्धं स्या-च्छुक्लं श्रेण्योश्चतुर्विधम् ।। १६ ।।
—ज्ञानार्णवे, सर्ग -२५ ।।

### तात्पर्यार्थः

### धर्मध्यानस्वामिविचारणा

**श्रीतत्त्वार्थसूत्रस्य सिद्धसेनीय-हारीभद्रवृत्त्योः**, "अप्रमत्तादारभ्य क्षीणमोहगुणस्थानकवर्तिनो महात्मानो धर्मध्यानाधिकारिणो भवन्ति" इति निरूपितम् ।

**गुणस्थानकक्रमारोहे**, "षट्कर्म-प्रतिमा-ऽणुव्रतपालनेन प्रादुर्भूतं मध्यमधर्मध्यानं पञ्चमगुणस्थानके गौणत्वेन तथा देशविरतिपरिणामविशुद्ध्या तद् अधिकाधिकं भवति", "षष्ठगुणस्थानके प्रमादसत्त्वाद् मध्यमधर्मध्यानस्य गौणता निरालम्बनध्यानस्यासंभवश्च" तथा "अप्रमत्तावस्थायां तु उत्कृष्टमध्यमधर्मध्यान-निरालम्बनध्याने भवतः" इति दर्शितम् ।

**योगबिन्दौ**, "अध्यात्मभावनायोगौ व्यवहारेण अपुनर्बन्धकाविरतसम्यग्दृष्टीन् तथा निश्चयेन तौ चारित्रिण एव भवतः, ध्यानादियोगास्तु उभयापेक्षया चारित्रिण एव उत्तरोत्तरशुद्धिमपेक्ष्य तात्त्विका एव भवन्ति" इति ज्ञापितम् ।

**दिगम्बराम्नायानुसारिषु तत्वार्थसर्वार्थसिद्धि-श्रावकाचार-तत्वार्थवार्तिकेषु**, चतुर्थगुणस्थान-कादारभ्य सप्तमपर्यन्तं धर्म्यं स्वीकृतम् । वार्तिके विशेषतो निरूपितम्, "धर्म्यं सम्यक्त्वेनोद्भूतत्वाद् अविरतादयः अपि तस्य स्वामिनः भविष्यन्ति, न तु अप्रमत्ताः एव । तथा उपशान्तक्षीणकषाययोः धर्म्यं न भवति, शुक्लाभावप्रसङ्गात्, यतः आर्षे श्रेण्योः धर्म्यं नेष्यते ।"

**आदिपुराण-तत्त्वानुशासन-ज्ञानार्णवादिषु**, तात्त्विकधर्मध्यानस्य स्वामिन अप्रमत्ताः तथा औपचारिकस्य तस्य स्वामिनः प्रमत्तादय इति देशितम् ।

**ध्यानस्तवे**, धर्मध्यानं प्रधानतः अप्रमत-उपशामक-क्षपकान् तथा गौणतः प्रमत्तादीन् संभवति इति स्पष्टीकृतम् ।

**षट्खंडागम-धवलाटीकायां**, अविरतादारभ्य क्षीणमोहपर्यन्ता धर्मध्यानस्य स्वामिनो भवन्ति इति कथितम् ।

**तन्निष्कर्षोऽयम्**

निश्चयनयेन, तात्त्विकधर्मध्यानाधिकारिण आऽप्रमत्तात् क्षीणमोहपर्यन्ता घटन्ति । व्यवहारनयेन, तात्त्विकधर्मध्यानाधिकारिणः प्रधानरूपेण त एव तथा देशविरतसर्वविरतयोः प्रमाददशायुक्तत्वाद् गौणरूपेण तात्त्विकधर्मध्यानाधिकारिणौ संभवतः । अविरतस्तु व्यवहारनयेनापि औपचारिकः एव अधिकारी भविष्यति ।

पुनः सालम्बननिरालम्बनध्यानद्वयसत्ता अप्रमत्तादिगुणस्थानकेषु, किन्तु प्रमत्तादिगुणस्थानकेषु सालम्बनमेव न तु निरालम्बनध्यानम् ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

उक्ता धर्मध्यानस्य ध्यातारः, साम्प्रतं शुक्लध्यानस्याप्याद्यभेदद्वयस्याविशेषेण एत एव यतो ध्यातार इत्यतो मा भूत्पुनरभिधेया भविष्यन्तीति लाघवार्थं चरमभेदद्वयस्य [a] प्रसङ्गतस्तानेवाभिधित्सुराह –

**एतेच्चिय[१] पुव्वाणं पुव्वधरा सुप्पसत्थसंघयणा ।**
**दोण्ह सजोगाजोगा सुक्काण पराण केवलिणो ।।६४।।**

**एतेच्चिय० गाहा ।। एत एव** येऽनन्तरमेव धर्मध्यानध्यातार उक्ताः **पूर्वयोः** इत्याद्ययोर्द्वयोः शुक्लध्यानभेदयोः पृथक्त्ववितर्कसविचारमेकत्ववितर्कमविचारमित्यनयोः, ध्यातार इति गम्यते, अयं पुनर्विशेषः – **पूर्वधराश्च**तुर्दशपूर्वविदस्तदुपयुक्ताः, इदं च पूर्वधरविशेषणमप्रमादवतामेव वेदितव्यं न निर्ग्रन्थानाम्, माषतुषमरुदेव्यादीनामपूर्वधराणामपि तदुपपत्तेः, **सुप्रशस्तसंहनना** इत्याद्यसंहननयुक्ताः, इदं पुनरोघत एव विशेषणमिति तथा **द्वयोः शुक्लयोः परयोः** उत्तरकालभाविनोः प्रधानयोर्वा सूक्ष्मक्रियानिवृत्ति-

---

१ A पढमं बीयं च सुक्कं, झायंती पुव्वजाणगा । उवसंतेहिं कसाएहिं, खीणेहि व महामुणी ।। ६ ।।
बीयस्स य ततियस्स य अंतरियाए केवलनाणं उप्पज्जति ।
दोण्णी सुत्तणाणीगा झाणा, दुवे केवलणाणिगा । खीणमोहा ज्झियायंती, केवली दोण्णि उत्तमे ।। ७ ।।

**–आवश्यकचूर्णौ** ।।

B मू० **शुक्ले चाद्ये ।। ९-३९ ।।**
भा० **शुक्ले चाद्ये ध्याने पृथक्त्ववितर्कैकत्ववितर्के चोपशान्तक्षीणकषाययोर्भवतः ।। ३९ ।।**
वृ० **शुक्ले चाद्ये** चेति । **शुक्ले ध्याने उपशान्तक्षीणकषाययोर्भवतः** । के पुनस्ते ? **पृथक्त्वैकत्ववितर्के** । x x x ।। ३९ ।।

**–तत्त्वार्थ. सिद्ध. वृत्तौ** ।।

मू० **पूर्वविदः ।। ९-४० ।।**
भा० **आद्ये शुक्ले ध्याने पृथक्त्ववितर्कैकत्ववितर्के पूर्वविदो भवतः ।। ४० ।।**
वृ० **पूर्वविदो** यौ उपशान्तक्षीणकषायौ तयो**र्भवतः** । सूत्रान्तरमिव व्याचष्टे, न तु परमार्थतः पृथक् सूत्रम् । पूर्वं प्रणयनात् पूर्वाणि चतुर्दश तद्विदः **पूर्वविदस्ते** भवन्ति नैकादशाङ्गविदः । एवमाद्यशुक्लध्यानद्वयस्य स्वामिनियमनं विहितम् ।। ४० ।।

**–तत्त्वार्थ. सिद्ध. वृत्तौ** ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

b c d
उपरतक्रियाऽप्रतिपातलक्षणयोर्यथासंख्यं **सयोगायोगाः केवलिनो** ध्यातार इति योगः [२] ।

C **मू०** **XXX शुक्ले चाद्ये पूर्वविदः ।। ९-३७ ।।**

**वृ०** वक्ष्यमाणेषु शुक्लध्यानविकल्पेषु **आद्ये शुक्लध्याने पूर्वविदो** भवतः श्रुतकेवलिन इत्यर्थः । चशब्देन धर्म्यमपि समुच्चीयते। तत्र 'व्याख्यानतो विशेषप्रतिपतिः' इति श्रेण्यारोहणात्प्राग्धर्म्यम्, श्रेण्योः शुक्ले इति व्याख्यायते ।। **—तत्त्वार्थ. सर्वा. वृत्तौ ।।**

D **अव०** शुक्लध्यानस्याधिकारिणं निरूपयति—

**इदमादिमसंहनना एवालं पूर्ववेदिनः कर्तुम् ।**
**स्थिरतां न याति चित्तं कथमपि यत् स्वल्पसत्त्वानाम् ।। २ ।।**

**वृ०** x x x **आदिमं** वज्रर्षभनाराच**संहननं** येषां ते तथा। सकलश्रुतात् पूर्वं प्रणयनात् पूर्वाणि, तानि विदन्तीत्येवंशीलाः **पूर्ववेदिनः** पूर्वधराः । इदं च प्रायिकम्, माषतुष-मरुदेव्यादीनामपूर्वधराणामपि शुक्लध्यानसंभवात् । आदिमसंहनना इत्यस्य **स्थिरतामि**त्यादिना हेतुरुक्तः ।। २ ।।

**अव०** इदमेव भावयति—

**धत्ते न खलु स्वास्थ्यं व्याकुलितं तनुमतां मनो विषयैः ।**
**शुक्लध्याने तस्मान्नास्त्यधिकारोऽल्पसाराणाम् ।। ३ ।।**

**वृ०** स्पष्टम् । यदाह—
"छिन्ने भिन्ने हते दग्धे देहे स्वमपि दूरगम् । प्रपश्यन् वर्ष-वातादिदुःखैरपि न कम्पते ।। १ ।।
न पश्यति तदा किञ्चिन्न श्रुणोति न जिघ्रति । स्पष्टं किञ्चिन्न जानाति लेप्यनिर्वृत्तमूर्त्तिवत् ।। २ ।।"
इति ।। ३ ।।

**अव०** ननु यद्यादिमसंहननानां शुक्लध्यानेऽधिकारस्तर्हीदानीं सेवार्तसंहननानां पुरुषाणां शुक्लध्यानोपदेशे कोऽवसरः? इत्याह—

**अनवच्छित्त्याऽऽम्नायः समागतोऽस्येति कीर्त्यतेऽस्माभिः ।**
**दुष्करमप्याधुनिकैः शुक्लध्यानं यथाशास्त्रम् ।। ४ ।।**

**वृ०** यद्यप्यैदंयुगीनानां न शुक्लध्यानेऽधिकारस्तथापि संप्रदायाविच्छेदार्थं तदुपदेश इत्यर्थः ।। ४ ।।
**—योगशास्त्रे, प्र. ११ ।।**

E **ध्याताऽयमेव शुक्लस्या-प्रमत्तः पादयोर्द्वयोः । पूर्वविद् योग्ययोगी च, केवली परयोस्तयोः ।। ६९ ।।**
**—अध्यात्मसारे, अ. १६ ।।**

२ A **अव०** अथ पश्चाच्छुक्लध्यानद्वयस्य कः स्वामीति तन्निर्दिदिक्षयोवाच—

**मू०** **परे केवलिनः** ।। ९-४१ ।।

**भा०** **परे द्वे शुक्ले ध्याने केवलिन एव भवतः, न छद्मस्थस्य ।। ४१ ।।**
**अत्राह-उक्तं भवता पूर्वे शुक्ले ध्याने परे शुक्ले ध्याने इति । तत् कानि तानीति ? अत्रोच्यते—**

**वृ०** परं च परं च **परे** सूत्रसन्निवेशमाश्रित्य सूक्ष्मक्रियमप्रतिपाति व्युपरतक्रियं चानिवर्ति ग्रहीतव्यम्, ते च **केवलिन एव** त्रयोदश चतुर्दशगुणस्थानक्रमेणैव **भवतः**। **छद्मस्थस्य** तु नैते जातुचिद् भवत इति x x x ।। **—तत्त्वार्थ. सिद्ध. वृत्तौ ।।**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

एवं च [e] गम्यते* – सुक्कज्झाणाइदुगं वोलीणस्स ततियमप्पत्तस्स एयाए झाणंतरियाए वट्टमाणस्स केवलणाणमुप्पज्जइ, केवली य सुक्कलेसोऽज्झाणी य जाव सुहुमकिरियमनियट्टि त्ति गाथार्थः ।।६४।।

उक्तमानुषङ्गिकम्, इदानीमवसरप्राप्त**मनुप्रेक्षाद्वारं** व्याचिख्यासुरिदमाह –

**[१] झाणोवरमेऽवि मुणी णिच्चमणिच्चाइचिं[a]तणापरमो ।**
**होइ सुभावियचित्तो धम्मज्झाणेण जो पुव्विं ।।६५।।**

**झाणो० गाहा ।।** इह **ध्यानं** धर्मध्यानमभिगृह्यते, तदु**परमेऽपि** [b] तद्विरामेऽपि **मुनिः** साधु**र्नित्यं** सर्वकाल**मनित्यादिचिन्तनापरमो भवति,** आदिशब्दादशरणैकत्व-संसारपरिग्रहः । एताश्च [c] चतस्रोऽनुप्रेक्षा भावयितव्याः –

---

* **गम्मए इति** गमनिका क्रियते । **–ध्यानशतकवृत्ति-विषमपदपर्याये ।।**

[१] A x x x **धम्मस्स णं झाणस्स चत्तारि अणुप्पेहाओ पं० तं०-एगाणुप्पेहा-अणिच्चाणुप्पेहा-असरणाणुप्पेहा-संसाराणुप्पेहा** x x x ।।

**–स्था. सूत्र-२४७, औप. सू.२०, भग. सू.८०३ ।।**

वृ० x x x **अथानुप्रेक्षा** उच्यन्ते – अन्विति-ध्यानस्य पश्चात्प्रेक्षणानि-पर्यालोचनान्यनुप्रेक्षाः,
तत्र 'एकोऽहं न च मे कश्चिन्नाहमन्यस्य कस्यचित् ।
न तं पश्यामि यस्याहं, नासौ भावीति यो मम ।। १ ।।"
इत्येवमात्मन **एकस्य** एकाकिनो असहायस्यानुप्रेक्षा-भावना **एकानुप्रेक्षा,** तथा—
"कायः सन्निहितापायः, सम्पदः पदमापदाम् । समागमाः सापगमाः, सर्व्वमुत्पादि भङ्गुरम् ।। १ ।।"
इत्येवं जीवितादेरनित्यस्यानुप्रेक्षा **अनित्यानुप्रेक्षेति,** तथा
"जन्मजरामरणभयैरभिद्रुते व्याधिवेदनाग्रस्ते ।
जिनवरवचनादन्यत्र नास्ति शरणं क्वचिल्लोके ।। १ ।।"
एवमशरणस्य-अत्राणस्यात्मनोऽनुप्रेक्षा **अशरणानुप्रेक्षेति,**
तथा-"माता भूत्वा दुहिता भगिनी भार्या च भवति संसारे ।
व्रजति सुतः पितृतां भ्रातृतां पुनः शत्रुताञ्चैव ।। १ ।।"
इत्येवं संसारस्य-चतसृषु गतिषु सर्वावस्थासु संसरणलक्षणस्यानुप्रेक्षा **संसारानुप्रेक्षेति** । x x x ।।

**–स्थानाङ्गसूत्रवृत्तौ ।।**

B **इमाओ पुण से चतारि अणुप्पेहाओ,** तं० अणिच्चताणुप्पेहा एवं असरणता०, एगत्ता०, संसाराणुप्पेहा। संसारसंगविजयनिमित्तमणिच्चताणुप्पेहमारभते, एवं धंमे थिरतानिमित्तं असरणगत्तं, संबंधिसंगविजयाय एगत्तं, संसारुव्वेगकारणा संसाराणुप्पेहं । **–आवश्यकचूर्णौ ।।**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

२ d
इष्टजनसम्प्रयोगर्द्धिविषयसुखसम्पदस्तथारोग्यम् ।
देहश्च यौवनं जीवितं च सर्वाण्यनित्यानि ।।१।।

जन्मजरामरणभयैरभिद्रुते व्याधिवेदनाग्रस्ते ।
जिनवरवचनादन्यत्र नास्ति शरणं क्वचिल्लोके ।।२।।

एकस्य जन्ममरणे गतयश्च शुभाशुभा भवावर्ते ।
तस्मादाकालिकहितमेकेनैवात्मनः कार्यम् ।।३।।

---

C **अनित्यत्वाद्यनुप्रेक्षा, ध्यानस्योपरमेऽपि हि ।**
**भावयेन्नित्यमभ्रान्तः, प्राणा ध्यानस्य ताः खलु ।। ७० ।।** —**अध्यात्मसारे, अ. १६ ।।**

२ A **अव०** तश्चेच्छता भावना भाव्या इत्याह—

**भावयितव्यमनित्यत्वमशरणत्वं तथैकताऽन्यत्वे ।**
**अशुचित्वं संसारः, कर्मास्रवसंवरविधिश्च ।। १४९ ।।**

**वृ०** **भावयितव्यं** चिन्तनीयम्, किं तत् ? **अनित्यत्वं** १, तथा **अशरणत्वं** जन्माद्यभिभूतस्य नास्ति त्राणं २, **तथैकताऽन्यत्वे** तत्रैकत्वम्- एक एवाहमित्यादि ३, अन्यत्वम्–अन्य एवाहं स्वजनेभ्यः ४, **अशुचित्वं** शुक्रशोणितादीनामादि(द्युत्तर)कारणानामशुचिरूपत्वात् ५, **संसार** इति भवभावना **माता भूत्वा** [गा. १५६] इत्यादिका ६, **कर्मास्रवश्च संवरश्च** तयोर्विधिः, तत्र कर्मास्रवविधिना आस्रवद्वाराणि विवृतानि कर्मास्रवन्तीति भावयेत् ७, संवरविधेश्चास्रवद्वाराणां स्थगनमिति ८ ।। १४९ ।।

**निर्जरणलोकविस्तरधर्मस्वाख्याततत्त्वचिन्ताश्च ।**
**बोधेः सुदुर्लभत्वं च भावना द्वादश विशुद्धाः ।। १५० ।।**

**वृ०** सुष्ठ्वाख्यातः स्वाख्यातो धर्मश्चासौ स्वाख्यातश्च, **निर्जरणं लोकविस्तरश्च धर्मस्वाख्यातश्च** तेषां **तत्त्वचिन्ताश्च,** तत्र निर्जरणं तपसा कर्मक्षपणं ९, लोकविस्तरो-लोकायामादिः १०, धर्मस्वाख्यातश्च-शोभनोऽयं धर्मो भव्यहिताय जिनैः कथितः, एषां तत्त्वचिन्तनानि ११, **बोधेः सुदुर्लभत्वं चेति** १२ **भावना द्वादश विशुद्धा** इति स्पष्टम् ।। १५० ।।

**अव०** तत्रानित्यत्वमाह—

**इष्टजनसम्प्रयोगर्द्धिविषयसुखसम्पदस्तथाऽऽरोग्यम् ।**
**देहश्च यौवनं जीवितं च सर्वाण्यनित्यानि ।। १५१ ।।**

**वृ०** **इष्टजनसम्प्रयोगश्च ऋद्धिसम्पच्च विषयसुखसम्पच्च,** सम्पच्छब्दः प्रत्येकं सम्बध्यते, ता अनित्याः, **तथा आरोग्यादीनि** सर्वाण्यनित्यानीति ।। १५१ ।।

**अव०** अशरणभावनामाह—

**जन्मजरामरणभयैरभिद्रुते व्याधिवेदनाग्रस्ते ।**
**जिनवरवचनादन्यत्र, नास्ति शरणं क्वचिल्लोके ।। १५२ ।।**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अन्योऽहं स्वजनात्परिजनाच्च विभवाच्छरीरकाच्चेति ।
यस्य नियता मतिरियं न बाधते तं हि शोककलिः ।।४।।

अशुचिकरणसामर्थ्यादाद्युत्तरकारणाशुचित्वाच्च ।
देहस्याशुचिभावः स्थाने स्थाने भवति चिन्त्यः ।।५।।

माता भूत्वा दुहिता भगिनी भार्या च भवति संसारे ।
व्रजति सुतः पितृतां भ्रातृतां पुनः शत्रुतां चैव ।।६।।

---

वृ० **लोके क्वचिन्नास्ति शरणमिति** योगः । कीदृशे ? **अभिद्रुते** अभिभूते। कैः ? **जन्मजरामरणेभ्यो भयानि** तैः, तथा **व्याधिवेदनाग्रस्ते** । ततः किं ? **नास्ति** न विद्यते । किं तत् ? **शरणं** त्राणम्, क्व ? **अन्यत्र** । कस्मात् ? **जिनवरवचनात्** सर्वज्ञागमादिति ।। १५२ ।।

अव० एकत्वभावनामाह—

**एकस्य जन्ममरणे, गतयश्च शुभाशुभा भवावर्ते ।**
**तस्मादाकालिकहित-मेकेनैवात्मनः कार्यम् ।। १५३ ।।**

वृ० **एकस्य** जीवस्य **जन्ममरणे** भवत इति शेषः । तथा **गतयश्च शुभाशुभाः**, तत्र देवमनुष्यगती शुभे नरकतिर्यग्गती अशुभे भवतः । क्व ? **भवावर्ते** संसारे पुनःपुनर्भ्रमणे । **तस्मादाकालिकं**-सदाभावि **हितं** पथ्य**मेकेनैव** जीवे**नात्मनः** स्वस्य **कार्यं** करणीयं तच्च हितं संयमानुष्ठानमित्यर्थ इति ।। १५३ ।।

अव० अन्यत्वभावनामाह—

**अन्योऽहं स्वजनात्परिजनाच्च विभवाच्छरीरकाच्चेति ।**
**यस्य नियता मतिरियं, न बाधते तं हि शोककलिः ।। १५४ ।।**

वृ० **न बाधते** न पीडयति, कः ? **शोककलिः** कलिकालस्वरूपं कम् ? **तं** जीवम् । **हि**शब्दः स्फुटार्थो **यस्य नियता** निश्चिता, काऽसौ ? **मतिः** बुद्धि**रियमे**वेति अन्यतोल्लेखेन, **अन्योऽहं स्वजनात्** पित्रादेः **परिजनाद्** दासादे**र्विभवात्** कनकादेः **शरीराद्** देहाद्, एतेभ्यो भिन्नोऽहमिति ।। १५४ ।।

अव० अशुचित्वमाह—

**अशुचिकरणसामर्थ्यादाद्युत्तरकारणाशुचित्वाच्च ।**
**देहस्याशुचिभावः, स्थाने स्थाने भवति चिन्त्यः ।। १५५ ।।**

वृ० **भवति** जायते **चिन्त्यः** चिन्तनीयः, कः ? **अशुचिभावः** जुगुप्सनीयत्वम्, क्व ? **स्थाने स्थाने**-शिरःकपालादिषु । कस्य ? **देहस्य** तनोः । कस्मात् ? **अशुचिकरणसामर्थ्यात्** शुचिनोऽपि द्रव्यस्य कर्पूरादेरशुचिकरणसामर्थ्यमस्त्येव । तथा **आद्युत्तरकारणाशुचित्वाच्च**, कारणशब्दस्य प्रत्येकं योजनाद् आदिकारणोत्तरकारणयोरशुचित्वात्, तत्रादिकारणं शुक्रशोणितादि उत्तरकारणं तु जनन्याऽभ्य-वहृतस्याहारस्य रसहरण्योपनीतस्य रसस्यास्वादनमत्यन्ताशुचिरिति ।। १५५ ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

मिथ्यादृष्टिरविरतः प्रमादवान् यः कषायदण्डरुचिः ।
तस्य तथास्रवकर्मणि यतेत तन्निग्रहे तस्मात् ।।७।।

या पुण्यपापयोरग्रहणे वाक्कायमानसी वृत्तिः ।
सुसमाहितो हितः संवरो वरददेशितश्चिन्त्यः ।।८।।

यद्वद्विशोषणादुपचितोऽपि यत्नेन जीर्यते दोषः ।
तद्वत्कर्मोपचितं निर्जरयति संवृतस्तपसा ।।९।।

---

**अव०** संसारभावनामधिकृत्याह—

**माता भूत्वा दुहिता, भगिनी भार्या च भवति संसारे ।**
**व्रजति सुतः पितृतां भ्रातृतां पुनः शत्रुतां चैव ।। १५६ ।।**

**वृ०** **माता भूत्वा दुहिता** पुत्रिका भवति । तथा **भगिनी च** सहोदरी **भार्या भवति** । क्व ? **संसारे ।** तथा **व्रजति** याति। **सुतः** पुत्रः । काम्? **पितृतां** जनकत्वं **भ्रातृतां** बन्धुत्वं **पुनः शत्रुतां** वैरित्वं **चैवे**ति ।। १५६ ।।

**अव०** आस्रवभावनामुररीकृत्याह—

**मिथ्यादृष्टिरविरतः, प्रमादवान् यः कषायदण्डरुचिः ।**
**तस्य तथाऽऽस्रवकर्मणि, यतेत तन्निग्रहे तस्मात् ।। १५७ ।।**

**वृ०** मिथ्यादर्शनादयः पञ्चापि पूर्वोक्ताः । **यच्छब्दः** पञ्चस्वपि योज्यः । ततो **मिथ्यादृष्टिर्यो** जीव स्तथा **अविरतः प्रमादवान्**। रुचिशब्दोऽपि प्रत्येकं योज्यः। ततः **कषायरुचिर्दण्डरुचिः। तस्य** जीवस्य **आस्रवकर्मणि** कर्मास्रवे सति, **तथा** तेन प्रकारेण **तन्निग्रहे** आस्रवनिग्रहे **यतेत** यत्नं कुर्वीत, यतिरिति शेषः । यत्तदोर्नित्याभिसम्बन्धाद् यथाऽऽस्रवविशेषा न भवन्तीत्यर्थः । कस्मात् ? **तस्माद्भा**वनाबलादिति ।। १५७ ।।

**अव०** संवरभावनामाह—

**या पुण्यपापयोरग्रहणे वाक्कायमानसी वृत्तिः।**
**सुसमाहितो हितः संवरो वरददेशितश्चिन्त्यः ।। १५८ ।।**

**वृ०** यत्तदोर्नित्याभिसम्बन्धात् **संवरः** आस्रवनिरोधलक्षण**श्चिन्त्यः** चिन्तनीयो भवति । **या** केत्याह - या **वृत्तिः** व्यापारः, पाठान्तरे गुप्तिः-गोपनम् । कीदृशी ? **वाक्कायमानसी,** एतद्भावात्, क्व? **अग्रहणे** अनुपादाने । कयोः? **पुण्यं** कर्म-सातादिद्विचत्वारिंशद्भेदं **पापं** कर्म-ज्ञानावरणीयादि द्व्यशीतिभेदम्, उभयमपि वक्ष्यमाणम्, ततो द्वन्द्वः, **तयोरग्रहणं** च संवृतास्रवद्वारस्य भवति, ततो न पुण्यमादत्ते, न पापमिति । कीदृशः संवरः ? **सुसमाहितः** सुष्ठ्वात्मन्यारोपितः । तथा **हित** आयत्यां तथा **वरदाः** तीर्थकरास्तै**र्देशितः** कथित इति समासः ।। १५८ ।।

**अव०** निर्जराभावनामाह—

लोकस्याधस्तिर्यग्, विचिन्तयेदूर्ध्वमपि च बाहल्यम् ।
सर्वत्र जन्ममरणे रूपिद्रव्योपयोगांश्च ।।१०।।

धर्मोऽयं स्वाख्यातो जगद्धितार्थे जिनैर्जितारिगणैः ।
येऽत्र रतास्ते संसारसागरं लीलयोत्तीर्णाः ।।११।।

---

**यद्वद्विशोषणादुपचितोऽपि यत्नेन जीर्यते दोषः ।**
**तद्वत् कर्मोपचितं निर्जरयति संवृतस्तपसा ।। १५९ ।।**

**वृ०** **यद्वद्** यथा **शोषणाद्** लङ्घनादिकाद् **यत्नेन** महादरेण **उपचितोऽपि** पुष्टोऽपि ज्वरादिद्**दोषो जीर्यते** हानिं याति, दृष्टान्तः। दार्ष्टान्तिकमाह - **तद्वत्**-तथा **कर्म** ज्ञानावरणादिक**मुपचितं** बद्धादि **निर्जरयति** क्षपयति **संवृतो** निरुद्धास्रवद्वारो जीवः । केन ? **तपसा** अनशनादिनेति ।। १५९ ।।

**अव०** लोकभावनामाह—

**लोकस्याधस्तिर्यग्, विचिन्तयेदूर्ध्वमपि च बाहल्यम् ।**
**सर्वत्र जन्ममरणे, रूपिद्रव्योपयोगांश्च ।। १६० ।।**

**वृ०** **लोकस्य** जीवाजीवाधारक्षेत्रस्**याधस्तिर्यगूर्ध्वमपि च बाहल्यं** विस्तरं **विचिन्तयेत्** । तत्राधः सप्तरज्जुप्रमाणो लोकः, तिर्यग् रज्जुप्रमाणः, ऊर्ध्वं ब्रह्मलोके पञ्चरज्जुप्रमाणः, पर्यन्ते रज्जुप्रमाणः, **च**-शब्दादुर्ध्वाधश्चतुर्दशरज्जुप्रमाणः। **सर्वत्र जन्ममरणे** समनुभूते, नास्त्येकोऽप्याकाशप्रदेशो यत्र न जातं न मृतं वा मयेति । **रूपिद्रव्योपयोगांश्च** रूपाणि च तानि द्रव्याणि च - परमाणुप्रभृतीन्यनन्ता-नन्तस्कन्धपर्यवसानानि तेषामुपयोगाः - परिभोगा मनोवाक्कायादिभिः कृतास्तांश्च । न च तैस्तृप्त इति चिन्तयेदिति ।। १६० ।।

**अव०** स्वाख्यातधर्मभावनामाह—

**धर्मोऽयं स्वाख्यातो जगद्धितार्थं जिनैर्जितारिगणैः ।**
**येऽत्र रतास्ते संसारसागरं लीलयोत्तीर्णाः ।। १६१ ।।**

**वृ०** इति व्यक्तम् ।। १६१ ।।

**अव०** दुर्लभबोधिकभावनामाह—

**मानुष्यकर्मभूम्यार्यदेशकुलकल्पताऽऽयुरुपलब्धौ ।**
**श्रद्धाकथकश्रवणेषु, सत्स्वपि सुदुर्लभा बोधिः ।। १६२ ।।**

**वृ०** **मानुष्यं** नरत्वं **कर्मभूमिः** भरतादि पञ्चदशधा **आर्यदेशो** मगधादिः **कुलम्** उग्रादि **कल्पता** नीरोगता **आयुः** दीर्घायुष्कं तेषां षण्णां कृतद्वन्द्वानामु**पलब्धिः** प्राप्तिस्तत्र, तथा **श्रद्धा** च धर्मजिज्ञासा **कथकश्च** आचार्यादिः **श्रवणं** च आकर्णनं तानि, तेष्वप्येतेषु नवस्वप्युत्तरोत्तरदुष्प्रापेषु **दुर्लभा बोधिः** दुष्प्रापः सम्यक्त्वलाभ इति ।। १६२ ।।

**—प्रशमरतौ ।।**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

मानुष्यकर्मभूम्यार्यदेशकुलकल्पतायुरुपलब्धौ ।
श्रद्धाकथकश्रवणेषु सत्स्वपि सुदुर्लभा बोधिः ।।१२।। [प्रशम. १५१-१६२] इत्यादिना ग्रन्थेन।

फलं चासां सचित्तादिष्वनभिष्वङ्ग-भवनिर्वेदाविति भावनीयम्। अथ किंविशिष्टोऽनित्यादिचिन्तनापरमो भवतीति ? अत आह - **सुभावितचित्तः** सुवासितान्तःकरणः, केन ? **धर्मध्यानेन** प्राग्निरूपितस्वरूपेण। **यः** कश्चित् **पूर्वम्** आदाविति गाथार्थः ।।६५।।

गत**मनुप्रेक्षाद्वारम्,** अधुना **लेश्याद्वार**प्रतिपिपादयिषयाह –

**होंति[१] कमविसुद्धाओ लेसाओ पीय-पम्म-सुक्काओ ।**
**धम्मज्झाणोवगयस्स तिव्व-मंदाइभेयाओ ।।६६।।**

**होंति० गाहा ।।** इह **भवन्ति** सञ्जायन्ते **क्रमविशुद्धाः** परिपाटिविशुद्धाः, काः ? **लेश्यास्ताश्च पीत-पद्म-शुक्लाः।** एतदुक्तं भवति-पीतलेश्यायाः पद्मलेश्या विशुद्धा, तस्या अपि शुक्ललेश्येति क्रमः। कस्यैता भवन्ति ? अत आह – **धर्मध्यानोपगतस्य**

---

[१] A तेजोपम्हासुक्कालेसाओ तिण्णि अण्णतरिगाओ । उववातो कप्पतीते कप्पंमि व अण्णतरगंमि ।। ८।।
धम्मज्झाणं झियायंतो, सुक्कलेसाए वट्टती । विक्किट्ठगंमि ठाणंमि, सचरित्ती सुसंजतो ।। ९ ।।
एवं पम्हालेसाए मज्झियगंमि ठाणंमि, तेऊलेसाए कणिट्ठगंमि ठाणंमि ।
कोवनिग्गहसंजुत्तो, सुक्कलेसाणुरंजितो, धम्मझाणं झियायंतो, देवयत्तं निगच्छती ।। १० ।। ति।
एवं माणमायालोभनिग्गहेऽवि, एवं पम्हाएवि, तेऊएवि लेसाए । —**आवश्यकचूर्णौ** ।।

B **अव०** धर्म्यध्यानस्यैव स्वरूपविशेषमाह—
**धर्म्यध्याने भवेद् भावः क्षायोपशमिकादिकः ।**
**लेश्याः क्रमविशुद्धाः स्युः पीत-पद्म-सिताः पुनः ।। १६ ।।**
**वृ०** **क्षायोपशमिकादिक** इत्यादिग्रहणादौपशमिकस्य क्षायिकस्य च ग्रहणम्, न त्वौदयिकस्य । यदाह- "धर्म्यमप्रमत्तसंयतस्य उपशान्त-क्षीणकषाययोश्च ।" [तत्त्वार्थ० ९/३७-३८]
**धर्म्यध्याने** च **क्रमेण विशुद्धास्तिस्रो लेश्या** भवन्ति, तद्यथा-**पीतलेश्या,** ततोऽपि विशुद्धा **पद्मलेश्या,** ततोऽपि विशुद्धतरा **शुक्ललेश्येति** ।। १६ ।। —**योगशास्त्रे, प्र. १० ।।**

C **तीव्रादिभेदभाजः स्युर्लेश्यास्तिस्त्र इहोत्तराः । लिङ्गान्यत्राऽऽगमश्रद्धा विनयः सद्गुणस्तुतिः ।। ७१ ।।**
**—अध्यात्मसारे, अ. १६ ।।**

D **पीता पद्मा च शुक्ला च लेश्यात्रयमिति स्मृतम् । धर्मस्य क्रमशः शुद्धं कैश्चिच्छुक्लैव केवला ।। १९० ।।**
**धर्मध्यानस्य विज्ञेया स्थितिश्चान्तर्मुहूर्तिकी । क्षायोमशमिको भावो लेश्या शुक्लैव केवला ।। १९१ ।।**
—ध्यानदीपिकायाम् ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

धर्मध्यानयुक्तस्येत्यर्थः, किंविशिष्टाश्चैता भवन्त्यत आह-**तीव्र-मन्दादिभेदा** इति, तत्र तीव्रभेदाः पीतादिस्वरूपेष्वन्त्याः, मन्दभेदास्त्वाद्याः, आदिशब्दान्मध्यमपक्षपरिग्रहः, अथवौघत एव परिणामविशेषात्तीव्र[b]मन्दादिभेदा इति गाथार्थः ।।६६।।

उक्तं **लेश्याद्वारम्,** इदानीं **लिङ्गद्वारं** विवृण्वन्नाह -

**[१]आगम-उवएसाऽऽणा-णिसग्गओ जं जिणप्पणीयाणं ।**
**भावाणं सद्दहणं धम्मज्झाणस्स तं लिंगं ।।६७।।**
**[२]जिणसाहुगु[a]णुक्कित्तण-पसंसणा-विणय-दाणसंपण्णो ।**
**सुअ-सीलसंजमरओ धम्मज्झाणी मुणेयव्वो ।।६८।।**

---

[१] A x x x **धम्मस्स णं झाणस्स चत्तारि लक्खणा पं० तं० आणारूई-णिसग्गरुई-सुत्तरूई ओगाढरूती... ।।**
**—स्था. सू.-२४७, औप. सू.-२०, भग. सू. ८०२ ।।**

वृ० x x x एतल्लक्षणान्याह—**आणारुइ**त्ति आज्ञा-सूत्रव्याख्यानं निर्युक्त्यादि तत्र तया वा रुचिः-श्रद्धानं आज्ञारुचिः, एवमन्यत्रापि, नवरं **निसर्गः** स्वभावोऽनुपदेशस्तेन, तथा **सूत्रम्** आगमस्तत्र तस्माद्वा, तथा अवगाहनमवगाढम्-द्वादशाङ्गावगाहो विस्तराधिगम इति सम्भाव्यते तेन रुचिः अथवा ओगाढत्ति साधुप्रत्यासन्नीभूतस्तस्य साधूपदेशाद्रुचिः,

उक्तं च – [ध्यानशतके] "आगम-उवएसाऽऽणानिसग्गओ जं जिणप्पणीयाणं ।
भावाणं सद्दहणं धम्मज्झाणस्स तं लिंगं ।। ६७ ।।"

इति, तत्त्वार्थश्रद्धानरूपं सम्यक्त्वं धर्मस्य लिङ्गमिति हृदयं x x x ।।

**—स्थानाङ्गसूत्रवृत्तौ ।।**

B **लक्खणाणि इमाणि चत्तारि**-आणारुई, निसग्गरुई, सुत्तरुई, ओगाहरुई। आणारुई-तित्थगराणं आणं पसंसति, निसग्गरुई- सभावतो जिणप्पणीए भावे रोयति, सुत्तरुई-सुत्तं पढंतो संवेगमावज्जति, ओगाहणारुई-णयवादभंगगुविलं सुत्तमत्थतो सोतूण संवेगमावन्नसद्धो झायति ।

**—आवश्यकचूर्णौ ।।**

[२] A **तीव्रादिभेदभाजः स्यु-र्लेश्यास्तिस्र इहोत्तराः । लिङ्गान्यत्राऽऽगमश्रद्धा, विनयः सद्गुणस्तुतिः ।। ७१ ।।**
**—अध्यात्मसारे, अ. १६ ।।**

B **अर्हदादिगुणीशानां, नतिं भक्तिं स्तुतिं स्मृतिम् । धर्मानुष्ठानदानादि, कुर्वन् धर्मीति लिङ्गतः ।। १९२ ।।**
**—ध्यानदीपिकायाम् ।।**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

इह[3] **आगमो-पदेशा-ऽऽज्ञा-निसर्गतो यज्जिनप्रणीतानां** तीर्थकर[b]प्ररूपितानां

---

३ इत्थं सम्यक्त्वस्वरूपमभिधाय तद्भेदानाह-

**निस्सग्गुवएसरुई आणारुइ सुत्तबीयरुइमेव। अभिगमवित्थाररुई किरिया संखेवधम्मरुई ।।१६।।**

वृ० '**निसग्गुवएसरुति**'त्ति रुचिशब्दः प्रत्येकं योज्यते, ततो **निसर्गः** स्वभावस्तेन रुचिः तत्त्वाभिलाषरूपाऽस्येति निसर्गरुचिः, **उपदेशो** गुर्वादिना कथनं तेन रुचिर्यस्येत्युपदेशरुचिः, **आज्ञा** सर्वज्ञवचनात्मिका तया रुचिर्यस्य स तथा '**सुत्तबीयरूइमेव**'त्ति इहापि रुचिशब्दस्य प्रत्येकमभिसम्बन्धात् **सूत्रेण** आगमेन रूचिर्यस्य स सूत्ररुचिः, बीजमिव **बीजं** यदेकमप्यनेकार्थप्रबोधोत्पादकं वचस्तेन रुचिर्यस्य स बीजरुचिः, अनयोः समाहारद्वन्द्वः, **एवेति** समुच्चये, **अभिगमो** ज्ञानं **विस्तारो** व्यासस्ताभ्याम्, प्रत्येकं रुचिशब्दो योज्यते, ततोऽभिगमरुचिविस्ताररुची इति, तथा **क्रिया** अनुष्ठानं **सङ्क्षेपः** सङ्ग्रहो **धर्मः** श्रुतधर्मादिस्तेषु रुचिर्यस्येति, प्रत्येकं रुचिशब्दसम्बन्धात् क्रियारुचिर्धर्मरुचिः सङ्क्षेपरुचिष्टा भवति विज्ञेय इति शेषः, यच्चेह सम्यक्त्वस्य जीवान्यत्वेनाभिधानं तद्गुणगुणिनोः कथञ्चिदनन्यत्व-ख्यापनार्थमिति सूत्रसङ्क्षेपार्थः ।। व्यासार्थं तु स्वत एवाह सूत्रकृत्–

**भूअत्थेणाहिगया जीवाऽजीवा य पुण्ण पावं च । सहसंमुइआ आसवसंवरु रोएइ उ निसग्गो ।।१७।।**

**जो जिणदिट्ठे भावे चउव्विहे सद्दहाइ सयमेव। एमेव नन्नहत्ति य निस्सग्गरुइत्ति नायव्वो ।।१८।।**

**एए चेव उ भावे उवइट्ठे जो परेण सद्दहइ । छउमत्थेण जिणे व उवएसरुइत्ति नायव्वो ।।१९।।**

**रागो दोसो मोहो अन्नाणं जस्स अवगयं होइ। आणाए रोयंतो सो खलु आणारुईनाम ।।२०।।**

**जो सुत्तमहिज्जंतो सुएण ओगाहई उ संमतं । अंगेण बाहिरेण व सो सुत्तरुइत्ति नायव्वो ।।२१।।**

**एगेण अणेगाइं पयाइं जो पसरई उ सम्मत्तं । उदयव्व तिल्लबिंदू सो बीयरुइति नायव्वो ।।२२।।**

**सो होइ अभिगमरुई सुअनाणं जस्स अत्थओ दिट्ठं । इक्कारस अंगाइं पइण्णगं दिट्ठिवाओ य ।।२३।।**

**दव्वाण सव्वभावा सव्वपमाणेहिं जस्स उवलद्धा । सव्वाइं नयविहीहि य वित्थाररुइत्ति नायव्वो ।।२४।।**

**दंसणनाणचरित्ते तवविणए सच्चसमिइगुत्तीसु। जो किरियाभावरुई सो खलु किरियारुई नाम ।।२५।।**

**अणभिग्गहियकुदिट्ठी संखेवरुइत्ति होइ नायव्वो। अविसारओ पवयणे अणभिग्गहिओ अ सेसेसु ।।२६।।**

**जो अत्थिकायधम्मं सुयधम्मं खलु चरित्तधम्मं च । सद्दहइ जिणाभिहियं सो धम्मरुइत्ति नायव्वो ।।२७।।**

वृ० भूतः सद्भूतोऽवितथ इति यावत् तथाविधोऽर्थो विषयो यस्य तद्भूतार्थं ज्ञानमिति गम्यते तेन, भावप्रधानत्वाद्वा निर्देशस्य, **भूतार्थत्वेन** सद्भूता अमी अर्था इत्येवंरूपेण**अभिगता** अधिगता वा परिच्छिन्ना येनेति गम्यते, **जीवाजीवा**द्योक्तरूपाः **पुण्यं पापं च**, कथममी अधिगता इत्याह – **सहसंमुइ**अत्ति सोपस्कारत्वात्सूत्रत्वाच्च सहात्मना या संयता मतिः सहसंमति, कोऽर्थः?– परोपदेशनिरपेक्षतया जातिस्मरणप्रतिभादिरूपया, **आसवसंवरे** ात्ति आश्रवसंवरौ, चशब्दोऽनुक्तबन्धादिसमुच्चये, ततो बन्धादयष्टा, तथा **रोचते** श्रद्धत्ते, **तु**शब्दस्यैवकारार्थत्वाद्रोचत एव योऽन्यस्याश्रुतत्वादनन्तरन्यायेनाधिगतान् जीवाजीवादीनेव **निसर्ग** इति निसर्गरुचिर्विज्ञेयः, स इति शेषः।।१७।।

अमुमेवार्थं पुनः स्पष्टतरमेवाह - **यः जिनदृष्टान्** तीर्थकरोपलब्धान् **भावान्** जीवादिपदार्थान् **चतुर्विधान्**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**भावानां** द्रव्यादिपदार्थानाम् [c]**श्रद्धानम्** अवितथा एत इत्यादिलक्षणं **धर्मध्यानस्य** [d]**तल्लिङ्गमिति** तत्त्वश्रद्धानेन लिङ्ग्यते धर्म[e]ध्यानीति, इह **चागमः** सूत्रमेव, तदनुसारेण

द्रव्यक्षेत्रकालभावभेदतो नामादिभेदतो वा चतुष्प्रकारान् **श्रद्दधाति** तथेति प्रतिपद्यते **स्वयमेव** परोपदेशं विना, श्रद्धानोल्लेखमाह – '**एमेय**'त्ति एवमेतद्यथा जिनैर्दृष्टं जीवादि, **नान्यथेति** नैतद्विपरीतं **चः** समुच्चये, स ईदृ**ग्निसर्गरुचिरिति ज्ञातव्यः**, निसर्गेण रुचिरस्येतिकृत्वा ।।१८।।

उपदेशरुचिमाह – **एतांश्चैवा**नन्तरोक्तान् (**तुः** पूरणे) **भावान्** जीवादीन् पदार्थान् **उपदिष्टान्** कथितान् **परेण** अन्येन **श्रद्दधाति**, कीदृशा परेण?– छादयतीति छद्म-घातिकर्मचतुष्टयं तत्र तिष्ठति **छद्मस्थः** अनुत्पन्नकेवल**स्तेन**, जयति रागादीनिति **जिनः**, औणादिको नक् तेन चोत्पन्नकेवलज्ञानेन तीर्थकृदादिना, छद्मस्थस्य तु प्रागुपन्यासस्तत्पूर्वकत्वाज्जिनस्य प्राचुर्येण वा तथाविधोपदेष्टृणाम्, स ईदृक् किमित्याह–**उपदेशरुचिरिति ज्ञातव्यः** उपदेशेन रुचिरस्येति हेतोः ।।१९।।

आज्ञारुचिमाह – **रागः** अभिष्वङ्गः **द्वेषः** अप्रीतिः **मोहः** शेषमोहनीयप्रकृतयः **अज्ञानं** मिथ्याज्ञानरूपं **यस्य अपगतं नष्टं भवति**, सर्वथा चास्यैतदपगमासम्भवाद्देशत इति गम्यते, अपगतशब्दश्चा लिङ्गविपरिणामतो रागादिभिः प्रत्येकमभिसम्बध्यते, एतदपगमाच्च **आणाएत्ति** अवधारणफलत्वाद्वाक्यस्य आज्ञयैव आचार्यादिसम्बन्धिन्या **रोचमानः** क्वचित्कुग्रहाभावाज्जीवादि तथेति प्रतिपद्यमानो माषतुषादिवत् **स खलु** निश्चित**माज्ञारुचिर्नामे**त्यभ्युपगमे, ततश्चाज्ञारुचिरित्यभ्युपगन्तव्यः, आज्ञया रुचिरस्य यतः ।।२०।।

सूत्ररुचिमाह–**यः सूत्रम्** आगमम् **अधीयानः** पठन् **श्रुतेन** इति सूत्रेणाधीयमानेन **अवगाहते** प्राप्नोति **तुः** पूरणे **सम्यक्त्वम्**, कीदृशा श्रुतेन? **अङ्गेन** आचारादिना **बाह्येन** अनङ्गप्रविष्टेनोत्तराध्ययनादिना वा, **वा** विकल्पे, **सः** उक्तलक्षणो गोविन्दवाचकवत् **सूत्ररुचिरिति ज्ञातव्यः**, सूत्रहेतुकत्वादस्य रुचेः ।।२१।।

बीजरुचिमाह–**एकेन** प्रक्रमात्पदेन जीवादिना '**अणेगाइं पयाइं**'ति सुब्व्यत्ययाद् **अनेकेषु** बहुषु **पदेषु** जीवादिषु **यः प्रसरति** व्यापितया गच्छति **तुः** एवकारार्थः, प्रसरत्येव, **सम्यक्त्वमि**त्यनेन रुचिरत्रोपलक्षिता, तदभेदोपचारादात्माऽपि सम्यक्त्वमुच्यते, उपचारानिमित्तं च रुचिरूपेणैवात्मना प्रसरणम्, क्वेव कः प्रसरति?– **उदक इव तैलबिन्दुः**, यथोदकैकदेशगतोऽपि तैलबिन्दुः समस्तमुदकमाक्रामति तथा तत्त्वैकदेशोत्पन्नरुचिरप्यात्मा तथाविधक्षयोपशमवशादशेषतत्त्वेषु रुचिमान् भवति, **स** एवंविधो **बीजरुचिर्ज्ञातव्यः**, यथा हि बीजं क्रमेणानेकबीजानां जनकमेवमस्यापि रुचिर्विषयभेदतो भिन्नानां रुच्यन्तराणामिति ।।२२।।

अभिगमरुचिमाह– **स भवत्यभिगमरुचिः श्रुतज्ञानं येनार्थ्यत इत्यर्थः**– अभिधेयस्तमाश्रित्य **दृष्टम्** उपलब्धम्, किमुक्तं भवति? येन श्रुतज्ञानस्यार्थोऽधिगतो भवति, किं पुनस्तत् श्रुतज्ञानमित्याह-**एकादशाङ्गानि** आचारादीनि, प्रकीर्णकमिति जातावेकवचनं ततः **प्रकीर्णकानि** उत्तराध्ययनादीनि **दृष्टिवादः** परिकर्मसूत्रादि, अङ्गत्वेऽपि पृथगुपादानमस्य प्राधान्यख्यापनार्थम्, **च**शब्दादुपाङ्गान्यौपपातिकादीनि, अभिगमान्वितत्वादस्य रुचेः ।।२३।।

विस्ताररुचिमाह- **द्रव्याणां** धर्मास्तिकायादीनां **सर्वभावा** एकत्वपृथक्त्वाद्यशेषपर्यायाः **सर्वप्रमाणैः** अशेषैः प्रत्यक्षादिभि**र्यस्योपलब्धा** यस्य यत्र व्यापारस्तेनैव प्रमाणेन प्रतीताः '**सव्वाहिं**'ति सर्वैः समस्तैः **नयविधिभि**र्नैगमादिभेदैरमुं भावमयममुं वाऽयं नयभेद इच्छतीति, **चः** समुच्चये स ईदृग्

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**विस्ताररुचिरिति ज्ञातव्यः**, विस्तारविषयत्वेन ज्ञानस्य रुचेरपि तद्विषयत्वादस्य ज्ञानपूर्विका हि रुचिः, यत उक्तम्-" सद्दहइ जाणति जतो" ।।२४।।

क्रियारुचिमाह– दर्शनं च ज्ञानं च चरित्रं च **दर्शनज्ञानचरित्रं** तस्मिन् प्रागुक्तरूपे तथा **तपोविनये सत्याः** निरुपचरितास्ताश्च ताः **समितिगुप्तयश्च,** यदि वा सत्यं च–अविसंवादनयोगाद्यात्मकं समितिगुप्तयश्च सत्यसमितिगुप्तयस्तासु **यः क्रियाभावरुचिः**, किमुक्तं भवति?– दर्शनाद्याचारानुष्ठाने यस्य भावतो रुचिरस्ति **सः खलु** निश्चितं **क्रियारुचिः, नामिति** प्रकाशम्, भण्यत इति शेषः, इह च चारित्रान्तर्गतत्वेऽपि तपःप्रभृतीनां पुनरुपादानं विशेषत एषां मुक्त्यङ्गत्वख्यापनार्थम् ।।२५।।

सङ्क्षेपरुचिमाह– **अनभिगृहीता** अनङ्गीकृता **कुदृष्टिः** सौगतमतादिरूपा येन स तथा **सङ्क्षेपरुचिरिति भवति ज्ञातव्यः, अविशारदः** अकुशलः **प्रवचने** सर्वज्ञशासने '**अणभिग्गहिओ य सेसेसु**'त्ति अविद्यमानमभीति– आभिमुख्येन गृहीतं ग्रहणं-ज्ञानमस्येत्य**नभिगृहीतः** अनभिज्ञ इत्यर्थः, **चः** समुच्चये, अनभिगृहीतश्च के- त्याह– **शेषेषु** कपिलादिप्रणीतप्रवचनेषु, संभवति हि जिनप्रवचनानभिज्ञोऽपि शेषप्रवचनानभिज्ञ इति तद्व्यवच्छेदार्थमेतत्, अयमाशयः– य उक्तविशेषणः सङ्क्षेपेणैव चिलातीपुत्रवत्प्रशमादिपदत्रयेण तत्त्वरुचिमवाप्नोति स सङ्क्षेपरुचिरुच्यते ।।२६।।

धर्मरुचिमाह–**योऽस्तिकायानां** धर्मादीनां **धर्मो** गत्युपष्टम्भादिरस्तिकायधर्मस्तं जातावेकवचनम्, **श्रुतधर्मम्** अङ्गप्रविष्टाद्यागमस्वरूपं **खलु** वाक्यालङ्कारे **चारित्रधर्मं वा** सामायिकादि, चस्य वार्थत्वात्, **श्रद्दधाति** तथेति प्रतिपद्यते **जिनाभिहितं** तीर्थकृदुक्तं **स धर्मरुचिरिति ज्ञातव्यः**, धर्मेषु–पर्यायेषु धर्मे वा– श्रुतधर्मादौ रुचिरस्येतिकृत्वा, शिष्यमतिव्युत्पादनार्थं चेत्थमुपाधिभेदेन सम्यक्त्वभेदाभिधानम्, अन्यथा हि निसर्गोपदेशयोरधिगमादौ वा क्वचित्केषांचिदन्तर्भाव इति भावनीयमिति सूत्रैकादशकार्थः।।२७।।

कै पुनर्लिङ्गैरिदं दशविधमपि सम्यक्त्वमुत्पन्नमस्तीति श्रद्धेयमित्याह–

**परमत्थसंथवो वा सुदिट्ठपरमत्थसेवणा वावि। वावन्नकुदंसणवज्जणा य संमत्तसद्दहणा ।।२८।।**

परमाश्च ते तात्त्विकत्वेनार्थाश्चार्यमाणत्वेन **परमार्थाः** जीवादयस्तेषु **संस्तवो** गुणकीर्त्तनं तत्स्वरूपं पुनः पुनः परिभावनाजनितः परिचयो वा परमार्थसंस्तवो, **वाशब्द** उत्तरापेक्षः समुच्चये, तथा **सुष्ठु** यथावद्दर्शितया **दृष्टा** उपलब्धाः **परमार्था** जीवादयो यैस्ते सुदृष्टपरमार्था - आचार्यादयस्तेषां **सेवनं** पर्युपासनम्, इहोत्तरत्र च (प्राकृतत्वात्) सूत्रत्वाच्च स्त्रीलिङ्गनिर्देशः, **वे**त्यनुक्तसमुच्चये, ततो यथाशक्तितद्वैयावृत्यप्रवृत्तिश्च, **अपिः** पूर्वापेक्षः समुच्चये, '**वावण्णकुदंसण**'**त्ति** दर्शनशब्दः प्रत्येकमभिसम्बध्यते ततो **व्यापन्नं** विनष्टं दर्शनं येषां ते व्यापन्नदर्शनाः–यैरवाप्यापि सम्यक्त्वं तथाविधकर्मोदयाद्वान्तम्, तथा कुत्सितं दर्शनं येषां ते **कुदर्शनाः** शाक्यादयस्तेषां च **वर्जनं** परिहारो व्यापन्नकुदर्शनवर्जनम्, मा भूदेतदपरिहारतः सम्यक्त्वमालिन्यमिति, **चः** समुच्चये, सम्यक्त्वं श्रद्धीयतेऽस्तीति प्रतिपद्यतेऽनेनेति **सम्यक्त्वश्रद्धानम्,** प्रत्येकं च परमार्थसंस्तवादिभिरस्य सम्बन्धादेकवचनं चाङ्गारमर्दकादेरपि परमार्थसंस्तवादीनां सम्भवाद्व्यभिचारिता, तात्त्विकानामेवैषामिहाधिकृतत्वात्, तस्य च तथाविधानामेषामसंभवादिति सूत्रार्थः।।

**–पाइयटीकोपेत-उत्तराध्ययननिर्युक्तौ** ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

कथनम् **उपदेशः, आज्ञा** त्वर्थः, **निसर्गः** स्वभाव इति गाथार्थः ।।६७।। किञ्च –

**जिण० गाहा ।। जिनसाधुगुणोत्कीर्तन-प्रशंसा-विनय-दानसम्पन्नः** इह **जिनसाधवः** प्रतीताः, **तद्गुणाश्च** निरतिचारसम्यग्दर्शनादयस्तेषा**मुत्कीर्तनं** सामान्येन संशब्दनमुच्यते, **प्रशंसा** त्वहो श्लाघ्यतया भक्तिपूर्विका स्तुतिः, **विनयः** अभ्युत्थानादिः, **दानम्** अशनादिप्रदानम्, एतत्सम्पन्नः एतत्समन्वितः, तथा

---

४ A मू० **दर्शनविशुद्धिर्विनयसम्पन्नता** x x x **तीर्थकृत्त्वस्य** ।।६-२३।।

वृ० x x x विनयसम्पन्नता चेति । विनीयतेऽनेनाष्टप्रकारं कर्मेति विनयः । स च ज्ञान-दर्शन-चारित्रो-पचारभेदेन चतुर्धा । तत्र ज्ञानविनयः कालविनयबहुमानोपधानादिः । दर्शनविनयो निःशङ्कनिःकाङ्क्षादिभेदः । चरणविनयः समितिगुप्तिप्रधानः । उपचारविनयोऽभ्युत्थानासनप्रदाना-ञ्जलिप्रग्रहादिभेदः । एवंविधेन विनयपरिणामेन परिणतः कर्ता विनयसम्पन्न उच्यते, तद्भावो विनयसम्पन्नता x x x।।६-२३।।

**–तत्त्वार्थ. सिद्ध. वृत्तौ ।।**

B अव० प्रतिपत्तिपुरःसरमित्युक्तमिति गुरुप्रतिपत्तिं श्लोकद्वयेन दर्शयति–

**अभ्युत्थानं तदालोके-ऽभियानं च तदागमे ।**
**शिरस्यञ्जलिसंश्लेषः, स्वयमासनढौकनम् ।। १२५ ।।**

**आसनाभिग्रहो भक्त्या, वन्दना पर्युपासनम् ।**
**तद्यानेऽनुगमश्चेति, प्रतिपत्तिरियं गुरोः ।। १२६ ।।**

वृ० **अभ्युत्थानं** ससम्भ्रममासनत्यागः **तदालोके** गुरुणामालोकने सति, **अभियानम**भिमुखं गमनं **तदागमे** गुर्वागमने, **शिरसि** मस्तके गुरुदर्शनसमकाल**मञ्जलिसंश्लेषः** करकोरककरणं 'नमो खमासमणाणं' ति वचनोच्चारपूर्वकम्, **स्वयमि**त्यात्मना न तु परप्रेषणेन **आसनढौकनमा**सनसन्निधापनम् ।।१२५।।

**आसनाभिग्रहः** आसन उपविष्टेषु गुरुषु स्वयमासितव्यमित्यभिग्रहः आसनाभिग्रहः, **भक्त्या** भक्तिपूर्वकं **वन्दना** पञ्चविंशत्यावश्यकविशुद्धं वन्दनकम्, स्थानस्थितानां च गमनादिव्याकुलत्वाभावे **पर्युपासनं** सेवा, **तेषां** गुरूणां **याने** गमनेऽ**नुगमनं** पृष्ठतः कतिपयपदान्यनुसरणम् । **इयं प्रतिपत्ति**रुपचारविनयरूपा **गुरोर्धर्माचार्यस्य** ।। १२६ ।।

**–योगशास्त्रे, प्र. ३ ।।**

५ मू० **अनुग्रहार्थं स्वस्यातिसर्गो दानम्** ।।७-३३।।

वृ० अपरे मुक्तसम्बन्धमाचक्षते-अतिथिसंविभागे चोदनाद् दानधर्मोऽगारिणः शेषधर्मष्टोदितः। तत्र किंलक्षणं दानमित्याह-**अनुग्रहार्थं स्वस्यातिसर्गो दानम्** । अनुगृह्यतेऽनेनेत्यनुग्रहोऽन्नादिरूपकारकः प्रतिग्रहीतुः,

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

दातुश्च प्रधानानुषङ्गिकफलं प्रधानं मुक्तिः, आनुषङ्गिकं स्वर्गादिप्राप्तिः प्रच्युतस्येह सुकुलप्रत्ययातिविभवबोधिलाभादिः सोऽर्थः - प्रयोजनं यस्य तदनुग्रहार्थम् अनुग्रहप्रयोजनम्, अर्थशब्दस्य प्रयोजनवाचित्वात्। **स्वस्येति** स्वशब्द आत्मात्मीयज्ञातिधनादिषु वर्तते इत्यात्मीयवचनः प्रयुक्तः। स्वमात्मीयन्यायेन स्वीकृतं पूर्वजक्रमागतं न्यायवृत्या वा स्वसामर्थ्योपात्तं तस्या**तिसर्गः** त्यागः। न चोज्झनमात्रं त्यागशब्देनोच्यते, किं तर्हि?, **दानं** विशिष्टसम्प्रदानकमित्यर्थः। तच्च सम्प्रदानं द्विविधम्-अर्हद्भगवन्तः साधर्मिकाश्च, तत्रार्हद्भ्यो दीयते पुष्प-बलि-धूप-चामरा-ऽऽतपत्र-कलश-ध्वज-चन्द्रातपकिरीटाभरणादिः। साधर्मिकास्तु द्विप्रकाराः - साधवः श्रावकाश्च। साधवो यथोक्तज्ञानदर्शनक्रियानुष्ठानसम्पन्नाः। श्रावकाश्च सम्यक्त्वाणुव्रतादिद्वादशविधधर्मभाजः। तेभ्यो दानमन्नादेर्देशकालोपपन्नमिति । एवंविधसूत्रार्थप्रतिपादनाय आत्मपरानुग्रहार्थमित्यादि भाष्यम्।

**भा० आत्मपरानुग्रहार्थं स्वस्य द्रव्यजातस्यान्नपानवस्त्रादेः पात्रेऽतिसर्गो दानम् ।।३३।। किञ्च-**

**वृ०** अनेन च भाष्येण विशुद्धबुद्धित्वं दातुराख्यायते। श्रद्धादिगुणयोग उपायः प्रतिग्रहीता पात्रविशेषः देयसम्पच्चेति। आत्मा च परश्च आत्मपरौ तयोरनुग्रहः **आत्मपरानुग्रहः** सो**ऽर्थो** यस्य तदात्मपरानुग्रहार्थम्। अनुग्रह उपकारः । स च विशुद्धया धिया ददतः, कर्मनिर्जरणादि फलं ममास्तीत्यनुग्रहग्रहणाद् विशुद्धबुद्धित्वं लभ्यते, अन्यथा तु अनुग्रहाभाव एव स्यात् । तच्च निर्जरादिफलमुपेयमुपायादृते न सम्पद्यत इत्युभयपरिग्रह। देशकालपुरुषावस्थाः संप्रेक्ष्यागमानुसारिणा रागप्रमोदनिर्भरेण चेतसा रोमाञ्चकञ्चुकोपगूढवपुषा वाऽभ्युत्थाना-ऽऽसनप्रदान-वन्दन-चरणप्रमार्जन-सत्कारपूर्वकं समाधायैकाग्र्य-मित्यादिरुपायः। आत्मेति दाता श्रद्धाशक्तिसत्त्वक्षमाविनय-वितृष्णतागुणसम्पन्नो ददामीत्येवं परिणतः, परोपादानात् प्रतिग्रहीता ज्ञानक्रियान्वितो विजितेन्द्रियकषायः स्वाध्यायतपोध्यानसमाधिभाग् मूलोत्तरगुणसम्पदुपेतः पात्रमिष्यते। **स्वस्य द्रव्यजातस्यान्नपानवस्त्रादेरि**त्यनेन देयनिर्देशः। स्वस्येत्यात्मीयस्य लोकविरुद्धचौर्यव्यवहाराद्यनुपात्तस्य। **द्रव्यजातस्येति** द्रव्यविशेषस्य पुद्गलद्रव्यस्य जीवद्रव्यस्य च, पुद्गलद्रव्यस्यापि न सर्वस्य कुठारहलदात्रशस्त्रादेरनेकप्राणिदुःखहेतोः। किं तर्हि?, **अन्नपानवस्त्रादेः। आदि**ग्रहणादौघिकौपग्रहिकसकलोपकरणपरिग्रहः। सर्वथा आहारो भेषजं शय्योपधिर्वा साधोः परत एव लभ्यः। स च पुद्गलोत्पादनेनैषणाशुद्धः। स च दातुः प्रतिग्रहीतुश्चोपकारको निर्जराफलत्वात्, जीवद्रव्यस्यापि न सर्वस्य, दासदासीबलीवर्दवाहनादेः स्वयमेव दुःखितत्वात् क्लिश्यमानत्वात् । यथाऽऽह—

“जं न य दुहियं न य दुक्खकारणं होइ दिण्णमण्णेसिं।
वट्टइ अणुग्गहे तं विहिए दिन्नं असावज्जं ।।१।।”

द्विपदमपि गृहिणा प्रव्रज्याभिमुखं प्रव्रज्यार्हं पुत्रदुहितृभ्रातृपत्नीप्रभृति स्वामिना दत्तमनुज्ञातं प्रव्राज्यम्, इत्थमुक्तेन न्यायेन देशकालोपपन्नमचेतनं सचेतनं वा द्रव्यजातं **पात्रे** गुणवति देयम्। अत्राधाकर्माद्यपि देशकालापेक्षपात्रविनियुक्तं स्वर्गानुकूलप्रत्ययातिफलमेव भवति, पारम्पर्यान्मुक्तिफलमपीति ।।

**—तत्त्वार्थ. सिद्ध. वृत्तौ ।।**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**श्रुत-शील-संयमरतः** तत्र **श्रुतं** सामायिकादिबिन्दुसारान्तम्, **शीलं**[६] व्रतादिसमाधान-लक्षणम्, **संयमस्तु** प्राणातिपातादिनिवृत्तिलक्षणः, यथोक्तम्-"[७]पञ्चाश्रवात्" [प्रशम.१७२ ] इत्यादि, एतेषु भावतो रतः, किम् ? **धर्मध्यानीति ज्ञातव्य** इति गाथार्थः ।।६८।।

गतं **लिङ्गद्वारम्,** अधुना **फलद्वारा**वसरः, तच्च लाघवार्थं शुक्लध्यानफलाधिकारे वक्ष्यतीत्युक्तं **धर्मध्यानम्** ।

---

[६] मू॰ x x x **दर्शनविशुद्धिर्विनयसम्पन्नता शीलव्रतेष्वनतिचारो** x x x **तीर्थकृत्वस्य** ।।६-२३।।

वृ॰ x x x तथा **शीलव्रतेष्वा**त्यन्तिको भृशमप्रमादोऽ**नतिचारः**। **शीलमु**त्तरगुणाः पिण्डविशुद्धि-समिति-भावना-प्रतिमा-भिग्रहलक्षणाः मुमुक्षोः समाधिहेतुत्वात् शीलशब्दाभिधेयाः। व्रतग्रहणात् पञ्च महाव्रतानि रजनीभक्तविरति- पर्यवसानन्याक्षिप्तानि । शीलानि च व्रतानि च शीलव्रतानि । तेष्विति तद्विषयः। आत्यन्तिकः अत्यन्तभवः संयमः प्रतिपत्तिकालादारभ्य यावदायुषः क्षयस्तावदविश्रान्त्या भवत्वात्यन्तिकोऽप्रमादः सम्बध्यः । भृशमिति प्रकर्षवचनः। प्रकृष्टोऽप्रमादो भृशमप्रमादः। विकटेन्द्रिय-विकथा-कषाय-निद्रालक्षणः पञ्चधा प्रमादः। अनेन ह्याविष्टो जीवः कार्याकार्यविमुखत्वादाधाकर्मादि प्राणातिपातादि वा परिहर्तुमक्षमो भवति । न प्रमादोऽप्रमादः। प्रमादपरिवर्जनमप्रमत्तता । अनतिचार उच्यते – अतिचरणमतिचारः-स्वकीयागमातिक्रमः । नातिचारोऽनतिचारः। उत्सर्गापवादात्मकसर्वज्ञ-प्रणीतसिद्धान्तानुसारितया शीलव्रतविषयमनुष्ठानमित्यर्थः। x x x।।६-२३।।

**—तत्वार्थ. सिद्ध. वृत्तौ ।।**

[७] अव॰ संयममाह—

**पञ्चास्त्रवाद् विरमणं, पञ्चेन्द्रियनिग्रहः कषायजयः ।**
**दण्डत्रयविरतिश्चेति, संयमः सप्तदशभेदः ।। १७२ ।।**

वृ॰... **पञ्च**भ्यः प्राणातिपातादिभ्यः **आस्त्रवः** कर्मग्रहणं तस्मा**द्विरमणं** विरतिः, **पञ्चेन्द्रियनिग्रहः कषायजयो दण्डत्रयविरतिश्चेति** पदत्रयमपि सुगमम् । **संयमः सप्तदशभेदः**, पृथिव्यादिरक्षणरूपो वेति ।। १७२ ।।

**—प्रशमरतौ ।।**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# [अथ शुक्लध्यानम्]

इदानीं शुक्लध्यानावसर इत्यस्य चान्वर्थः प्राग्निरूपित एव, इहापि च भावनादीनि फलान्तानि तान्येव द्वादश द्वाराणि भवन्ति, तत्र भावना-देश-कालाऽऽसनविशेषेषु [a] धर्म-ध्यानादस्याविशेष एवेत्यत एतान्यनादृत्याऽऽ**लम्बनान्य**भिधित्सुराह –

**अह[१] खंति-मद्दव-ऽज्जव-मुत्तीओ जिणमयप्पहाणाओ ।**
**आलंबणाई जेहिं सुक्कज्झाणं समारुहइ ।।६९।।**

**अह० गाहा ।। अथ** इत्यासनविशेषानन्तर्ये **क्षान्ति-मार्दवा-ऽऽर्जव-मुक्तयः** क्रोध-मान-माया-लोभपरित्यागरूपाः[२], परित्यागश्चा[b]क्रोधेन वर्तनमुदयनिरोधः उदीर्णस्य

---

[१] A **आलंबणाणि चत्तारि**-खंती, मुत्ती, अज्जवं, मद्दवंति ।। —**आवश्यकचूर्णौ** ।।

B **अव०** उक्तमपि शुक्लध्यानचतुष्टयं प्रपञ्चयति—

**आद्ये श्रुतावलम्बनपूर्वे पूर्वश्रुतार्थसंबन्धात् । पूर्वधराणां छद्मस्थयोगिनां प्रायशो ध्याने ।। १३ ।।**

**वृ०** प्रायश इत्यपूर्वधराणामपि माषतुष-मरुदेव्यादीनां शुक्लध्यानसद्भावादित्युक्तप्रायम् ।। १३ ।।

**अव०** तथा—

**सकलालम्बनविरहप्रथिते द्वे त्वन्तिमे समुद्दिष्टे । निर्मलकेवलदृष्टि-ज्ञानानां क्षीणदोषाणाम् ।। १४ ।।**

**वृ०** स्पष्टा ।। १४ ।।

—**योगशास्त्रे, प्र. ११** ।।

C **ध्यायेच्छुक्लमथ क्षान्ति-मृदुत्वार्जवमुक्तिभिः । छद्मस्थोऽणौ मनो धृत्वा, व्यपनीय मनो जिनः ।। ७३ ।।**

—**अध्यात्मसारे, अ. १६** ।।

D **श्रुतज्ञानार्थसम्बन्धात् श्रुतालम्बनपूर्वके । पूर्वेऽपरे जिनेन्द्रस्य निःशेषालम्बनच्युतेः ।। १९६ ।।**

—**ध्यानदीपिकायाम्** ।।

[२] A **मू०** **उत्तमः क्षमा-मार्दवा-ऽऽर्जव-शौच-सत्य-संयम-तपस्त्यागा-ऽऽकिञ्चन्य-ब्रह्मचर्याणि धर्मः ।।९-६।।**

**वृ०** उत्तमग्रहणमगारिधर्मव्यवच्छेदार्थम् । **उत्तमो धर्मः** प्रकर्षयोगात् । क्षमादयो हि उत्तमविशेषणविशिष्टास्ता-दृशाद्यागारिणो न सन्ति । यतः सर्वावस्थां अनगाराः क्षमन्ते, सकलमदस्थाननिग्राहिणः शाठ्यरहिताः सन्तोषामृततृप्ताः सत्यवादिनः संयमिनः तपस्विनो यथावद् दातारः कनकादिकिञ्चनरहिताः सर्वप्रकारं ब्रह्म बिभ्रतीति । न त्वेवं जातुचिद् गृहिणां क्षमादयः प्रकर्षभाजो भवन्ति । क्षमादयः कृतद्वन्द्वाः प्रथमाबहुवचननिर्दिष्टाः समुदिता एवोत्तमो धर्मः । एष च क्षमादिसमुदयः संवरं धारयति करोति यतस्ततो धर्मः । संवरार्थं चात्मना धार्यत इति धर्मः ।

एतावन्ति धर्माङ्गानि तन्निष्पादितष्टा धर्म इति दर्शयति—

**भा०** **इत्येष दशविधोऽनगारधर्म उत्तमगुणप्रकर्षयुक्तो भवति ।।**

**वृ०** एवमेव **दशप्रकारो** यतिधर्मः । **उत्तमा गुणा** मूलोत्तराख्यास्तेषां **प्रकर्षः** पराकाष्ठा **तद्युक्तोऽनगाराणां धर्मो भवति ।।**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

भा० **तत्र क्षमा तितिक्षा सहिष्णुत्वं क्रोधनिग्रह इत्यनर्थान्तरम् ।।**

वृ० **तत्र क्षमे**त्यादिना विवृणोति । उत्तमत्वं **क्षमे**ति क्षमणं-सहनं परिणाम आत्मनः शक्तिमतः। अशक्तस्य वा प्रतीकारानुष्ठाने तां पर्यायशब्दैराचष्टे। **तितिक्षा** क्षान्तिः। **सहिष्णुत्वं** सहनशीलत्वम्। **क्रोधनिग्रहः** क्रोधस्योदयनिरोधः, उदितस्य वा विवेकबलेन निष्फलताऽऽपादनम्। एवमेतेऽनर्थान्तरवाचिनः शब्दाः क्षमामेवाभिदधति।

भाष्यकारस्तु स्वयमेवाशङ्क्याह—

भा० **तत् कथं क्षमितव्यमिति चेदुच्यते—क्रोधनिमित्तस्यात्मनि भावाभावचिन्तनात्।।**

वृ० **तत् कथं क्षमितव्यमिति चेत्। क्षमितव्यमि**ति भावे कृत्यः। क्षमाऽपि भाव एव। अतः सामान्यमात्रमाश्रित्य **तच्छ**ब्दप्रयोगः। वाक्यार्थस्तु - सा - क्षमा कथं - केन प्रकारेण कर्तव्या? एवं मन्यते दुर्भञ्जः क्रोधवेगो मदाकुलस्येव करिणः। **चेच्छ**ब्दः शङ्कायाः सूचकः। एवमाशङ्किते आशङ्काव्युदासचिकीर्षया आह— **उच्यत** इति । **क्रोधनिमित्तस्यात्मनि भावाभावचिन्तनात्।** भावः सद्भावोऽस्तित्वं तच्चिन्तनात् तदुपयोगाद् उभयथाऽपि क्रोधो न घटत इति । येन निमित्तेन परप्रयुक्तेनायं मम कोप उत्पद्यते तन्निमित्तं मयि किं सत्यमेवास्ति उताभ्याख्याति परः?, यदि सत्यमस्त्येतन्निमित्तं किं कोपेन? कृतं खलु मयेदम्, नाणीयोऽपि परस्यात्राऽऽगः सद्भूतमर्थं प्रकाशयतः, स्वकृतं हि दुश्चरितं तपतीत्येवम् चिन्तयेत् । एतदेवाह— भावचिन्तनात्। तावद् विद्यन्ते मय्येते दोषाः किमत्रासौ मिथ्या ब्रवीतीति क्षमितव्यम्, तथाऽभावचिन्तनादपि क्षमितव्यमित्यादि, ये दोषाः परेणोपक्षिप्यन्ते मयि नैते विद्यन्ते। अभाव एव, परस्त्वज्ञानादेवमभिधत्ते। अज्ञात्वैव दोषानुपक्षिपतीत्यर्थः। एवं च निरपराधमात्मानमवेत्य क्षन्तव्यमेव ।।

किञ्चान्यदालम्बनं सहिष्णुत्वे इत्याह—

भा० **परैः प्रयुक्तस्य क्रोधनिमित्तस्यात्मनि भावचिन्तनादभावचिन्तनाच्च क्षमितव्यम्। भावचिन्तनात् तावद् विद्यन्ते मयि एते दोषाः किमत्रासौ मिथ्या ब्रवीतीति क्षमितव्यम्। अभावचिन्तनादपि क्षमितव्यम्, नैते विद्यन्ते मयि दोषा यानज्ञानादसौ ब्रवीतीति क्षमितव्यम्। किञ्चान्यत् –**

वृ० गतार्थमेवेदं भाष्यम् ।

भा० **क्रोधदोषचिन्तनाच्च क्षमितव्यम् । क्रुद्धस्य हि विद्वेषासादनस्मृतिभ्रंशव्रतलोपादयो दोषा भवन्तीति। किञ्चान्यत् –**

वृ० **क्रोधदोषचिन्तनाच्चे**त्यादि । क्रुद्धः-कषायपरिणतो विद्वेषी कर्म बध्नाति, परं वा निहन्ति व्यापादयति वा। अतः प्राणातिपातनिवृत्तिव्रतलोपः स्यात्, गुरूनासादयेद् अधिक्षिपेत्, अतो ज्ञानादिनिर्वाणसाधन-परिहाणिरवश्यंभाविनी। क्रुद्धो वा भ्रष्टस्मृतिको मृषाऽपि भाषेत, विस्मृतप्रव्रज्याप्रतिपत्तिः परेणादत्तमप्याददीत, द्वेषात् परपाखण्डिनीषु ब्रह्मव्रतभङ्गमप्यासेवेत। तथा प्रद्विष्टः सहायबुद्ध्या गृहस्थेष्वविरतेषु मूर्च्छामपि कुर्यात् । **आदि**ग्रहणाद् उत्तरगुणभङ्गमप्याचरेत् करटुकभक्तलाभे मासक्षपकवत् ।।

किञ्चान्यदालम्बनं क्षान्तावित्याह—

भा० **बालस्वभावचिन्तनाच्च परोक्षप्रत्यक्षाक्रोशताडनमारणधर्मभ्रंशानामुत्तरोत्तररक्षार्थम्। बाल इति मूढमाह। परोक्षमाक्रोशति बाले क्षमितव्यमेव। एवंस्वभावा हि बाला भवन्ति । दिष्ट्या च मां परोक्षमाक्रोशति न प्रत्यक्षमिति लाभ एव मन्तव्यः। प्रत्यक्षमप्याक्रोशति बाले क्षमितव्यम्, विद्यत एवैतद् बालेषु ।**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**दिष्ट्या च मां प्रत्यक्षमाक्रोशति, न ताडयति, एतदप्यस्ति बालेष्विति लाभ एव मन्तव्यः। ताडयत्यपि बाले क्षमितव्यम्। एवंस्वभावा हि बाला भवन्ति। दिष्ट्या च मां ताडयति, न प्राणैर्वियोजयतीति। एतदपि विद्यते बालेष्विति। प्राणैर्वियोजयत्यपि बाले क्षमितव्यम्। दिष्ट्या च मां प्राणैर्वियोजयति, न धर्माद् भ्रंशयतीति क्षमितव्यम्। एतदपि विद्यते बालेष्विति लाभ एव मन्तव्यः। किञ्चान्यत्–**

वृ० **बालस्वभावेत्यादि**। बालशब्दोऽवैधेयवचनः,न वयोऽवस्थावाची। तथैव चाह भाष्यकृत्। बालः मूढो निर्विवेक इत्यर्थः। तस्य चैष एव स्वभावो मूढत्वाद् यत्किञ्चनभाषित्वं तत्स्वभावालोचनमन्वेषणम्, अतस्तच्चिन्तनाच्च क्षमितव्यमेव । चशब्दः समुच्चयार्थः। उत्तरोत्तररक्षार्थमिति परोक्षाक्रोशात् प्रत्यक्षाक्रोशनमुत्तरम्, प्रत्यक्षाक्रोशनात् ताडनम्, ताडनान्मारणम्, मारणाद् धर्मभ्रंशनम्, परोक्षाक्रोशेन क्षमायां प्रत्यक्षाक्रोशनं रक्षितं भवति। एवमुत्तरत्रापि, अस्ति हि कियत्यपि मन्दा क्षमाऽक्रोष्टुर्मयि ततः परोक्षमाक्रोशति, न प्रत्यक्षम्। दिष्ट्येति तृतीयैकवचनप्रतिरूपको निपातः प्रसादवचनः प्रशंसावचनो वा। अयमेव च प्रसादो मम इदमेव वा साधु यन्मां परोक्षमाक्रोशति, न प्रत्यक्षमित्येष एव लाभः। लौकिकः खलु अयमाभाणकः - अयमेव (मे) लाभ इति, एवं सर्वत्र व्याख्या। किञ्चान्यदालम्बनमाश्रित्य क्षमा कार्या तदभिधीयते–

भा० **स्वकृतकर्मफलाभ्यागमाच्च। स्वकृतकर्मफलाभ्यागमोऽयं मम, निमितमात्रं पर इति क्षमितव्यम्। किञ्चान्यत्–**

वृ० **स्वकृतफलाभ्यागमाच्चेति**। जन्मान्तरोपात्तस्य कर्मणः स्वकृतस्यायं विपाको मम यदाक्रोशति ताडयति वा परः, स तु निमित्तमात्रं कर्मोदयस्य। यस्माद् द्रव्यक्षेत्रकालभवभावापेक्षः कर्मणामुदयो भगवद्भिराख्यातः। स्वकृतं च कर्मानुभवितव्यमवश्यन्तया निकाचितं तपसा वा क्षपणीयमिति। किञ्चान्यदालम्बनं क्षन्तुमनसा विधातव्यमित्याह–

भा० **क्षमागुणांश्चानायासादीननुस्मृत्य क्षमितव्यमेवेति क्षमाधर्मः ।।१।।**

वृ० **क्षणागुणांश्चेत्यादि** । क्षमाया गुणाः ज्ञानादिवृद्धिहेतवोऽनायासादयः। तांश्चानुचिन्त्य क्षमामेव विदधीत। आयासो-दुःखहेतुश्चेष्टाविशेषः प्रहरणसहायान्वेषणं संरम्भावेशारूणाविलोचनस्वेदद्रवप्रवाहप्रहारवेदनादिकः। तद्विपरीतो-ऽनायासः– स्वस्थता। आदिग्रहणात् तत्प्रत्ययकर्मप्रायश्चित्ताभावः शुभध्यानाध्यवसायिता परसमाधानोत्पादनं स्तिमितप्रसन्नान्तरात्मत्वमित्यादयः। इत्थमनुस्मरतो गुणाः सम्पद्यन्ते क्षममाणस्य, क्षमितव्यमिति क्षमाधर्मः।

तथा मार्दवधर्मः मृदुः–अस्तब्धस्तद्भावस्तत्कर्म वा मार्दवम्। तल्लक्षणप्रदर्शनायाह–

भा० **नीचैर्वृत्त्यनुत्सेकौ मार्दवलक्षणम्। मृदुभावो मृदुकर्म वा मार्दवम्, मदनिग्रहो मानविघातश्चेत्यर्थः। तत्र मानस्येमान्यष्टौ स्थानानि भवन्ति।**

वृ० **नीचैर्वृत्त्यनुत्सेकाविति**। नीचैर्वृत्तिः- अभ्युत्थानासनदानाञ्जलिप्रग्रहयथार्हविनयकरणरूपा नीचैर्वर्तनम्। उत्सेकश्चित्तपरिणामो गर्वरूपस्तद्विपर्ययोऽनुत्सेकः । संसारस्वभावं भावयतोऽसमञ्जसविशिष्टजातिकुलादिसम्पदः कदाचिदेवासाद्यन्ते कदाचिद्धीनास्ततो न गर्वपरिणाममास्कन्दतीत्येतदेवाह–मदनिग्रह इत्यादि। माद्यत्यनेनेति मदः जात्यादिमदस्तस्य [निग्रहः उदयनिरोधः कदाचिदुदितस्य वा वैफल्यापादनं मानो-मूलप्रकृतिः यद्विजृम्भणादेते प्रादुष्षन्ति जात्यादिमदास्तस्य] च निर्घातो मूलोत्कर्तनमित्यर्थः। तच्चाते चावश्यम्भावी जात्यादिमदविनाशः। तन्निरूपणार्थमाह - तत्र मानस्येत्यादि । तत्रेति वाक्योपन्यासार्थः। स्थानानि

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

भेदाः। इमानीति प्रत्यक्षीकरोति । परस्यानुभवमुत्पादयति–

भा० **तद्यथा–जातिः १ कुलं २ रूपम् ३ ऐश्वर्यं ४ विज्ञानं ५ श्रुतं ६ लाभः ७ वीर्यम् ८ इति ।।**

वृ० **तद्यथे**त्यादिनोदाहरति। जात्यादीनि वीर्यान्तान्यष्टौ स्थानानि । तत्र **जातिः** पित्रन्वयः प्रख्याततमवंशता जातिर्जन्मात्मलाभः पञ्चेन्द्रियादिलक्षणा वा तया गर्वमुद्वहति विशिष्टजातिरहमिति। विदितकर्मपरिणामस्तु निरुणद्धि जातिमदं, स्वकृतकर्मफलानुभाजो जीवा नानाजातीरुच्चावचाः प्रपद्यन्ते इति न श्रेयान् जातिमदः।

मात्रन्वयः **कुलमु**ग्रभोजादि वा। तेनापि मदो न युक्त एव जात्यादिभावनावदिति।

**रूपं** शरीरावयवानां सन्निवेशविशेषो लावण्ययुक्तस्तेनापि कश्चिन्माद्यति, तत्प्रतिषेधस्त्वाद्युत्तरकारणालोचनाद् भवति। तत्राद्यं कारणं मातुरोजः पितुः शुक्रम्, उत्तरकारणं जननीग्रस्तान्नपानरसाभ्यवहारो रसहरण्येत्येवमामृशतो न प्रतिभाति रुपमदः। त्वग्-मांसा-ऽस्थि-पुरीष-पूयाद्यशुभप्रायत्वात्।

**ऐश्वर्यम**दो धनधान्यसम्पत्प्रभवः। धनं रजत-चामीकर-मरकतादि गो-महिष्य-ऽजाविकादि च, व्रीहि-तिल-मुद्ग-माष-कङ्ग्वादि धान्यं तेनापि कर्मानुभावादप्राप्तेन प्राप्तेन वा संरक्ष्यमाणेन क्लेशकारिणा अकाण्डभङ्गुरेणाऽऽयत्यामायासबहुलेन को मद इत्येवं प्रत्याचक्षीत । वाचकेन त्वेतदेव बलसंज्ञया प्रशमरतावुपात्तम्। तच्च त्रिधाः शरीर-स्वजन-द्रव्यबलम्। **इहैश्वर्य**ग्रहणात् स्वजनद्रव्यबलपरिग्रहः। शरीरबलं तु वीर्यग्रहणात् पृथग् गृहीतं वीर्यबलस्य प्राधान्यप्रकाशनार्थम्।

**विज्ञानं** बुद्धिश्चातुर्विधा-औत्पत्तिकी, वैनयिकी, कर्मजा, पारिणामिकी चेति। तत्रौत्पत्तिकी अदृष्टाश्रुतपूर्ववस्तुन्युपनते तत्क्षण एव समासादितोपजना (?) अव्याहतफला भरतरोहकादेरिव भवति। गुर्वादिविनयानुष्ठानाभ्यासविशेषप्रभवा वैनयिकी ऐहिकामुष्मिकफलसम्पादिनी प्रस्तुतकार्यनिस्तरणसमर्था धर्मादित्रिवर्गशास्त्रार्थग्राहिणी च पुत्रागमनकाणहस्तिनीपरिज्ञाननैमित्तिकस्यैव। कर्मजा पुनः धीः साधुकारफला, अनाचार्यकं कर्म, तत्र पुनःपुनरुपयोगात् प्रतिक्षणमभ्यस्यतस्तादृशी बुद्धिरुत्पद्यते येन प्रथमादि-कृतकर्मातिशायि पाश्चात्यं कर्मोपजायते, सौवर्णिककृषीवलतन्तुवायादेरिव। पारिणामिकी तु वयोविपाकलब्धजन्मा परमहितनिःश्रेयसफला पञ्चावयवादिसाधनानुसारिणी भवत्यभयकुमारादेरिव यथासम्भवम्। इत्थं लब्धया बुद्ध्या अहमेव बुद्धिमानिति मन्यमानः परिभवति शेषं जनम्। मदसमुद्धतस्य परपरिभवपरिवादादात्मोत्कर्षाच्चाशुभं कर्म नीचैर्गोत्रादि बन्धमेति यदनेकभवपरम्परासु परिनिष्ठास्यतीति सापायमवग(म)त्य बुद्धिगर्वमित्थं विचिन्तयेत्-बुद्धयो हि विनयाधानहेतवः सर्वदा,न जातुचित् अहङ्कारस्य कारणीभवन्ति। मानपरस्य च विनयखण्डनमवश्यम्भावि। विनयहीनस्य च धर्मतपसी निष्फले स्यातामिति विज्ञानमदो यत्नेन महता विवर्जनीयः।

**श्रुतम्** आप्तप्रणीत आगमः तत्परिज्ञानान्माद्यति अहमेवैको जाने, नापर इति । श्रुतमदान्धश्चा बालिशमेव परं मन्यते, श्रुतमदं च निजिघृक्षुरित्थमालोचयेत् प्रकर्षापकर्षवृत्तित्वात् क्षयोपशमस्य सन्ति मत्तोऽन्येऽपि बहुश्रुताः, कदाचिदहमन्य-भ्योऽल्पतरश्रुतोऽतिगहनार्थत्वादागमानामधिगतश्रुतोऽपि वा दुरधिगततदर्थः स्यामिति श्रुतमदत्यागः श्रेयान् । अपि च– चतुर्दशपूर्वधरेष्वपि षट्स्थानकमवधुष्यते यदि, तत्र का कथा शेषश्रुतधरे श्रुतज्ञानावरणक्षयोपशमवैचित्र्याद्, अधिगतसकलश्रुतेनापि परिहार्यः श्रुतमद इति।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

लम्भनं **लाभः** प्राप्तिर्विशिष्टफलस्य सत्कारसन्मानादेः नृपतिसन्मित्रभृत्यस्वजनेभ्यो विज्ञान-तपो-ऽभिजन-शौर्याद्याधिक्यादहं लभेयम्, अपरः प्रयत्नवानपि न लभत इति स्वलाभेन माद्यति। तथा सकलजनवल्लभतां च प्राप्तोऽहम्, अयमपरो न कस्मैचिद् रोचते, वचनमप्यस्य नादरयन्तीति सर्वोऽप्ययं लाभमदः। स चैवं निगृहीतव्यो लाभान्तरायकर्मोदयादलाभो लाभान्तरायकर्मक्षयोपशमाच्च सत्कारादिलाभः, संसारे परिभ्रमतो जीवस्य कादाचित्को न तु शाश्वतः, कर्मायत्तत्वात्, संसारानुबन्ध्येवेति लाभमदत्यागः श्रेयस्करः। वाल्लभ्यकप्राप्तिरपि कर्मोदयजनितैव, संसारिणां च सुलभेति वाल्लभ्यकलाभमदः परिवर्जनीय इति।

**वीर्यं** पराक्रमः शक्तिरुत्साहः सामर्थ्यातिशयवती चेष्टेति पर्यायाः। वीर्यान्तरायक्षयोपशमात् प्रादुरस्ति वीर्यं-बलविशेषस्तेन वीर्येण माद्यतीति वीर्यमदः, तस्य प्रतिक्षेपः संसारानुबन्धित्वचिन्तनात्, संसारानुबन्धी वीर्यमदः कषायरूपत्वात्, वीर्यस्य चाशाश्वतत्वात्। तथाहि - बलिनोऽपि पुरुषाः क्षणेन निर्बलतामुपयान्तो दृश्यन्ते, निर्बलाश्च बलवन्तः संस्कारवशादाशु जायन्ते, तथा व्याधि-जरा-मृत्युषूद्भूतबलेषु चक्रवर्तिहरिसीरिणोऽपि सीदन्ति ससुरासुराः, किमुतान्ये पृथग्जना इति? वीर्यमदाद् व्युपरमः श्रेयान्। इतिशब्दो मदस्थानानामियत्तामावेदयति। मौलान्येतावन्ति, सूक्ष्मभेदास्तेषां भूयांस इति।।

सम्प्रति सामान्येन सर्वमदस्थानेषु दोषानाविर्भावयन्नुपसंहरति-

भा० **एभिर्जात्यादिभिरष्टाभिर्मदस्थानैर्मत्तः परात्मनिन्दाप्रशंसाभिरतः तीव्राहङ्कारोपहतमतिरिहामुत्र च अशुभफलमकुशलं कर्मोपचिनोति । उपदिश्यमानमपि च श्रेयो न प्रतिपद्यते। तस्मादेषां मदस्थानानां निग्रहो मार्दवं धर्म इति ।।२।।**

वृ० **एभिर्जात्यादिभिरित्यादि**। उक्तलक्षणैर्जात्यादिभिर्मत्तः - अहंमानी परनिन्दायामात्मप्रशंसायां च सक्तस्तीव्रेण-अतिशयवताऽहङ्कारेणोपहतबुद्धिर्मलीमसधिषण इहपरलोकानुभवनीयं कर्मोपचिनोति - बध्नाति अकुशलं-पापमशुभफलम्, अकुशलमपि बद्धं कदाचित् कुशलफलतया परिणमत इत्यशुभफलग्रहणम्। सम्यग्दर्शनादि मुक्तिसाधनं श्रेयः। तच्चाख्यायमानमपि न प्रतिपद्यते-न श्रद्धत्ते । यत एतदेवं तस्मादेषां मदस्थानानां मार्दवं निग्राहकं तन्निग्रहाच्च धर्म इति ।।

सम्प्रति मायाप्रतिपक्षमार्जवं लक्षयति–

भा० **भावविशुद्धिरविसंवादनं चार्जवलक्षणम्। ऋजुभावः ऋजुकर्म वाऽऽर्जवम्। भावदोषवर्जनमित्यर्थः। भावदोषयुक्तो हि उपधिनिकृतिसंप्रयुक्त इहामुत्र चाशुभफलमकुशलं कर्मोपचिनोति। उपदिश्यमानमपि च श्रेयो न प्रतिपद्यते। तस्मादार्जवं धर्म इति ।।३।।**

वृ० **भावविशुद्धिरिति**। भावाः कायवाङ्मानसानि तेषां विशुद्धिः- अवक्रताशाठ्यविरहितत्वम्, मनसोऽपि परिणामः कायवाचोरुपचर्यते तद्वृत्तानुवृत्तेः। मायावी तु सर्वाभिसन्धानपरतया सर्वाभिशङ्कनीयः कपटपटप्रच्छादितकायादिक्रियः सुहृदेऽपि द्रुह्यति।

तमेव योगानामविपर्यासं दर्शयति ऋजुभाव इत्यादिना । उपधिनिकृत्योर्विशेषः उपधिः छद्म छादनं स्वाभिसन्धेः निकारो निकृतिः परबुद्धिपराभवद्वारेण स्वाभिसन्धेः साफल्यापादनम्। अविसंवादनमविनाशनं अहिंसनमित्यनर्थान्तरम्। विनाशनं-परिणामान्तरापादनं विसंवादनमुच्यते। न विसंवादनमविसंवादनम्, परिणामान्तरानापादनमिति। तस्मादेवंविधमार्जवं धर्मः।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अधुना लोभप्रतिपक्षं शौचलक्षणाविर्भावयन्नाह-

भा० **अलोभः शौचलक्षणम् । शुचिभावः शुचिकर्म वा शौचम्।।**

वृ० **अलोभ** इति । अलोभः शौचलक्षणम्। लोभस्तु भावतः परमार्थतोऽभिष्वङ्गद्योतनाचेतनमिश्रवस्तुविषयः। लोभदोषाच्च क्रोधमानमायाहिंसाऽनृतस्तेयाऽब्रह्मपरिग्रहार्जनमलजालेनोपचीयमान आत्मा भवत्यशुचिः। तत्रालोभो-लोभाभावो न क्वचिन्ममत्वम्। अलोभस्य हि लोभदोषविनिर्मुक्तत्वान्निर्भयत्वम्। ततः स्वपरहिताभिप्रवृत्तिरित्येतदेव शौचलक्षणं मुख्यमात्मनः।

एतदेव स्पष्टयति-

भा० **भावविशुद्धिर्निष्कल्मषता। धर्मसाधनमात्रास्वपि अनभिष्वङ्ग इत्यर्थः। अशुचिर्हि भावकल्मषसंयुक्त इहामुत्र चाशुभफलमकुशलं कर्मोपचिनोति, उपदिश्यमानमपि च श्रेयो न प्रतिपद्यते । तस्माच्छौचं धर्म इति ।।४।।**

वृ० भावविशुद्धिर्ममत्वाभावो निःसङ्गता च,अपरद्रोहेणात्मार्थानुष्ठानं निष्कल्मषता-निर्मलताभाव (धर्म)? साधनमात्राः-रजोहरण - मुखवस्त्रिका-चोलपट्टक-पात्रादिलक्षणाः तास्वप्यनभिष्वङ्गो विगतमूर्च्छ इत्यर्थः। यस्मादशुचि-र्भावकल्मषसंयुक्तः, भावकल्मषं च लोभकषायस्तस्मात् तत्त्यागः। शौचं धर्म इति, शरीरमहाव्रणप्रक्षालनादि द्रव्यशौचम्, तच्च प्रासुकैषणीयेन जलादिना निर्लेपनिर्गन्धितापादनमागमोक्तेन विधिना कार्यमिति।। अवसरप्राप्तं पञ्चमं धर्माङ्गं निर्दिदिक्षुराह-

भा० **सत्यर्थे भवं वचः सत्यं, सद्भ्यो वा हितं सत्यम्, तदननृतम्, अपरुषमपिशुनमनसभ्यमचपलमनाविलम-विरलमसम्भ्रान्तं मधुरमभिजातमसन्दिग्धं स्फुटमौदार्ययुक्तमग्राम्य-पदार्थाभिव्याहारमसीभरमराग-द्वेषयुक्तम् ।।**

वृ० सन्-विद्यमानोऽर्थोऽनेकधर्मा तस्मिन् सत्यर्थे भवम्, दिगादित्वात् यत्, यथाऽवस्थितार्थप्रतिपत्तिकारी सत्यम् । नन्वेवं सति लुब्धकाय मृगाख्यानमपि सत्यं स्यात्, किं (एवं ?) तर्हि सच्छब्दः प्रशंसार्थः । प्रशंस्तोऽर्थः सन् न पापहेतुः तस्मिन् सति भवं सत्यं पक्षान्तरसमाश्रयणं वा, सद्भ्यो वा हितं सत्यमिति, सन्तो जीवा एव गृह्यन्ते, हितशब्दोपादानात् । न ह्यजीवसम्बन्धि किञ्चिद्धितमस्ति, अतोऽप्रशस्तार्थ-व्यावृत्तिः । सामान्येन वा जींवाजीवेभ्यो हितम् । अनेकपर्यायकलापभाजोऽर्थाः । तेषां यथाऽवस्थित-विवक्षितपर्यायप्रतिपादनं सत्यम्, एतदेव तेभ्यो हितं यद् यथार्थप्रतिपादनमिति, तस्येदानीं सत्यवचनस्य विशेषगुणानाचष्टे – तदनृतमिति । अनृतं-भूतनिह्नवः अभूतोद्भावनं विपरीतकटुकसावद्यादिवचनं, नानृतम् । ननु च सत्यपर्याय एवायम् । सत्यमेतत्, तथापि वक्ष्यमाणोत्तरगुणप्राप्त्यर्थं पुनर्वचनम् ।

परुषं-रूक्षं स्नेहरहितं (निष्ठुरं) परपीडाकारि । न परुषमपरुषम् । तत्राविनयेषु माध्यस्थ्यभावना, विनयेषु तु सौम्या वागपरुषम्, पिशुनं-प्रीतिविच्छेदकारि द्वयोर्बहूनां वा सत्यासत्यदोषाख्यानात्, न पिशुनमपिशुनम् । सभार्हं-सभ्यम्, न सभार्हमसभ्यं-सभासु विगर्हितं विदग्धसभासु गुह्यप्रकटनामोद्घाटन-वचनवत्, तस्य प्रतिषेधो नासभ्यमनसभ्यम् । चपलः अनालोचितभाषी, तद्वचनमपि चपलं तच्च दोषाक्षेपि भवति । आविलं-कलुषम्, कषायवशवर्तिनो वचनम्, न आविलमनाविलं प्रसन्नवचनमिति यावत् । विरलं-

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

विश्रम्यभाषण्, सविच्छेदत्वाच्च श्रोतुरनादरवाक्यव्याहरणाच्छ्रवणवैरस्यं करोति । न विरल**मविर**लमनुसन्ततमिति । सभ्रान्तं तु त्रासकरम्, न सम्भ्रान्तमसम्भ्रान्तम् अतित्वरितं वा सम्भ्रान्तमनुच्छ्वसन् भाषते च यद् अव्यक्तवर्णपदलेपत्वादप्रत्यायकं वा श्रुतिविरसाक्षरमप्ररोचकमेव स्यात् । मधुरमिति प्रसन्नपदघटितं श्रुतिसुखम्, सुखावबोधार्थं च अनभिमानं-विनयसहितम् अभिजातं-सप्रश्रयं सविनयम् सन्दिग्धम्-आकाङ्क्षाविनिवर्तने अक्षमं तद्विपरीतम**सन्दिग्ध**-माकाङ्क्षाविच्छेदकारि, निराकाङ्क्षमिति । अस्फुटम् अनिष्टितार्थत्वादालूनविशीर्णप्रायम्, (वि)निष्टितार्थं तु स्फुटम् । अनौदार्यम्-अत्यौद्धत्यप्रदीपकम्, तद्विपरीतमौदार्यम्, अप्रधानार्थम् अनौदार्यम् उदारार्थप्रतिबद्धत्वादुदारं तद्भाव औदार्यं तद्युक्तमौदार्ययुक्तम् । विद्वज्जनमनोऽनुरञ्जनेऽसमर्थं ग्राम्यम्, न ग्राम्यमग्राम्यम्। पदार्थांश्च विवक्षितानभिव्याहरतीति पदार्थाभिव्याहारम्, अग्राम्यत्वात् पदार्थानभिख्याहरतीति । विद्वज्जनाभिमतानित्यग्राम्यपदार्थाभिव्याहारम्, सीभरं विकत्थनं विमर्दकरम्, न सीभरमसीभरं आश्वेव प्रस्तुतार्थपरिसमाप्तिकारि । अरागद्वेषयुक्तमिति मायालोभाभ्यां कोपमानाभ्यां चायुक्तम् ।।

—**तत्वार्थ. सिद्ध. वृत्तौ** ।।

B **अव०** क्षान्तेः प्राधान्यदर्शनार्थमाह—

**धर्मस्य दया मूलं, न चाक्षमावान् दयां समाधत्ते ।**
**तस्माद् यः क्षान्तिपरः, स साधयत्युत्तमं धर्मम् ।। १६८ ।।**

**वृ०** **धर्मस्य** दशप्रकारस्य **दया मूलं । न चाक्षमावान् दयां समाधत्ते** करोति । **तस्मात् यः क्षान्तिपरः स साधयत्युत्तमं धर्म**मिति ।। १६८ ।।

**अव०** मार्दवमाह—

**विनयायत्ताश्च गुणाः, सर्वे विनयश्च मार्दवायत्तः ।**
**यस्मिन् मार्दवमखिलं, स सर्वगुणभाक्त्वमाप्नोति ।। १६९ ।।**

**वृ०** **विनयायत्ता** गुर्वभ्युत्थाद्याधीना **गुणा** ज्ञानादयः **सर्वे, विनयश्च मार्दवायत्तो** मृदुत्वाधीनो **यस्मिन् मार्दवमखिलं** समस्तं **स** प्राणी **सर्वगुणभाक्त्वं** समस्तज्ञानाद्याश्रयता**माप्नोति** लभते, तस्मान्मार्दवं कार्यमिति ।। १६९ ।।

**अव०** आर्जवमाह—

**नाऽनार्जवो विशुध्यति, न धर्ममाराधयत्यशुद्धात्मा ।**
**धर्मादृते न मोक्षो, मोक्षात् परमं सुखं नान्यत् ।। १७० ।।**

**वृ०** यत् **नाऽनार्जवो** मायावान् **विशुध्यति, न** च **धर्ममाराधयति** निष्पादयत्य**शुद्धात्मा** संक्लिष्टजीवो **धर्मादृते न मोक्षो** धर्मं विना न मुक्तिः, ऋते अत्रापि योगात्, **मोक्षा**दृते **परमं सुखं** नास्ति **न** विद्यतेऽ**न्यदिति** ।। १७० ।।

**अव०** शौचमाह—

चाफलीकरणमिति, एवं मानादिष्वपि भावनीयम्, एता एव क्षान्ति-मार्दवा-ऽऽर्जव-मुक्तयो विशेष्यन्ते – **जिनमतप्रधाना** इति जिनमते तीर्थकरदर्शने कर्मक्षयहेतुतामधिकृत्य प्रधाना जिनमतप्रधानाः, प्राधान्यं चासामकषायं चारित्रं चारित्राच्च [c]निश्चयतो मुक्तिरिति कृत्वा, ततश्चैता **आलम्बनानि** प्राग्निरूपितशब्दार्थानि, **यैरालम्बनैः** करणभूतैः **शुक्लध्यानं समारोहति,** तथा च क्षान्त्याद्या[d]लम्बन एव शुक्लध्यानं समासादयति, नान्य इति गाथार्थः ।।६९।।

व्याख्यातं शुक्लध्यानमधिकृत्याऽऽ**लम्बनद्वारम्** । साम्प्रतं **क्रमद्वारावसरः,** क्रम[a]श्चाऽऽदौ धर्मध्यानक्रम एवोक्तः, [b]इह पुनरयं विशेषः –

**तिहुयणविसयं कमसो संखिविउ [c]मणो अणुंमि छउमत्थो ।**
**झायइ सुनिप्पकंपो झाणं अमणो जिणो होई ।।७०।।**

**तिहुयण० गाहा ।। त्रिभुवनम्** अधस्तिर्यगूर्ध्वलोकभेदं त**द्विषयो** गोचर आलम्बनं यस्य मनस इति योगः, तत्त्रिभुवनविषयम्, **क्रमशः** क्रमेण – परिपाट्या प्रतिवस्तुपरित्याग-लक्षणया, **संक्षिप्य** सङ्कोच्य, किम् ? **मनः** अन्तःकरणम्, क्व ? **अणौ** परमाणौ, निधायेति शेषः, कः ? **छद्मस्थः** प्राग्निरूपितशब्दार्थः, **ध्यायति** चिन्तयति **सुनिष्प्रकम्पः** अतीव निश्चल इत्यर्थः, **ध्यानम्** शुक्लम्, ततोऽपि प्रयत्नविशेषान्मनोऽपनीय **अमनाः** अविद्यमानान्तःकरणो **जिनो भवति** अर्हन् भवति, चरमयोर्द्वयोर्ध्यातेति[d] शेषः, तत्राप्याद्यस्यान्तर्मूहूर्तेन शै[e]लेशीमप्राप्तः, तस्यां च द्वितीयस्येति गाथार्थः ।।७०।।

आह – कथं पुनश्छद्मस्थस्त्रिभुवनविषयं मनः संक्षिप्याणौ धारयति, केवली वा ततोऽप्यपनयतीति ? अत्रोच्यते –

---

**यद् द्रव्योपकरणभक्तपानदेहाधिकारकं शौचम् ।**
**तद् भवति भावशौचानुपरोधाद् यत्नतः कार्यम् ।। १७१ ।।**

वृ० **यच्छौचं द्रव्योपकरणभक्तपानदेहाधिकारकं तद्भवति कार्यं भावशौचानुपरोधादिति** सम्बन्धः । तत्र द्रव्यरूपं-पुद्गलात्मकं तच्च तदुपकरणं च- रजोहरणादि तच्च भक्तपाने च देहश्च तथा, तानाश्रित्याधिकारो-गोचरो यस्य तत्तथा । अयमत्र भावार्थः – एतान्युपकरणादीनि समस्तान्यशुच्यादिना रुधिरादिना (वा) खरण्टितानि प्रक्षाल्नीयानि, पूर्वयतिवरैरेवं कृतत्वाद्, भावशौचानुपरोधात् संयमाक्षतेरिति ।।१७१।।

**–प्रशमरतौ ।।**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**जह सव्वसरीरगयं मंतेण विसं निरुंभए डंके ।।**
**तत्तो पुणोऽवणिज्जइ पहाणयरमंतजोएणं ।।७१।।** [a]

**जह० गाहा ।। यथा** इत्युदाहरणोपन्यासार्थः **सर्वशरीरगतम्** सर्वदेहव्यापकं **मन्त्रेण** विशिष्टवर्ण-आनुपूर्वीलक्षणेन **विषं** मारणात्मकं द्रव्यं **निरुध्यते** निश्चयेन ध्रियते, क्व ? **डङ्के** [b] भक्षितदेशे, **ततः** डङ्कात्**पुनरपनीयते,** केनेत्यत आह – **प्रधानतरमन्त्रयोगेन** श्रेष्ठतरमन्त्रयोगेनेत्यर्थः, **मन्त्र-योगाभ्यामि**ति च [c] पाठान्तरम् अत्र पुन**र्योग**शब्देनागदः परिगृह्यन्त इति गाथार्थः ।।७१।।

एष दृष्टान्तः, अयमर्थोपनयः –

**तह [1] तिहुयणतणुविसयं मणोविसं [a] मंतजोगबलजुत्तो ।**
**परमाणुंमि निरुंभइ अवणेइ तओवि जिणवेज्जो ।।७२।।**

**तह० गाहा । तथा त्रिभुवनतनुविषयं** त्रिभुवनशरीरालम्बनमित्यर्थः, **मन** एव भवमरणनिबन्धनत्वा[b]**द्विषं मनोविषम्, मन्त्र-योगबलयुक्तो** जिनवचनध्यानसामर्थ्यसम्पन्नः **परमाणौ निरुणद्धि,** तथाऽचिन्त्यप्रयत्ना**च्चापनयति ततोऽपि** तस्मादपि परमाणोः, कः ? **जिनवैद्यो** जिनभिषग्वर इति गाथार्थः ।।७२।।

अस्मिन्नेवार्थे दृष्टान्[a]तान्तरमभिधातुकाम आह –

**[b] ओसारि[1]येंधणभरो जह परिहाइ कमसो हुयासो वा [c] ।**
**थोविंधणावसेसो निव्वाइ तओऽवणीओ य ।।७३।।**

---

[1] A त्रिजगद्विषयं ध्यानादणुसंस्थं धारयेत् क्रमेण मनः ।
विषमिव सर्वाङ्गगतं मन्त्रबलान्मान्त्रिको दंशे ।। १९ ।। —अध्यात्मसारे, अ. १६ ।।
(गाथा-७३)

[1] A अपसारितेन्धनभरः शेषः स्तोकेन्धनोऽनलो ज्वलितः ।
तस्मादपनीतो वा निर्वाति यथा मनस्तद्वत् ।। २० ।।
—अध्यात्मसारे, अ. १६ ।।

**तह विसइंधणहीणो मणोहुयासो कमेण तणुयंमि ।**
**विसइंधणे निरुंभइ निव्वाइ तओऽवणीओ य ।।७४।।**

**ओसारिय० गाहा ।।** [d] **अपसारितेन्धनभरः** अपनीतदाह्यसङ्घातो **यथा परिहीयते** हानिं प्रतिपद्यते **क्रमशः** क्रमेण **हुताशो** वह्निः, **वा** विकल्पार्थः, **स्तोकेन्धनावशेषो** हुताशमात्रं भवति, तथा **निर्वाति** [e] विध्यायति **ततः** स्तोकेन्धना**दपनीतश्चे**ति गाथार्थः ।।७३।।

**तह० गाहा ।।** अस्यैव [f] दृष्टान्तस्योपनयमाह – **तथा विषयेन्धनहीनो** गोचरेन्धन-रहित इत्यर्थः, **मन** एव दुःखदाहकारणत्वाद् **हुताशो** मनोहुताशः, **क्रमेण** परिपाट्या **तनुके** कृशे, क्व ? **विषयेन्धने** अणावित्यर्थः, किम्? **निरुध्यते** निश्चयेन ध्रियते, तथा **निर्वाति ततस्तस्मादणोरपनीतश्चे**ति गाथार्थः ।।७४।।

पुनरप्यस्मिन्नेवार्थे दृष्टान्तोपनयावाह –

**तोयमिव नालियाए तत्तायसभायणोदरत्थं वा ।**
**परिहाइ कमेण जहा तह जोगिमणोजलं जाण ।।७५।।**

**तोय० गाहा ।। तोयमिव** उदकमिव **नालिकाया** घटिकायास्तथा [a] तप्तं च तदायसभाजनं च लोहभाजनं **तप्तायसभाजनं तदुदरस्थम्, वा** विकल्पार्थः, **परिहीयते क्रमेण यथा,** एष दृष्टान्तः, [b] अयमुपनयः – **तथा** तेनैव प्रकारेण योगिमन एवाविकलत्वाज्जलं **योगिमनोजलं जानीहि** अवबुद्ध्यस्व, तथाऽप्रमादानलतप्तजीवभाजनस्थं मनोजलं परिहीयत इति भावना, अलमतिविस्तरेणेति गाथार्थः ।।७५।।

'अपनयति ततोऽपि जिनवैद्यः' इति वचनादेवं तावत् केवली मनोयोगं निरुणद्धीत्युक्तम्, अधुना शेषयोगनिरोधविधिमभिधातुकाम आह –

**एवं चिय वयजोगं निरुंभई कमेण [a] कायजोगंपि ।**
**तो सेलेसोव्व थिरो सेलेसी केवली होइ ।।७६।।**

**एवं चिय० गाहा ।। एवमेव** एभिरेव विषादिदृष्टान्तैः, किम् ? **वाग्योगं निरुणद्धि,** तथा **क्रमेण काययोगमपि** निरुणद्धीति वर्तते, **ततः शैलेश इव** मेरुरिव **स्थिरः** सन् **शैलेशी केवली भवतीति** [b] गाथाक्षरार्थः ।।७६।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

इह च भावार्थो नमस्कारनिर्युक्तौ प्रतिपादित एव, तथाऽपि स्थानाशून्यार्थं स एव लेशतः प्रतिपाद्यते । तत्र योगानामिदं स्वरूपम् – औदारिकादिशरीरयुक्तस्याऽऽत्मनो वीर्यपरिणति-विशेषः काययोगः, तथौदारिकवैक्रियाहारकशरीरव्यापाराहृतवाग्द्रव्यसमूहसाचिव्याज्जीव-व्यापारो वाग्योगः, तथौदारिकवैक्रियाहारकशरीरव्यापाराहृत[c]मनोद्रव्यसमूहसाचिव्याज्जी-वव्यापारो मनोयोग इति । स[१] चामीषां निरोधं कुर्वन् कालतोऽन्तर्मुहूर्तभाविनि परमपदे भवोपग्राहिकर्मसु [d]च वेदनीयादिषु समुद्घाततो निसर्गेण वा समस्थितिषु [e]सत्स्वेव तस्मिन् काले करोति, परिमाणतोऽपि-

पज्जत्तमित्तसन्निस्स जत्तियाइं जहण्णजोगिस्स ।
होंति मणोदव्वाइं तव्वावारो य जम्मत्तो ।।१।।

तदसंखगुणविहीणे समए समए निरुंभमाणो सो ।
मणसो सव्वनिरोहं कुणइ [f]असंखेज्जसमएहिं ।।२।।

पज्जत्तमित्तबिंदियजहण्णवइजोगपज्जया जे उ ।
तदसंखगुणविहीणे समए समए निरुंभंतो ।।३।।

---

[१] A मू० **चत्तारि झाणा पं० तं०......सुक्के झाणे चउव्विहे चउप्पडोआरे.... ।।**

**–स्था. सू. २४७, भग. सू. ८०२, औप. सू. २० ।।**

वृ० इह चान्त्ये शुक्लभेदद्वये अयं क्रमः- केवली किलान्तर्मुहूर्त्तभाविनी परमपदे भवोपग्राहिकर्म्मसु च वेदनीयादिषु समुद्घाततो निसर्गेण वा समस्थितिषु सत्सु योगनिरोधं करोति, तत्र च–

'पज्जत्तमेत्तसन्निस्स जत्तियाइं जहन्नजोगिस्स । होंति मणोदव्वाइं तव्वावारो य जम्मेत्तो ।। १ ।।

तदसंखगुणविहीणे समए समए निरुंभमाणो सो । मणसो सव्वनिरोहं कुणइ असंखेज्जसमएहिं ।। २ ।।

पज्जत्तमेत्तबिंदिय जहन्नवइजोगपज्जया जे उ । तदसंखगुणविहीणे समए समए निरुंभंतो ।। ३ ।।

सव्ववइजोगरोहं संखातीएहिं कुणइ समएहिं । तत्तो अ सुहुमपणगस्स पढमसमओववन्नस्स ।। ४ ।।

जो किर जहन्नजोगो तदसंखेज्जगुणहीणमेक्केक्के । समए निरुंभमाणो देहतिभागं च मुंचंतो ।। ५ ।।

रुंभइ स काययोगं संखाईतेहिं चेव समएहिं । तो कयजोगनिरोहो सेलेसीभावयामेइ ।। ६ ।।

शैलेशस्येव-मेरोरिव या स्थिरता सा शैलेशीति,

'हस्सक्खराइं मज्झेण जेण कालेण पंच भन्नंति । अच्छइ सेलेसिगओ तत्तियमेत्तं तओ कालं ।। १ ।।

तणुरोहारंभाओ झायइ सुहुमकिरियाणियट्टिं सो ।
वोच्छिन्नकिरियमप्पडिवाइं सेलेसिकालंमि ।। २ ।।" इति x x x ।– **स्थानाङ्गसूत्रवृत्तौ ।**

B सिज्झितुकामो जाहे कायजोगे निरुभती ताहे, तस्स सुहुमा उस्सासनिस्सासा, तत्थ य दुसमयट्ठितियं परमसातं इरियावधियं कम्मं बज्झति, तत्थ ततियं सुहुमकिरियं अणियट्टीझाणं भवति जोगनिरोधे

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सव्ववइजोगरोहं संखाईएहिं कुणइ समएहिं ।
तत्तो य सुहुमपणगस्स पढमसमओववन्नस्स ।।४।।
जो किर जहण्णजोओ तदसंखेज्जगुणहीणमेक्केक्के ।
समए निरुंभमाणो देहतिभागं च मुंचंतो ।।५।।
रुंभइ स कायजोगं संखाईएहिं चेव समएहिं ।
तो कयजोगनिरोहो सेलेसीभावयामेइ ।।६।।
सेलेसो किर मेरू सेलेसी होइ जा तहाऽचलया ।
होउं च असेलेसो सेलेसी होइ थिरयाए ।।७।।
[२]अहवा सेलु व्व इसी सेलेसी होइ सो उ थिरयाए ।
सेव अलेसी होई सेलेसीहो अलोवाओ ।।८।।
सीलं व समाहाणं निच्छयओ सव्वसंवरो सो य ।
तस्सेसो सीलेसो सीलेसी होइ [g]तयवत्था ।।९।।
हस्सक्खराइं मज्झेण जेण कालेण पंच भण्णंति ।
अच्छइ सेलेसिगओ तत्तियमेत्तं तओ कालं ।।१०।।
तणुरोहारंभाओ झायइ सुहुमकिरियाणियट्टिं सो ।
वोच्छिन्नकिरियमप्पडिवाई सेलेसिकालंमि ।।११।। [विशेषा. ३०५९-३०६९]

---

कते पुव्वपयोगेणं, चउत्थं समुच्छिन्नकिरियमप्पडिवादि झाणं णाणाठाणोदयं जथा तथा झायति, अहवा कुलालचक्केण दिट्ठंतो, जथा दंडपुरिसपयत्तविरामवियोगेण कुलालचक्कं भमति तथा सयोगि[illegible]वलिणा पुव्वारद्धे सुक्कज्झाणे अजोगिकेवलीभावेण सुक्कज्झायी भवति ।

**—आवश्यकचूर्णौ** ।।

२ A सेलीसीति प्राकृतनामाधिकृत्य व्युत्पत्तिमाह-**'अहवा सेलोव्व इसी'** गाहा, व्याख्या-सेल इव इसी-महर्षिः शैलेशीति भवति, ननु शैलेशी तस्य महर्षेः काचिद्विशिष्टाऽवस्थैवोच्यते, कथं शैलेशीप्रतिपत्ता मुनिरप्येवं व्यपदिश्यत ? इत्याह – सोऽप्येवं व्यपदेश्यो भवति स्थिरतया हेतुभूतया, स हि महर्षिस्तस्यामवस्थायां शैलवत् स्थिरो भवतीति शैलेशीत्युच्यते, एनमेव प्राकृतशब्दमधिकृत्य व्युत्पत्त्यन्तरमाह-**सो वे**ति वाशब्दः पक्षान्तरद्योतकः, स शैलेशीप्रतिपत्ता मुनिः **अलेसी होई** त्ति तस्यामवस्थायामलेश्यः-समस्तलेश्याविकलो भवतीतिकृत्वा, अलेशीतिपदसम्बन्धिनोऽकारस्य लोपं कृत्वा सेलेसीति प्राकृतशब्देन सेलेसी प्रतिपत्ताभिधीयत इति गाथार्थः।। **—आवश्यकटिप्पनके** ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तयसंखेज्जगुणाए गुणसेढीए रइयं पुरा कंमं ।
समए समए खवियं कमसो सेलेसिकालेणं ।।१२।।

सव्वं खवेइ तं पुण निल्लेवं किंचि दुचरिमे समए ।
किंचिच्च होंति चरमे सेलेसीए तयं वोच्छं ।।१३।।

मणुयगइ-जाइ-तस-बादरं च पज्जत्त-सुभगमाएज्जं ।
अन्नयरवेयणिज्जं नराउमुच्चं जसोनामं ।।१४।।

संभवओ जिणणामं नराणुपुव्वी य चरिमसमयंमि ।
सेसा जिणसंताओ दुचरिमसमयंमि निट्ठंति ।।१५।।

ओरालियाहिं सव्वाहिं चयइ *विप्पजहणाहिं ✣जं भणियं ।
निस्सेसतया न जहा देसच्चाएण सो पुव्वं ।।१६।।

तस्सोदइया भावा भव्वत्तं च विणियत्तए समयं ।
सम्मत्त-णाण-दंसण-सुह-सिद्धत्ताणि मोत्तूणं ।।१७।।

उजुसेढिं पडिवन्नो समयपएसंतरं अफुसमाणो ।
एगसमएण सिज्झइ अह सागारोवउत्तो सो ।।१८।। [विशेषा. ३०८२-३०८८]

अलमतिप्रसङ्गेनेति गाथार्थः ।।७६।।

उक्तं **क्रमद्वारम्**, इदानीं **ध्यातव्यद्वारं** विवृण्वन्नाह –

**[१]उप्पाय-ट्ठिइ-भंगाइपज्जयाणं [a]जमेगदव्वंमि ।**
**नाणानयाणुसरणं पुव्वगयसुयाणुसारेणं ।।७७।।**

**सवियारमत्थ-वंजण-जोगंतरओ तयं पढमसुक्कं ।**
**होइ पुहुत्तवितक्कं सवियारमरागभावस्स ।।७८।।**

---

* **विप्प** इति विप्रत्ययनाभिः । – **ध्यानशतकवृत्ति-विषमपदपर्याये** ।।

✣ **जं भणियं** इति अयं भावार्थः । – **ध्यानशतकवृत्ति-विषमपदपर्याये** ।।

[१] A मू० **चत्तारिझाणा पं० x x x सुक्के झाणे चउव्विहे चउप्पडोआरे पं० तं० पुहुत्तवितक्के सवियारी १, एगत्त वितक्के अवियारी** x x x
– **स्था. सू. २४७, भग. सू. ८०२, औ. सू. २०** ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

वृ० x x x अथ शुक्लमाह—**पुहुत्तवितक्के** त्ति पृथक्त्वेन-एकद्रव्याश्रितानामुत्पादादिपर्यायाणां भेदेन पृथुत्वेन वा विस्तीर्णभावेनेत्यन्ये वितर्को-विकल्पः पूर्वगतश्रुतालम्बनो नानानयानुसरणलक्षणो यस्मिंस्तत्तथा, पूज्यैस्तु वितर्कः श्रुतालम्बनतया श्रुतमित्युपचारादधीत इति, तथा विचरणम्-अर्थाद् व्यञ्जने व्यञ्जनादर्थे ततो मनःप्रभृतीनां योगानामन्यतरस्मादन्यतरस्मिन्निति विचारो 'विचारोऽर्थ-व्यञ्जन-योगसङ्क्रान्ति'रिति [तत्त्वा० अ० ९ सू० ४६] वचनात्, सह विचारेण सविचारि, सर्वधनादित्वादिन्समासान्तः, उक्तं च— [ध्यानशतके]

"उप्पायठितिभंगाइं पज्जयाणं जमेगदव्वंमि । नाणानयाणुसरणं पुव्वगयसुयाणुसारेणं ।। ७७ ।।
सवियारमत्थवंजणजोगंतरओ तयं पढमसुक्कं । होंति पुहुत्तवियक्कं सवियारमरागभावस्स ।। ७८ ।।"

इत्येको भेदः x x x ।। — **स्थानाङ्गसूत्रवृत्तौ** ।।

B **मू० शुक्ले चाद्ये ।। ९-३९ ।।**

**भा० शुक्ले चाद्ये ध्याने पृथक्त्ववितर्कैकत्ववितर्के चोपशान्तक्षीणकषाययोर्भवतः ।। ३९ ।।**

वृ० **शुक्ले चाद्ये** इति । **शुक्ले ध्याने उपशान्तक्षीणकषाययोर्भवतः** । के पुनस्ते? पृथक्त्वैकत्ववितर्के । स्वरूपतः कीदृशे ?। उच्यते— पृथग्-अयुतकं भेदः तद्भावः पृथक्त्वम्-अनेकत्वं तेन सह गतो वितर्कः, पृथक्त्वमेव वा वितर्कः सहगतं वितर्कपुरोगं पृथक्त्ववितर्कम् । तच्च परमाणुजीवादावेकद्रव्ये उत्पादव्ययध्रौव्यादिपर्यायानेकतयाऽपि तत्त्वं तत् पृथक्त्वं पृथक्त्वेन पृथक्त्वे वा तस्य चिन्तनं वितर्कसहचरितं सविचारं च यत् तत् पृथक्त्ववितर्कं सविचारं तच्च पृथक्त्वमर्थव्यञ्जनयोगानां वक्ष्यति—"तत् त्र्येककाययोगायोगानाम्", "वितर्कः श्रुतम्", "विचारोऽर्थव्यञ्जनयोगसङ्क्रान्तिः" [अ० ९, सू० ४३ ४५, ४६] । पूर्वगतभङ्गिकश्रुतानुसारेणार्थ-व्यञ्जन-योगान्तरप्राप्तिः- गमनं विचारः । अर्थाद् व्यञ्जनसङ्क्रान्तिः, व्यञ्जनादर्थसङ्क्रान्तिः, मनोयोगात् काययोगसङ्क्रान्तिर्वाग्योगसङ्क्रान्तिर्वा । एवं काययोगान्मनोयोगं वाग्योगं वा सङ्क्रामति । तथा वाग्योगान्मनोयोगं काययोगं वेति । यत्र सङ्क्रामति तत्रैव निरोधो ध्यानमिति x x x ।।

**—तत्त्वार्थ. सिद्ध. वृत्तौ** ।।

C **अव०** शुक्लध्यानस्य भेदानाह—

**ज्ञेयं नानात्वश्रुतविचारमैक्यश्रुताविचारं च । सूक्ष्मक्रियमुत्सन्नक्रियमिति भेदैश्चतुर्धा तत् ।। ५ ।।**

वृ० **नानात्वं** पृथक्त्वम्, **श्रुतं** वितर्कः, **विचारो**ऽर्थव्यञ्जनयोगसंक्रान्तिः, इति पृथक्त्ववितर्कं सविचारं प्रथमम् । ऐक्यमपृथक्त्वम्, एकत्ववितर्कमविचारं च द्वितीयम् । **सूक्ष्मक्रियम**प्रतिपातीति तृतीयम् । **उत्सन्नक्रियम**निवर्तीति चतुर्थम् । एवं चतुर्विधं शुक्लध्यानम् ।। ५ ।।

**अव०** अथाद्यभेदं व्याचष्टे—

**एकत्र पर्यायाणां विविधनयानुसरणं श्रुताद् द्रव्ये ।**
**अर्थव्यञ्जनयोगान्तरेषु संक्रमणयुक्तमाद्यं तत् ।। ६ ।।**

वृ० **एकस्मिन्** परमाण्वात्मादौ **द्रव्ये पर्यायाणामु**त्पाद-स्थिति-भङ्ग-मूर्त्तत्वा-ऽमूर्त्तत्वादीनां **विविधनयै**र्द्रव्यार्थिक-पर्यायार्थिकादिभिर्य**दनुसरणम**नुचिन्तनम्, **श्रुतात्** पूर्वविदां पूर्वगतश्रुतानुसारेण, इतरेषां त्वन्यथा, **तदाद्यं**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**उप्पायट्ठिइ० गाहा ।। उत्पाद-स्थिति-भङ्गादिपर्यायाणाम्** उत्पादादयः प्रतीताः, आदिशब्दान्मूर्ता-ऽमूर्तग्रहः, अमीषां पर्यायाणां **यदेकस्मिन् द्रव्ये**[2] अण्वात्मादौ, किम् ? **नानानयैर्द्रव्यास्तिकादिभिरनुस्मरणं** चिन्तनम्, कथम् ? **पूर्वगतश्रुतानुसारेण** पूर्वविदः, मरुदेव्यादीनां त्वन्यथा ।।७७।।

---

शुक्लमिति संबन्धः। कथंभूतम् ? **अर्थ-व्यञ्जन-योगान्तरेषु संक्रमणयुक्तम्** । अर्थो द्रव्यम्, तस्माद्व्यञ्जने शब्दे शब्दाच्चार्थे संक्रमणम्, योगाद् योगान्तरसंक्रमणं तु मनोयोगात् काययोगे वाग्योगे वा संक्रान्तिः, एवं काययोगान्मनोयोगे वाग्योगे वा, वाग्योगान्मनोयोगे काययोगे वा संक्रमणम्, तेन युक्तम् । यदाहुः-

"उप्पाय-ठिई-भंगाइपज्जवाणं जमेगदव्वम्मि । नाणानयानुसरणं पुव्वगयसुयाणुसारेण ।। ७७ ।।

सवियारमत्थवंजणजोगंतरओ तयं पढमसुक्कं । होइ पुहुत्तवियक्कं सवियारमरागभावस्स ।। ७८ ।।

[ध्यानशतके]

ननु अर्थ-व्यञ्जन-योगान्तरेषु संक्रमणात् कथं मनःस्थैर्यम् ? तदभावाच्च कथं ध्यानत्वम् ? उच्यते- - एकद्रव्यविषयत्वे मनःस्थैर्यसंभवाद् ध्यानत्वमविरुद्धम् ।। ६ ।। **—योगशास्त्रे, प्र. ११ ।।**

D **अव०** अथाद्यशुक्लध्यानस्य नामाह—

**सवितर्कं सविचारं सपृथक्त्वमुदाहृतम् । त्रियोगयोगिनः साधोराद्यं शुक्लं सुनिर्मलम् ।। ६० ।।**

**वृ०** **त्रियोगयोगिनः साधोर्**मनोवचःकाययोगवतो मुनेः **आद्यं** प्रथमं **शुक्ल**ध्यानम् **उदाहृतं** प्रोक्तम्, तत्कथंभूतम् ? सह वितर्केण वर्त्तते इति **सवितर्कम्,** सह विचारेण वर्तते इति **सविचारम्,** सह पृथक्त्वेन वर्त्तत इति **सपृथक्त्वम्,** इति विशेषणत्रयोपेतत्वात् पृथक्त्ववितर्कसविचारनामकं प्रथमं शुक्लध्यानमिति ।। ६० ।। **—गुणस्थानकक्रमारोहे ।।**

E **सवितर्कं सविचारं, सपृथक्त्वं तदाऽऽदिमम् । नानानयाऽऽश्रितं तत्र, वितर्कः पूर्वगं श्रुतम् ।। ७४ ।।**

**अर्थव्यञ्जनयोगानां, विचारोऽन्योऽन्यसङ्क्रमः । पृथक्त्वं द्रव्यपर्याय-गुणाऽन्तरगतिः पुनः ।। ७५ ।।**

**त्रियोगयोगिनः साधो-वितर्काद्यन्वितं ह्यदः । ईषच्चलत्तरङ्गाऽब्धेः, क्षोभाऽभावदशानिभम् ।। ७६ ।।**

**—अध्यात्मसारे, अ. १६ ।।**

F **सवितर्कसविचारं पृथक्त्वं च प्रकीर्तितम् । शुक्लमाद्यं द्वितीयं च विपर्यस्तमतः परम् ।। १९७ ।।**

**—ध्यानदीपिकायाम् ।।**

[२] **मू०** **एकाश्रये सवितर्के पूर्वे ।। ९-४४ ।।**

**भा०** **एकद्रव्याश्रये सवितर्के पूर्वे ध्याने प्रथमद्वितीये । तत्र सविचारं प्रथमम्, अविचारं द्वितीयम्, अविचारं सवितर्कं द्वितीयं ध्यानं भवति ।। ४४ ।।**

**वृ०** एक आश्रय-आलम्बनं ययोस्ते एकाश्रये एकद्रव्याश्रये इति पूर्वविदाराभ्ये मतिगर्भश्रुतप्रधान-व्यापाराच्चैकाश्रयतापरमाणुद्रव्यमेकमालम्ब्यात्मादिद्रव्यं वा श्रुतानुसारेण निरुद्धचेतसः शुक्लध्यानमिति "वितर्कः श्रुतम्" वक्ष्यति [अ० ९, सू० ४५] इति । सह वितर्केण सवितर्कम्, पूर्वगत-

**सवियार० गाहा ।।** तत्किमित्याह – **सविचारम्** सह विचारेण वर्तत इति सविचारम्, विचार: अर्थ-व्यञ्जन-योगसंक्रम इति, आह च– **अर्थ-व्यञ्जन-योगान्तरत: अर्थो** द्रव्यम्, **व्यञ्जनं** शब्द:, **योग:** मन:प्रभृति, एतदन्तरत: [b] एतद्भेदेन सविचारम्, अर्थाद् व्यञ्जनं संक्रामतीति विभाषा, [c] **तकद्** एतत् [d] **प्रथमं शुक्लम्** आद्यं शुक्लं **भवति,** किंनामेत्यत आह – [३] **पृथक्त्ववितर्कं सविचारम्** पृथक्त्वेन भेदेन, विस्तीर्णभावेनान्ये, वितर्क: – श्रुतं यस्मिन् तत्तथा, कस्येदं भवतीत्यत आह- **अरागभावस्य** रागपरिणामरहितस्येति [e] गाथाद्वयार्थ: ।।७८।।

---

श्रुतानुसारिणीत्यर्थ: । पूर्वं च पूर्वं च पूर्वे ध्याने । एतदेव निश्चिनोति– प्रथमद्वितीये इति पृथक्त्ववितर्कमेकत्ववितर्कं च । तत्र-तयोर्यत् प्रथमम्-आद्यं पृथक्त्ववितर्कं तत् सविचारं सह विचारेण सविचारं सह सङ्क्रान्त्येति यावत् । वक्ष्यति [अ० ९, सू० ४६] "विचारोऽर्थव्यञ्जन-योगसङ्क्रान्ति:" । कथं पुनरनुपात्तं सूत्रे सविचारमिति गम्यते ? अविचारं द्वितीयमिति वचनादर्थलभ्यं प्रथमं सविचारमिति ।

अविचारं द्वितीयम् । अविद्यमानविचारम् अविचारम्, अर्थव्यञ्जनयोगसङ्क्रान्तिरहितमित्यर्थ: । द्वितीयमिति सूत्रक्रमप्रामाण्यादेकत्ववितर्कमविचारम् भवति ध्यानमिति ।। ४४ ।।

भा० **अत्राह—वितर्कविचारयो: क: प्रतिविशेष इति ?। अत्रोच्यते—**

वृ० **अत्राहे**त्यादि वितर्कविचारयोर्विशेषमजानान: स्वरूपमवगच्छन् पर: पृच्छति–क: प्रतिविशेष इति । प्रतिशब्दस्तत्त्वाख्यायां वर्तते । यथा-शोभनश्चैत्र: प्रतिमातरमेवं प्रतिविशेष: स्वरूपमितरेतरव्यावृत्तं तत्त्वं वितर्कविचारयो: कीदृगिति तत्त्वमाख्यायताम्। अत्रोच्यत इत्याह–

**—तत्त्वार्थ. सिद्ध. वृत्तौ ।।**

[३] A मू० **वितर्क: श्रुतम् ।। ९-४५ ।।**

भा० **यथोक्तं श्रुतज्ञानं वितर्को भवति ।। ४५ ।।**

वृ० वितर्को-मतिज्ञानं विकल्प: । वितर्क्यते-येनालोच्यते पदार्थ: स वितर्क: तदनुगतं श्रुतं वितर्क: तदभेदाद् विगतं तर्कं वा वितर्कम्, संशयविपर्ययोपेतं श्रुतज्ञानमित्यर्थ: । इदमेव सत्यमित्यविचलितस्वभावम् । यथोक्तमिति पूर्वगतमेव, नेतरत् । श्रुतज्ञानमाप्तवचनं वितर्क उच्यते इति ।। ४५ ।।

**—तत्त्वार्थ. सिद्ध. वृत्तौ ।।**

अव० विचारस्वरूपनिरूपणायाह -

B मू० **विचारोऽर्थव्यञ्जनयोगसङ्क्रान्ति: ।।९-४६।।**

भा० **अर्थव्यञ्जनयोगसङ्क्रान्तिर्विचार इति । एतदभ्यन्तरं तप: संवरत्वादभिनवकर्मोपचयप्रतिषेधकं निर्जरणफलत्वात् कर्मनिर्जरकम् । अभिनवकर्मोपचयप्रतिषेधकत्वात् पूर्वोपचितकर्मनिर्जरकत्वाच्च निर्वाणप्रापकमिति ।।४६।।**

वृ० अर्थव्यञ्जनयोर्योगेषु च सङ्क्रमणं सङ्क्रान्ति: । अर्थ:-परमाण्वादि:, व्यञ्जनं तस्य वाचक: शब्द:,

**जं पुण सुणिप्पकंपं निवायसरणप्पईवमिव चित्तं ।**
**उप्पाय-ट्ठिइ-भंगाइयाणमेगम्मि पज्जाए ।।७९।।**

---

योगा-मनोवाक्कायास्तेषु सङ्क्रमणं सङ्क्रान्तिरेकद्रव्ये अर्थस्वरूपात् व्यञ्जनं व्यञ्जनस्वरूपादर्थं वर्णादिकः पर्यायोऽर्थः व्यञ्जनशब्दः । एतदुक्तं भवति-प्राक्**शब्द**स्ततस्तत्त्वालम्बनमिदमस्य स्वरूपमयमस्य पर्यायस्ततस्तदर्थचिन्तनं साकल्येन, ततः शब्दार्थस्वरूपविशेषचिन्ताप्रतिबन्धः प्रणिधानमर्थसङ्क्रान्तिः, काययोगोपयुक्तध्यानस्य वाग्योगसञ्चारः, वाग्योगोपयुक्तध्यानस्य वा मनोयोगसञ्चारः इत्येवमन्यत्रापि योज्यम् । इत्थंलक्षणो विचार इत्यस्ति वितर्कविचारयोः प्रतिविशेष इति ।।

**—तत्वार्थ. सिद्ध. वृत्तौ ।।**

C **अव०** अथ तद्विशेषणत्रयस्य स्वरूपमाह—

**श्रुतचिन्ता वितर्कः स्यात्, विचारः संक्रमो मतः ।**
**पृथक्त्वं स्यादनेकत्वं भवत्येतत्त्रयात्मकम् ।। ६१ ।।**

**वृ०** एतत्प्रथमं शुक्लध्यानं **त्रयात्मकं** क्रमोत्क्रमगृहीतविशेषणत्रयरूपम्, तत्र **श्रुतचिन्ता**रूपो **वितर्कः**, अर्थशब्दयोगान्तरेषु **संक्रमो विचारः**, द्रव्यगुणपर्यायादिभिरन्यत्वं **पृथक्त्वम्** ।। ६१ ।।

**अव०** अथैतत्त्रयस्य क्रमेण व्यक्तार्थं व्याचिख्यासुः प्रथमं वितर्कमाह–

**स्वशुद्धात्मानुभूतात्मभावश्रुतावलम्बनात् ।**
**अन्तर्जल्पो वितर्कः स्याद्, यस्मिंस्तत्सवितर्कजम् ।। ६२ ।।**

**वृ०** **यस्मिन्** ध्यानेऽ**न्तर्जल्पो**ऽन्तरङ्गध्वनिरूपो **वितर्को** विचारणात्मक**स्तत्सवितर्कं** ध्यानं **स्यात्**, कस्मात् ? **स्वशुद्धात्मानुभूतात्मभावश्रुतावलम्बनात्** स्वकीयनिर्मलपरमात्मतत्त्वानुभवमयान्तरङ्गभावगतागमावलम्बनतः, इत्युक्तं सवितर्कं ध्यानम्।। ६२ ।।

**अव०** अथ सविचारमाह—

**अर्थादर्थान्तरे शब्दा-च्छब्दान्तरे च संक्रमः ।**
**योगाद्योगान्तरे यत्र, सविचारं तदुच्यते ।। ६३ ।।**

**वृ०** **यत्र** ध्याने स एव पूर्वोक्तो वितर्को विचारणात्मकोऽ**र्थान्तरे** संक्रमते, **योगाद्योगान्तरे** संक्रमते **तद्ध्यानं सविचारं** ससंक्रमण**मुच्यत** इति ।। ६३ ।।

**द्रव्याद् द्रव्यान्तरं याति, गुणाद्याति गुणान्तरम् ।**
**पर्यायादन्यपर्यायं, सपृथक्त्वं भवत्यतः ।। ६४ ।।**

**वृ०** यत्र ध्याने स एव पूर्वोक्तो वितर्कः सविचारोऽर्थव्यञ्जनयोगान्तरसंक्रमणरूपोऽपि निजशुद्धात्मवद् **द्रव्यान्तरं याति**, अथवा **गुणाद् गुणान्तरं याति**, यद्वा **पर्यायान्तरं याति**, तत्र—

सहजाता गुणा द्रव्ये, सुवर्णे पीतता यथा । क्रमभूतास्तु पर्याया, मुद्राकुण्डलतादयः ।। १ ।।

तेषु द्रव्यगुणपर्यायान्तरेषु अन्यत्वं-पृथक्त्वं तदस्ति यत्र ध्याने **तत्सपृथक्त्वम्** ।। ६४ ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**अवियारमत्थ-वंजण-जोगंतरओ तयं [a]बिइयसुक्कं ।**
**पुव्वगयसुयालंबणमेगत्तवितक्कमवियारं[१] ।।८०।।**

**जं पुण० गाहा ।। यत्पुनः [b]मुनिः सुनिष्प्रकम्पम्** विक्षेपरहितं **निवातशरणप्रदीप इव** निर्गतवातगृहैकदेशस्थदीप इव **चित्तम्** अन्तःकरणम्, क्व ? **उत्पाद-स्थिति-भङ्गादीनामेकस्मिन् पर्याये** ।।७९।।

---

**अव०** अथाद्यशुक्लध्यानजनितां शुद्धिमाह—

**इति त्रयात्मकं ध्यानं, प्रथमं शुक्लमीरितम् ।**
**प्राप्नोत्यतः परां शुद्धिं, सिद्धिश्रीसौख्यवर्णिकाम् ।। ६५ ।।**

**वृ०** **इति त्रयात्मकं** पृथक्त्ववितर्कसविचारात्मकं **प्रथमं शुक्लध्यानं** कथितम्, तस्माद्ध्यानात् **परां** प्रकृष्टां **शुद्धिं प्राप्नोति,** कथंभूताम् ? **सिद्धिश्रीसौख्यवर्णिकां** मुक्तिलक्ष्मीमुखनिदर्शनिकामासादयतीत्यर्थः ।। ६५ ।।

**—गुणस्थानकक्रमारोहे ।।**

१ A **मू०** **चत्तारि झाणा पं०** x x x **सुक्के झाणे चउव्विहे चउप्पडोआरे पं० तं० पुहुत्तवितक्के सवियारी १, एगत्तवितक्के अवियारी,** x x x ।।

**—स्था. सू. २४७, भग. सू. ८०२, औप. सू. २० ।।**

**वृ०** तथा '**एगत्तवियक्के**'त्ति एकत्वेन- अभेदेनोत्पादादिपर्यायाणामन्यतमैकपर्यायालन्बनतयेत्यर्थो वितर्क्कः पूर्वगतश्रुताश्रयो व्यञ्जनरूपोऽर्थरूपो वा यस्य तदेकत्ववितर्कम्, तथा न विद्यते विचारोऽर्थव्यञ्जन-योरितरस्मादितरत्र तथा मनःप्रभृतीनामन्यतरस्मादन्यत्र सञ्चरणलक्षणो निर्वाणगृहगतप्रदीपस्येव यस्य तदविचारीति पूर्ववदिति, उक्तं च —[ध्यानशतके]

जं पुण सुणिप्पकंपं निवायसरणप्पईवमिव चित्तं । उप्पायठिइभंगाइयाणमेगम्मि पज्जाए ।। ७९ ।।
अवियारमत्थवंजणजोगंतरओ तयं बिइयसुक्कं। पुव्वगयसुयालंबणमेगत्तवितक्कवियारं ।। ८० ।। "
इति द्वितीयः, x x x ।

**— स्थानाङ्गसूत्रवृत्तौ ।।**

B **मू०** **शुक्ले चाद्ये** ।। ९-३९ ।।

**वृ०** x x x एकस्य भाव एकत्वं , एकत्वगतो वितर्क एकत्ववितर्कः । एक एव योगस्त्रयाणा-मन्यतमस्तथा अर्थो व्यञ्जनं चैकमेव पर्यायान्तरानर्पितमेकपर्यायचिन्तनमुत्पादव्ययध्रौव्यादि-पर्यायाणामेकस्मिन् पर्याये निवातशरणप्रतिष्ठितप्रदीपवन्निष्प्रकम्पम्, पूर्वगतश्रुतानुसारि चेतो निर्विचारमर्थव्यञ्जनयोगान्तरेषु तदेकत्ववितर्कमविचारम्। आह च -

क्षीणकषायस्थानं, तत् प्राप्य ततो विशुद्धलेश्यः सन् ।
एकत्ववितर्काविचारं ध्यानं ततोऽध्येति ।। १ ।।
एकार्थाश्रयमिष्टं, योगेन च केनचित् तदेकेन।
ध्यानं समाप्यते यत्, कालोऽल्पोऽन्तर्मुहूर्तश्च ।। २।।

Jain Education International 2010_02    For Private & Personal Use Only    www.jainelibrary.org

श्रुतमुच्यते वितर्कः, पूर्वाभिहितार्थनिश्चितमतेश्च।
ध्यानं तदिष्यते येन तेन सवितर्कमिष्टं तत् ।। ३ ।।
अर्थव्यञ्जनयोगानां सङ्क्रान्तिरुदितो हि विचारः।
तदभावात् तद् ध्यानं, प्रोक्तमविचारमर्हद्भिः ।। ४ ।।
व्युत्सर्गविवेकात् सं-मोहाव्ययलिङ्गमिष्यते शुक्लम्।
न च सम्भवन्ति कात्स्न्र्ये-न तानि लिङ्गानि मोहवतः।। ५ ।।
व्युत्सर्गः सङ्गत्यागः देहोपधीनां विवेकः।
प्रीत्यप्रीतिविरहितं, ध्यायंस्तदुपेक्षकः प्रसन्नं सः ।। ६ ।।
प्राप्नोति परं ह्लादं, हिमातपाभ्यामिव विमुक्तम् ।
तेन ध्यानेन यथा-ख्यातेन च संयमेन घातयति ।। ७ ।।
शेषाणि घातिकर्माणि युगपदपरञ्जनानि ततः।
कात्स्न्र्यान्मस्तकशूच्यां, यथा हतायां हतो भवति तालः।।
कर्माणि क्षीयन्ते, तथैव मोहे हते कात्स्न्र्यात् ।। ८ ।।
निद्राप्रचले द्विचरम-समये तस्य क्षयं समुपयातः ।
चरमान्ते क्षीयन्ते, शेषाणि तु घातिकर्माणि ।। ९ ।।
आवरणचरमसमये, तस्य दयाभावितात्मनो भवति ।
जीवैस्ततं जगत् प-श्यतो हि भावक्षयोपशमः ।। १०।।
शटितप्रायं हि तदा-ऽऽवरणं परमावधिश्च भवति तदा।
अथ कात्स्न्र्यात् तत्पतनाद् द्वितीयसमये क्षयायैति ।। ११ ।।
तस्य हि तस्मिन् समये, केवलमुत्पद्यते गततमस्कम् ।
ज्ञानं च दर्शनं चा-वरणद्वयसङ्क्षयाच्छुद्धम् ।। १२ ।।
चित्रं चित्रपटनिभं, त्रिकालसहितं ततः सलोकमिमम् ।
पश्यति युगपत् सर्वं, सालोकं सर्वभावज्ञम् ।। १३ ।।
वीर्यं निरन्तरायं, भवत्यनन्तं तथैव तस्य तदा ।
कल्पातीतस्य महा- त्मनोऽन्तरायक्षयः कात्स्न्र्यात् ।। १४ ।।
स ततो वेदयमानो, विहरति चत्वारि शेषकर्माणि ।
आयुष्यस्य समाप्ति-र्यावत् स्याद् वेद्यमानस्य ।। १५ ।।
भाष्यकारस्तु पूर्वविद इति सूत्रावयवं पृथग् विवृणोति सम्बन्धयति । एवमेते शुक्लध्याने पूर्वविदो भवतः ।। ३९ ।। **-तत्त्वार्थ. सिद्ध. वृत्तौ ।।**

C **अव० द्वितीयभेदं व्याचष्टे-**

**एवं श्रुतानुसारादेकत्ववितर्कमेकपर्याये । अर्थव्यञ्जनयोगान्तरेष्वसंक्रमणमन्यत्तु ।।७।।**

वृ० एवं **श्रुतानुसारा**दिति पूर्वविदां पुर्वगतश्रुतानुसारादितरेषामन्यथापि **एकपर्यायविषयमेकत्ववितर्कं** नाम द्वितीयं शुक्लध्यानम्, त**च्चार्थ-व्यञ्जनयोगेष्वसंक्रमणस्वरूपम्** । यदाहुः- [ध्यानशतके]

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**अवियार० गाहा** ।। [c]तत् किम् ? अत आह - **अविचारम्** असंक्रमम्, कुतः ? **अर्थ-व्यञ्जन-योगान्तरत** इति पूर्ववत्, [d]**तकमेवं**विधं [e]**द्वितीयशुक्लं** भवति, किमभिधानमिति अत आह - [२]**एकत्ववितर्कमविचारम्** एकत्वेन - अभेदेन, वितर्कः- व्यञ्जनरूपोऽर्थरूपो वा यस्य तत्तथा इदमपि च **पूर्वगतश्रुतानुसारेणैव** भवति, अविचारादि पूर्ववदिति गाथाद्वयार्थः ।।८०।।

---

जं पुण सुणिप्पकंपं निवायसरणप्पईवमिव चित्तं । उप्पाय-ठिइ-भंगाइयाणमेगम्मि पज्जाए ।। ७९ ।।
अवियरमत्थवंजणजोगंतरओ तयं बिइयसुक्कं । पुव्वगयसुयालंबणमेगत्तवितक्कमवियारं ।। ८० ।।

**—योगशास्त्रे, प्र. ११ ।।**

D **अव०** अथ तदेव शुक्लध्यानं सनामविशेषणमाह -

**अपृथक्त्वमविचारं सवितर्कगुणान्वितम् । स ध्यायत्येकयोगेन, शुक्लध्यानं द्वितीयकम् ।। ७५ ।।**

**वृ०** स क्षपकः क्षीणमोहगुणस्थानवर्ती **द्वितीयं शुक्लध्यानमेकयोगेन** एकतरयोगेन **संध्यायति**, यदाह–
एकं त्रियोगभाजामाद्यं स्यादपरमेकयोगवताम् । तनुयोगिनां तृतीयं, निर्योगानां चतुर्थं तु ।।१।।
कथंभूतम् ? **अपृथक्त्वं** पृथक्त्ववर्जितम् **अविचारं** विचाररहितं **सवितर्कगुणान्वितं** वितर्कमात्रगुणोपेतं द्वितीयं शुक्लध्यानं ध्यायतीत्यर्थः ।।७५।। **—गुणस्थानक्रमारोहे ।।**

E **एकत्वेन वितर्केण, विचारेण च संयुतम् । निर्वातस्थप्रदीपाऽऽभं, द्वितीयं त्वेकपर्ययम् ।। ७७ ।।**

**—अध्यात्मसारे, अ. १६ ।।**

F **सवितर्कसविचारं पृथक्त्वं च प्रकीर्तितम् । शुक्लमाद्यं द्वितीयं च विपर्यस्तमतः परम् ।। १९७ ।।**

**—ध्यानदीपिकायाम् ।।**

२ A **तत्र श्रुताद् गृहीत्वैकमर्थमर्थाद् व्रजेच्छब्दम् । शब्दात् पुनरप्यर्थं योगाद्योगान्तरं च सुधीः । १५ ।।**
**संक्रामत्यविलम्बितमर्थप्रभृतिषु यथा किल ध्यानी । व्यावर्तते स्वयमसौ पुनरपि तेन प्रकारेण ।। १६ ।।**
**इति नानात्वे निशिताभ्यासः संजायते यदा योगी । आविर्भूतात्मगुणस्तदैकताया भवेद्योग्यः ।। १७ ।।**
**उत्पाद-स्थिति भङ्गादिपर्ययाणां यदेकयोगः सन् ।**
**ध्यायति पर्ययमेकं तत् स्यादेकत्वमविचारम् ।। १८ ।।**

**अव०** द्वितीयध्यानस्य फलमाह –

**ज्वलति ततश्च ध्यानज्वलने भृशमुज्ज्वले यतीन्द्रस्य ।**
**निखिलानि विलीयन्ते क्षणमात्राद् घातिकर्माणि ।। २१।।**

**वृ०** स्पष्टा ।। २१ ।।

**अव०** घातिकर्माण्याह-

**ज्ञानावरणीयं दृष्ट्यावरणीयं च मोहनीयं च ।**
**विलयं प्रयान्ति सहसा सहान्तरायेण कर्माणि ।। २२ ।।**

**वृ०** स्पष्टा ।। २२ ।।

**अव०** घातिकर्मक्षये फलमाह–

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**संप्राप्य केवलज्ञान-दर्शने दुर्लभे ततो योगी ।**
**जानाति पश्यति तथा लोकाकोकं यथावस्थम् ।। २३ ।।**

वृ॰ ध्यानान्तरे वर्तमान इति शेषः ।। २३ ।।

**—योगशास्त्रे, प्र. ११ ।।**

B **अव॰** अथापृथक्त्वमेव व्यक्तमाह —

**निजात्मद्रव्यमेकं वा, पर्यायमथवा गुणम् । निश्चलं चिन्त्यते यत्र, तदेकत्वं विदुर्बुधाः ।। ७६ ।।**

वृ॰ **बुधा** ज्ञाततत्त्वाः **तदेकत्वम्** अपृथक्त्वं **विदुः** अवधारयन्ति स्म कथयन्ति स्म, तत्किम् ? ध्यायकेन **यन्निजात्मद्रव्यमेकं** केवलं स्वकीयविशुद्धपरमात्मद्रव्यं **वा** अथवा तस्यैव परमात्मद्रव्यस्य एकं केवलं **पर्यायं** वा **अथवा** एकमद्वितीयं **गुणं** वा, तदत्र गुणपर्यायविशेषः पूर्वोक्त एव, एतदेवंविधमेकं द्रव्यमेकं गुणं वा एकं पर्यायं वा, **निश्चलं** चलनवर्जितं यत्र ध्यायते तदेकत्वमिति ।। ७६ ।।

**अव॰** अथाविचारत्वमाह—

**यद्व्यञ्जनार्थयोगेषु, परावर्त्तविवर्जितम् । चिन्तनं तदविचारं, स्मृतं सद्ध्यानकोविदैः ।। ७७ ।।**

वृ॰ सम्प्रति **सद्ध्यानकोविदत्वं** शास्त्राम्नायविशेषादेवास्ति, न त्वनुभवात्, यदाहुः श्री हेमचन्द्रसूरिपादाः-

अनविच्छित्त्याऽऽम्नायः, समागतोऽस्येति कीर्त्यतेऽस्माभिः ।
दुष्करमप्याधुनिकैः शुक्लध्यानं यथाशास्त्रम् ।। १ ।।

तैः **सद्ध्यानकोविदैः** शास्त्राम्नायावगतशुक्लध्यानरहस्यै**स्तद् अविचारम्** अविचारविशेषणोपेतं द्वितीयं शुक्लं **स्मृतं** प्रज्ञप्तम्, तत्किम् ? **यत्**पूर्वोक्तस्वरूपेषु **व्यञ्जनार्थयोगेषु** शब्दाभिधेय (शब्दार्थ) योगरूपेषु परावर्त्तविवर्जितं शब्दाच्छब्दान्तरमित्यादिसंक्रमेण रहितं **चिन्तनं** श्रुतानुसारादेव क्रियते तदविचारमिति ।। ७७ ।।

**अव॰** अथ सवितर्कत्वमाह-

**निजशुद्धात्मनिष्ठं हि, भावश्रुतावलम्बनात् ।**
**चिन्तनं क्रियते यत्र सवितर्कं तदुच्यते ।। ७८ ।।**

वृ॰ **यत्र निजशुद्धात्मनिष्ठं** स्वकीयातिविशुद्धपरमात्मलीनं **हि** स्फुटं **चिन्तनं** सूक्ष्मविचारणात्मकं **क्रियते, तत्सवितर्कै**कगुणोपेतं द्वितीयं शुक्लध्यानम्, कस्मात्? **भावश्रुतावलम्बनात्** सूक्ष्मान्तर्जल्परूप-भावागमश्रुतावलम्बनमात्रचिन्तनादिति ।। ७८ ।।

**अव॰** अथ द्वितीयशुक्लजनितसमरसीभावमाह —

**इत्येकत्वमविचारं, सवितर्कमुदाहृतम्। तस्मिन् समरसीभावं, धत्ते स्वात्मानुभूतितः ।। ७९ ।।**

वृ॰ **इति** पूर्वोक्तप्रकारेण **एकत्वाविचारसवितर्क**रूपविशेषणत्रयोपेतं द्वितीयं शुक्लं ध्यान**मुदाहृतं** कथितम्, **तस्मिन्** द्वितीये शुक्लध्याने वर्त्तमानो ध्यानी-

ध्यानात् समरसीभावस्तदेकीकरणं मतम् । आत्मा यदपृथक्त्वेन लीयते परमात्मनि ।। १ ।।

तं **समर सीभावं धत्ते** धारयति, कुतः? **स्वात्मानुभूतितः** स्वस्यात्मनोऽनुभूतिरनुभवनं स्वात्मानुभूति-स्तस्याः ।। ७९ ।।

**—गुणस्थानकक्रमारोहे ।।**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# निव्वाणगमणकाले केवलिणो दरनिरुद्धजोगस्स ।
# सुहुमकिरियाऽनियट्टिं [a] तइयं तणुकायकिरियस्स ।।८१।।

[१] A मू० **चत्तारि झाणा पं० x x x सुक्के झाणे चउव्विहे चउप्पडोआरे.... सुहुमकिरिते अणियट्टी ३, x x x ।।** **—स्था.सू. २४७, भग. सू. ८०२, औप. सू. २० ।।**

वृ० x x x **सुहुमकिरिए**त्ति निर्वाणगमनकाले केवलिनो निरुद्धमनोवाग्योगस्यार्द्धनिरुद्धकाययोगस्यैतद्, अतः सूक्ष्मा क्रिया कायिकी उच्छ्वासादिका यस्मिंस्तत्तथा, न निवर्त्तते-न व्यावर्त्तत इत्येवंशीलमनिर्वर्त्ति प्रवर्द्धमानतरपरिणामादिति, भणितं च - [ध्यानशतके]

"निव्वाणगमणकाले केवलिणो दरनिरुद्धजोगस्स ।
सुहुमकिरियाऽनियट्टिं तइयं तणुकायकिरियस्स ।। ८१ ।।" इति तृतीयः, x x x ।।

**—स्थानाङ्गसूत्रवृत्तौ ।।**

B मू० **परे केवलिनः ।। ९-४१ ।।**

वृ० – x x x तत्र सूक्ष्मक्रियमप्रतिपातीति । सूक्ष्मा क्रिया यत्र तत् सूक्ष्मक्रियम् । तच्च योगनिरोधकाले भवति । वेद्य-नाम-गोत्रकर्मणां भवधारणायुष्कादधिकानां समुद्घातसामर्थ्यादचिन्त्यैश्वर्य-शक्तियोगादायुष्कसमीकृतानां मनो-वाक्-काययोगपरिणतस्यौदारिकशरीरत्रिभागोनस्थस्य केवलिनः संज्ञिपञ्चेन्द्रियपर्याप्तकमनोऽसङ्ख्येयगुणकहीनं सूक्ष्मयोगित्वमप्रतिपात्यच्युतस्वभावम् आव्यु-परतक्रियानिवृत्तिध्यानावाप्तेः। उक्तं च—

अप्रतिपाति ध्यायन्, कश्चित् सूक्ष्मक्रिय विहत्यन्ते ।
आयुःसमीक्रियाऽर्थं, त्रयस्य गच्छेत् समुद्घातम् ।। १ ।।
आर्द्राम्बराशुशोषव-दात्मविसारणविशुष्कसमकर्मा ।
समयाष्टकेन देहे, स्थित्वा योगात् क्रमाद् द्वन्द्वे ।। २ ।।

तथाऽन्य आह—

आयुषि समाप्यमाने, शेषाणां कर्मणां यदि समाप्तिः ।
न स्यात् स्थितिवैषम्याद्, गच्छति स ततः समुद्घातम् ।। १ ।।
स्थित्या च बन्धनेन, च समीक्रियार्थं हि कर्मणां तेषाम् ।
अन्तर्मुहूर्तशेषे, तदायुषि समुज्जिघांसति सः ।। २ ।।–
आर्द्रं विरल्लितं सद्, वस्त्रं मङ्क्ष्वेव ननु विनिर्वाति ।
संवेष्टितं तु न तथा, तथा हि कर्मापि मूर्तत्वात् ।। ३ ।।
स्नेहक्षयसाम्यात् (स्थितिबन्धनहेतुर्हि) स्नेहः स च हीयते समुद्घातात् ।
क्षीणस्नेहं शटति हि भवति तदल्पस्थिति च शेषम् ।। ४ ।।
आयुष्कस्यापि विरल्लितस्य, न ह्रास्यते स्थितिः कस्मात् ।
इति वा चोद्यं चरम-शरीरोऽनुपक्रमायुर्यत् कङ्कटुकवत् ।। ५ ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**णिव्वाण० गाहा ।। निर्वाणगमनकाले** मोक्षगमनप्रत्यासन्नसमये **केवलिनः** सर्वज्ञस्य मनो-वाग्योगद्वये निरुद्धे सति **अर्द्धनिरुद्धकाययोगस्य,** किम् ? **सूक्ष्मक्रियाऽनिवर्ति** सूक्ष्मा क्रिया b यस्मिंस्तत् सूक्ष्मक्रियम्, सूक्ष्मक्रियं च तदनिवर्ति चेति नाम, निवर्तितुं शीलमस्येति निवर्ति, प्रवर्द्धमानतरपरिणामान्न निवर्ति अनिवर्ति **तृतीयम्,** ध्यानमिति गम्यते, **तनुकायक्रियस्य** इति तन्वी उच्छ्वास-निःश्वासादिलक्षणा कायक्रिया यस्य स तथाविधस्तस्येति गाथार्थः ।।८१।।

---

दण्डकपाटकरुचक-क्रिया जगत्पूरणं चतुःसमयम् ।
क्रमशो निवृत्तिरपि च त-थैव प्रोक्ता चतुःसमया ।। ६ ।।
विकसनसङ्कोचनधर्मत्वाज्जीवस्य तत् तथा सिद्धम् ।
यच्चाप्यनन्तवीर्यं, तस्य ज्ञानं च गततिमिरम् ।। ७ ।।
शेषायाः शेषायाः, समये संहत्य सङ्ख्येयान् ।
भागान् स्थितेरनन्तान्, भागान् शुभानुभावस्य ।। ८ ।।
स ततो योगनिरोधं, करोति लेश्यानिरोधमपि काङ्क्षन् ।
समसमयस्थितिं बन्धं, योगनिमित्तं स हि रुरुत्सन् ।। ९ ।।
समये समये कर्मा-दाने सति सन्ततेर्न मोक्षः स्यात् ।
यद्यपि हि न मुच्यन्ते, स्थितिक्षयात् पूर्वकर्माणि ।। १० ।।
नोकर्माणि हि वीर्यं, योगद्रव्येण भवति जीवस्य ।
तस्यावस्थाने ननु, सिद्धः समयस्थितिर्बन्धः ।। ११ ।।
बादरतनुत्वात् पूर्वं, वाङ्मनसे बादरे स निरुणद्धि क्रमेणैव ।
आलम्बनाय करणं, हि तदिष्टं तत्र वीर्यवतः ।। १२ ।।
सत्यप्यनन्तवीर्य-त्वे बादरतनुमपि निरुणद्धि ततः।
सूक्ष्मेण काययोगेन न निरुध्यते हि सूक्ष्मो योगः ।। १३ ।।
सति बादरे योगे,न हि धावन् वेपथुं वारयति ।
नाशयति काययोगं, स्थूलं सोऽपूर्वफड्डुकीकृत्य ।
शेषस्य काययोगस्य तथा कृतीश्च स करोति ।। १४ (?) ।।
सूक्ष्मेण काययोगे-न ततो निरुणद्धि सूक्ष्मवाङ्मनसे ।
भवति ततोऽसौ सूक्ष्म-क्रियस्तदाकृतिगतयोगः ।। १५ ।।
तमपि स योगं सूक्ष्मं, नि-रुत्सन् सर्वपर्ययानुगतम् ।
ध्यानं सूक्ष्मक्रिय-मप्रतिपात्युपयाति वितमस्कम् ।। १६ ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ध्याने दृढार्पिते पर-मात्मनि ननु निष्क्रियो भवति कायः ।
प्राणापातनिमेषो-न्मेषवियुक्तो मृतस्येव ।। १७ ।।
ध्यानार्पितोपयोग-स्यापि न वाङ्मनसक्रिये यस्मात् ।
अन्तर्वर्तित्वादुप-रमतस्तेन तयोर्ध्यानेन निरोधनं नेष्टम् ।। १८ ।।
सततं तेन ध्याने-न निरुद्धे सूक्ष्मकाययोगेऽपि ।
निष्क्रियदेशो भवति, स्थितोऽपि देहे विगतलेश्यः ।। १९ ।। x x x

**—तत्त्वार्थ. सिद्ध. वृत्तौ ।।**

C **अव०** तृतीयभेदं व्याचष्टे–

**निर्वाणगमनसमये केवलिनो दरनिरुद्धयोगस्य ।**
**सूक्ष्मक्रियाप्रतीपाति तृतीयं कीर्तितं शुक्लम् ।। ८ ।।**

**वृ०** **निर्वाणगमनसमये** मोक्षगमनप्रत्यासन्नसमये **केवलिनः** सर्वज्ञस्य मनोयोगवाग्योगद्वये निरुद्धे सति बादरे च काययोगे निरुद्धे **सूक्ष्मा** उच्छ्वासनिःश्वासादिका काय**क्रिया** यत्र तत्तथा । **अप्रतीपाति** अनिवर्ति । **दर**शब्दः प्राकृतवत् संस्कृतेऽपि दृश्यते, यथा–"दरदलितहरिद्राग्रन्थिगौरं शरीरम्" [ ] ।। ८ ।।

**अव०** तत् किमविशेषेण सर्वोऽपि योगी तृतीयं ध्यानमारभते उतास्ति कश्चिद्विशेषः? इत्याह–

**आयुःकर्मसकाशादधिकानि स्युर्यदाऽन्यकर्माणि ।**
**तत्साम्याय तदोपक्रमेत योगी समुद्घातम् ।। ५० ।।**

**वृ०** यावत्यायुःकर्मणः स्थितिः शेषा तावत्येव वेदनीयस्य कर्मणो यदि स्यात्तदा तृतीयं ध्यानमारभते । अ**थायुःस्थितेः सकाशाद्** द्राघीयसी स्थितिर्वेदनीयस्य भवति तदा स्थितिघात-रसघाताद्यर्थं समुद्घातं प्रयत्नविशेषं करोति । यदाह–

"यस्य पुनः केवलिनः कर्म भवत्यायुषोऽतिरिक्ततरम् ।
स समुद्घातं भगवानथ गच्छति तत् समीकर्तुम् ।। १ ।।" [प्रशमरतौ, २७३] इति ।

**समुद्घात** इति सम्यगपुनर्भावेन उत् प्राबल्येन हननं घातः शरीराद् बहिर्जीवप्रदेशानां निःसारणम् ।। ५० ।।

**अव०** तस्य विधिमाह–

**दण्ड-कपाटे मन्थानकं च समयत्रयेण निर्माय ।**
**तुर्ये समये लोकं निःशेषं पूरयेद्योगी ।। ५१ ।।**

**वृ०** इह प्रथमसमय एव स्वदेहतुल्यविष्कम्भमूर्ध्वमधश्चायतं लोकान्तगामिनं जीवप्रदेशसंघातं **दण्डा**कारं केवली करोति । द्वितीयसमये च तमेव दण्डं पूर्वापरदिग्द्वयप्रसारणात् पार्श्वतो लोकान्तगामि कपाटमिव **कपाटं** करोति । तृतीयसमये तु तदेव कपाटं दक्षिणोत्तरदिग्द्वयप्रसारणान्मन्थानमिव **मन्थानं** करोति लोकान्तप्रापिणमेव । एवं च लोकस्य प्रायो बहु पूरितं भवति । **चतुर्थसमये** तु मन्थान्तराण्यपूरितानि अनुश्रेणिगमनात् सह लोकनिष्कुटैः पूरयति । ततश्च सकलो लोको जीवप्रदेशैः पूरितो भवति । लोकपूरणश्रवणाच्च परेषामात्मविभुत्ववादः समुद्भूतः । तथा चार्थवादः- "विश्वतश्चक्षुरुतविश्वतोमुखो

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

विश्वतोबाहुरुत विश्वतःपात्" [श्वेताश्वतरोपनिषदि ३/३] इत्यादि ।। ५१ ।।

**अव०** अथ पञ्चमादिसमयेषु कर्तव्यमाह–

**समयैस्ततश्चतुर्भिर्निवर्तते लोकपूरणादस्मात् ।**

**विहितायुःसमकर्मा ध्यानी प्रतिलोममार्गेण ।। ५२ ।।**

**वृ०** ततः पञ्चमसमये पूर्वक्रमात् प्रतिलोमं मन्थान्तराणि जीवप्रदेशरूपाणि सकर्मकाणि संकोचयति । षष्ठे समये मन्थानमुपसंहरति, घनतरसंकोचात् । सप्तमे समये कपाटमुपसंहरति, दण्डात्मनि संकोचात् । अष्टमे समये दण्डमुपसंहृत्य शरीरस्थ एव भवति। समुद्घातकाले च मनोवाग्योगयोरव्यापार एव, प्रयोजनाभावात् । काययोगस्यैव केवलस्य व्यापारः । तत्रापि प्रथमा-ऽष्टमसमययोरौदारिककाय-प्राधान्यादौदारिककाययोग एव । द्वितीय-षष्ठ-सप्तमेषु समयेषु पुनरौदारिकाद् बहिर्गमनात् कार्मणवीर्यपरिस्पन्दादौदारिककार्मणमिश्रः । तृतीय-चतुर्थ-पञ्चमेषु औदारिकाद् बहिर्बहुतर-प्रदेशव्यापारादसहायकार्मणयोग एव। यदाह–

"औदारिकप्रयोक्ता प्रथमा-ऽष्टमसमययोरसाविष्टः । मिश्रौदारिकयोक्ता सप्तम-षष्ठ-द्वितीयेषु ।। १ ।।

कार्मणशरीरयोगी चतुर्थके पञ्चमे तृतीये च । समयत्रयेऽपि तस्मिन् भवत्यनाहारको नियमात् ।। २ ।।

[प्रशमरतौ २७६-२७७]

परित्यक्तसमुद्घातश्च कारणवशाद्योगत्रयमपि व्यापारयति, यथा–अनुत्तरसुरपृष्टो मनोयोगं सत्यं वाऽसत्यामृषं वा प्रयुङ्क्ते एवमामन्त्राणादौ वाग्योगमपि । नेतरौ द्वौ भेदौ द्वयोरपि । काययोगमप्यौदारिकं फलकप्रत्यर्पणादाविति । ततोऽन्तर्मुहूर्त्तमात्रेण कालेन योगनिरोधमारभते। इह त्रिविधोऽपि योगो द्विविधः-- सूक्ष्मो बादरश्च । तत्र केवलोत्पत्तेरुत्तरकालो जघन्येनान्तर्मुहूर्त्तम्, उत्कर्षेण च देशोना पूर्वकोटिः, तां विहृत्यान्तर्मुहूर्तावशेषायुष्कः सयोगकेवली प्रथमं बादरकाययोगेन बादरौ वाङ्मनसयोगौ निरुणद्धि । ततः सूक्ष्मकाययोगेन बादरकाययोगं निरुणद्धि । सति तस्मिन् सूक्ष्मयोगस्य रोद्धुमशक्यत्वात् । न हि धावन् वेपथुं वारयति । ततश्च सर्वबादरयोगनिरोधानन्तरं सूक्ष्मेण काययोगेन सूक्ष्मौ वाङ्मनसयोगौ निरुणद्धि । ततः सूक्ष्मक्रियमनिवर्ति शुक्लध्यानं ध्यायन् स्वात्मनैव सूक्ष्मकाययोगं निरुणद्धि ।। ५२ ।।

**अव०** एतदेवार्यात्रयेणाह-

**श्रीमानचिन्त्यवीर्यः शरीरयोगेऽथ बादरे स्थित्वा ।**

**अचिरादेव हि निरुणद्धि बादरौ वाङ्मनसयोगौ ।। ५३ ।।**

**सूक्ष्मेण काययोगेन काययोगं स बादरं रुन्ध्यात् ।**

**तस्मिन्ननिरुद्धे सति शक्यो रोद्धुं न सूक्ष्मतनुयोगः ।। ५४ ।।**

**वचनमनोयोगयुगं सूक्ष्मं निरुणद्धि सूक्ष्मतनुयोगात् ।**

**विदधाति ततो ध्यानं सूक्ष्मक्रियमसूक्ष्मतनुयोगम् ।। ५५ ।।**

**वृ०** स्पष्टाः ।। ५३-५५ ।।

**—योगशास्त्रे, प्र. ११ ।।**

D **अव०** अथ समुद्घातान्निवृत्तो यत्करोति तदाह-

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**समुद्घातान्निवृत्तोऽसौ, मनोवाक्काययोगवान् ।**
**ध्यायेद्योगनिरोधार्थं, शुक्लध्यानं तृतीयकम् ।। ९५ ।।**

वृ० **असौ मनोवाक्काययोगवान्** केवली-सयोगिकेवली **समुद्घातान्निवृत्तः** सन् **योगनिरोधार्थं** योग-निरोधनिमित्तं **तृतीयं शुक्लध्यानं ध्यायेत् ।। ९५ ।।**

**अव०** अथ तदेव तृतीयं शुक्लध्यानमाह–

**आत्मस्पन्दात्मिका सूक्ष्मा, क्रिया यत्रानिवृत्तिका ।**
**तत्तृतीयं भवेच्छुक्लं, सूक्ष्मक्रियानिवृत्तिकम् ।। ९६ ।।**

वृ० तस्मिन्नवसरे तस्य केवलिनस्**तृतीयं सूक्ष्मक्रियाऽनिवृत्तिकनाम शुक्लध्यानं** भवति, तत्किम् ? **यत्रात्मस्पन्दात्मिका सूक्ष्मा क्रियाऽनिवृत्तिका** भवति, कोऽर्थः ? आत्मस्पन्दात्मिका क्रियापि सूक्ष्मत्वादनिवृत्तिका भवति, सूक्ष्मत्वं मुक्त्वा पुनः स्थूलत्वं न भजतीत्यर्थः ।। ९६ ।।

**अव०** अथ मनोवचःकाययोगानामपि यथा यथा सूक्ष्मत्वं करोति तथा तथा श्लोकचतुष्टयेनाह—

**बादरे काययोगेऽस्मिन्, स्थितिं कृत्वा स्वभावतः ।**
**सूक्ष्मीकरोति वाक्चित्त-योगयुग्मं स बादरम् ।। ९७ ।।**
**त्यक्त्वा स्थूलं वपुर्योगं, सूक्ष्मवाक्चित्तयोः स्थितिम् ।**
**कृत्वा नयति सूक्ष्मत्वं,काययोगं तु बादरम् ।। ९८ ।।**
**ससूक्ष्मकाययोगेऽथ, स्थितिं कृत्वा पुनः क्षणम् ।**
**निग्रहं कुरुते सद्यः, सूक्ष्मवाक्चित्तयोगयोः ।। ९९ ।।**
**ततः सूक्ष्मे वपुर्योगे, स्थितिं कृत्वा क्षणं हि सः ।**
**सूक्ष्मक्रियं निजात्मानं, चिद्रूपं विन्दति स्वयम् ।। १०० ।। चतुर्भिः कुलकम् ।**

वृ० स केवली सूक्ष्मक्रियाऽनिवृत्तिनामकतृतीयशुक्लध्यानध्याता अचिन्त्यात्मवीर्यशक्त्या**ऽस्मिन् बादरे काययोगे स्वभावतः स्थितिं कृत्वा बादरं वाक्चित्तयोगयुग्मं** स्थूलवचोमनोयोगयुगलं **सूक्ष्मीकरोति** ।। ९७ ।। ततः **स्थूलं** बादरं **वपुर्योगं त्यक्त्वा सूक्ष्मवाक्चित्तयोः स्थितिं कृत्वा बादरं काययोगं सूक्ष्मत्वं** प्रापयति ।। ९८ ।। स **सूक्ष्मकाययोगे पुनः क्षणं** क्षणमात्रं **स्थितिं कृत्वा सद्यः** तत्कालं **सूक्ष्मवाक्चित्तयोर्निग्रहं** सर्वथा तत्संभवाभावं **कुरुते** ।। ९९ ।। **ततः सूक्ष्मे काययोगे क्षणं स्थितिं हि** स्फुटं **स** केवली **निजात्मानं सूक्ष्मक्रियं चिद्रूपं स्वयमा**त्मनैव **विन्दति** अनुभवति ।। १००।। इति श्लोकचतुष्टयार्थः ।

**—गुणस्थानकक्रमारोहे ।।**

E **सूक्ष्मक्रियाऽनिवृत्त्याख्यं, तृतीयं तु जिनस्य तत् ।**
**अर्द्धरुद्धाऽङ्गयोगस्य, रुद्धयोगद्वयस्य च ।। ७८ ।।**

**—अध्यात्मसारे, अ. १६ ।।**

F **सूक्ष्मक्रियाप्रतिपाति तृतीयं सर्ववेदिनाम् ।** x x x **।। १९८ ।।**

**—ध्यानदीपिकायाम् ।।**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**तस्सेव[१] य सेलेसीगयस्स सेलोव्व णिप्पकंपस्स ।**
**वोच्छिन्नकिरियमप्पडिवाइ ज्झाणं परमसुक्कं ।।८२।।**

[१] A मू० **चत्तारि झाणा पं० x x x सुक्के झाणे x x x सुहुमकिरिते अणियट्टी ३, समुच्छिन्नकिरिए अप्पडिवाती ४ x x x ।। —स्था. सू. २४७, भग. सू. ८०२, औप. सू. २० ।।**

वृ० x x x तथा, **समुच्छिन्नकिरिएत्ति** समुच्छिन्ना-क्षीणा क्रिया-कायिक्यादिका शैलेशीकरणे निरुद्धयोगत्वेन यस्मिंस्तत्तथा, 'अप्पडिवाए' त्ति अनुपरतिस्वभावमिति चतुर्थः, आह हि– [ध्यानशतके]
"तस्सेव य सेलेसीगयस्स सेलोव्व निप्पकंपस्स ।
वोच्छिन्नकिरियमप्पडिवाई झाणं परमसुक्कं ।। ८२ ।।" इति, x x x ।। – **स्थानाङ्गसूत्रवृत्तौ ।।**

B मू० **परे केवलिनः ।। ९-४१ ।।**

वृ० x x x तुर्यध्याने
योगाभावात् समयस्थितिनोऽपि न कर्मणो भवति बन्धः ।
ध्यानार्पणसंहारात्, किञ्चिच्च ससंहतावयवाः ।। २० ।।
लेश्याक्रियानिरोधो, योगनिरोधश्च गुणनिरोधेन ।
इत्युक्तो विज्ञेयो, बन्धनिरोधश्च हि तथैव ।। २१ ।।
त्रसबादरपर्याप्तादेयशुभगकीर्तिमनुजनाम्नि पञ्चेन्द्रियतामन्यतरच्च वेद्यम् उच्चैस्तथा गोत्रम् । मनुजायुष्कं च स एकादशं वेदयति कर्मणां प्रकृतीः वेदयति तु तीर्थकरो द्वादशसहतीर्थकृत्त्वेन सततो देहत्रयमोक्षार्थमनिवर्ति सर्वगतमुपयाति समुच्छिन्नक्रियमतमस्कं परं ध्यानं व्युपरतक्रियमनिवर्तीत्यर्थः । तद्धि तावन्निवर्तते यावन्न मुक्तः ।। ४१ ।। **—तत्त्वार्थ. सिद्ध. वृत्तौ ।।**

C अव० चतुर्थभेदं व्याचष्टे–
**केवलिनः शैलेशीगतस्य शैलवदकम्पनीयस्य । उत्सन्नक्रियमप्रतिपाति तुरीयं परमशुक्लम् ।। ९।।**

वृ० स्पष्टः ।। ९ ।। **—योगशास्त्रे, प्र. ११ ।।**

D अव० अथायोगिगुणस्थाने ध्यानसंभवमाह—
**तत्रानिवृत्तिशब्दान्तं समुच्छिन्नक्रियात्मकम् ।**
**चतुर्थं भवति ध्यानमयोगिपरमेष्ठिनः ।। १०५ ।।**

वृ० **तत्र** तस्मिन्नयोगिगुणस्थानेऽ**योगिपरमेष्ठिनश्चतुर्थं ध्यानं समुच्छिन्नक्रियात्मकं** वक्ष्यमाणस्वरूपं **भवति,** कथंभूतम् ? **अनिवृत्तिशब्दान्तम्** अनिवृत्तिशब्दोऽन्ते यस्य तत्समुच्छिन्नक्रियानिवृत्तिनामकं चतुर्थं ध्यानमिति ।। १०५ ।।

अव० अथास्य चतुर्थध्यानस्य स्वरूपमाह–
**समुच्छिन्ना क्रिया यत्र, सूक्ष्मयोगात्मिकाऽपि हि ।**
**समुच्छिन्नक्रियं प्रोक्तं, तद्द्वारं मुक्तिवेश्मनः ।। १०६ ।।**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**तस्सेव य० गाहा ।। तस्यैव च** केवलिनः **शैलेशीगतस्य** शैलेशी प्राग्वर्णिता तां[a] प्राप्तस्य, किंविशिष्टस्य ? निरुद्धयोगत्वात् **शैलेश इव निष्प्रकम्पस्य** मेरोरिव स्थिरस्येत्यर्थः, किम् ? **व्यवच्छिन्नक्रियं**[b] योगाभावात्, **अप्रतिपाति**[c] अनुपरतिस्वभावमिति, एतदेव चास्य नाम, **ध्यानं परमशुक्लम्** प्रकटार्थमिति गाथार्थः[२] ।।८२।।

---

वृ० **यत्र** ध्याने **सूक्ष्मयोगात्मिकाऽपि** सूक्ष्मकाययोगरूपाऽपि **क्रिया समुच्छिन्ना** सर्वथा निवृत्ता **तत्समुच्छिन्नक्रियं** नाम चतुर्थं ध्यानं **प्रोक्तम्,** कथंभूतम् ? **मुक्तिवेश्मनः** सिद्धिसौधस्य **द्वारं** द्वारोपममिति ।। १०६ ।।

**—गुणस्थानकक्रमारोहे ।।**

E तुरीयं तु **समुच्छिन्न-क्रियमप्रतिपाति तत् ।**
**शैलवन्निष्प्रकम्पस्य, शैलेश्यां विश्ववेदिनः ।। ७९ ।।**

**—अध्यात्मसारे, अ. १६ ।।**

F x x x । **समुच्छिन्नक्रियं ध्यानं तुर्यमार्यैः प्रवेदितम् ।।१९८।।**

**—ध्यानदीपिकायाम् ।।**

२ A **इदाणिं सुक्कं, सुक्के चतुव्विधे चउप्पडोयारे पण्णत्ते**-पुहत्तवितक्के सविचारे १, एगत्तवितक्के अविचारे २, सुहुमकिरिए अणियट्टी ३, समुच्छिण्णकिरिए अप्पडिवाई ४-
सुत्तणाणे उवउत्तो अत्थंमि य वंजणंमि सवियारं । झायति चोद्दसपुव्वी पढमं सुक्कं सरागो तु ।। १।।
सुत्तणाणे उवउत्तो अत्थंमि य वंजणंमि अवियारं । झायति चोद्दसपुव्वी बीयं सुक्कं विगतरागो ।। २ ।।
अत्थसंकमणं चेव, तहा वंजणसंकमं । जोगसंकमणं चेव, पढमे झाणे निगच्छती ।। ३ ।।
अत्थसंकमणं चेव, तहा वंजणसंकमं । जोगसंकमणं चेव, बितिए ज्झाणे वितक्कती ।। ४।।

**—आवश्यकचूर्णौ ।।**

B कषायदोषमलापगमात् शुचित्वम्, तदनुषङ्गात् शुक्लं ध्यानम् । तच्च द्विविधम्-शुक्ल-परमशुक्लभेदात् । तत्र पृथक्त्ववितर्कवीचारम् एकत्ववितर्कावीचारं चेति शुक्लं द्विधा । परमशुक्लमपि सूक्ष्मक्रियाप्रतिपाति व्युपरतक्रियानिर्वर्ति चेति द्विधा । बाह्याध्यात्मिकभेदाच्च एतदपि द्विविधम्-गात्र-दृष्टि-परिस्पन्दाभावः जृम्भोद्गारक्षपथुविरहः अनभिव्यक्तप्राणाऽपानप्रचारत्वमित्यादिगुणयोगि बाह्यम् परेषामनुमेयम् आत्मनश्च स्वसंवेद्यम् । आध्यात्मिकं तु पृथग्भावः पृथक्त्वम्-नानात्वम्, वितर्कः-श्रुतज्ञानम्-द्वादशाङ्गम्, वीचारः-अर्थ-व्यञ्जन-योगसंक्रान्तिः-व्यञ्जनम्-अभिधानम् तद्विषयोऽर्थः मनोवाक्-कायलक्षणो योगः संक्रान्तिः परस्परतः परिवर्तनम् पृथक्त्वेन वितर्कस्य अर्थ-व्यञ्जन-योगेषु संक्रान्तिर्वीचारः यस्मिन् अस्ति तत् पृथक्त्ववितर्कवीचारम् । तथाहि—असावुत्तमसंहननो भावयति विजृम्भितपुरुषकारवीर्यसामर्थ्यः संहताशेषचित्तव्याक्षेपः कर्मप्रकृतीः स्थित्यनुभागादिभिर्ह्रासयन् महासंवरसामर्थ्यतो मोहनीयमचिन्त्यसामर्थ्यमशेषमुपशमयन् क्षपयन् वा द्रव्यपरमाणुं भावपरमाणुं चैकमवलम्ब्य द्रव्य-पर्यायार्थाद् व्यञ्जनम् व्यञ्जनाद् वा अर्थम् योगाद् योगान्तरम् व्यञ्जनाद् व्यञ्जनान्तरं

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

च संक्रामन् पृथक्त्ववितर्कवीचारं शुक्लतरलेश्यमुपशमक-क्षपकगुणस्थानभूमिकमन्त-र्मुहूर्तार्धं क्षायोपशमिकभूमिकं प्रायः पूर्वधरनिषेव्यमाश्रितार्थ-व्यञ्जनयोगसंक्रमणं श्रेणिभेदात् स्वर्गापवर्गफलप्रदमाद्यं शुक्लध्यानमवलम्बते एतञ्च निर्जरात्मकम् आत्मस्थितकर्मक्षयकारणत्वात् तस्याः "तपसा निर्जरा च" [तत्त्वार्थ० ९-३] इति वचनाद् ध्यानस्य चान्तरोत्कृष्टतपोरूपत्वाद् जीवाजीवाभ्यां कथंचिदसावभिन्ना द्व्यङ्गुलवियोगवत् वियुक्तात्मनो वियोगस्य कथंचिद् अभेदात् एकान्तवादे तु पूर्ववत् पश्चादपि अवियोगः अतद्धर्मत्वात् वियोगे वा पूर्वमपि तत्स्वभावत्वाद् अयुक्तस्य वियोगाभाव एव न हि बन्धाभावे तद्विनाशः संभवी तस्य वस्तुधर्मत्वात् न हि अङ्गुल्योः संयोगाभावे तद्वियोग इति व्यवहारः । तस्माद् निर्जराया अपि एकान्तवादे अनुपपत्तिः । एकत्वेन वितर्को यस्मिन् तद् एकत्ववितर्कम् विगतार्थ-व्यञ्जन-योगसंक्रमत्वाद् अवीचारं द्वितीयं शुक्लध्यानम् । तथाहि– एकपरमाणौ एकमेव पर्यायमालम्ब्यत्वेन आदाय अन्यतरैकयोगबलाधानमाश्रितव्यतिरिक्ताशेषार्थ-व्यञ्जन-योगसंक्रमविषयचिन्ताविक्षेपरहितं बहुतरकर्मनिर्जरारूपं निश्शेषमोहनीयक्षयानन्तरं युगपद्धाविघातिकर्मत्र-यध्वंसनसमर्थमकषायच्छद्मस्थ-वीतरागगुणस्थानभूमिकं क्षपको द्वितीयं शुक्लध्यानमासादयति । प्रायः पूर्वविदेव तदनन्तरं ध्यानान्तरे वर्तमानः क्षायिकज्ञान-दर्शन-चारित्र-वीर्यातिशयसंपत्समन्वितो भगवान् केवली जायत इति स च अत्यन्तापुनर्भवसंपदङ्गनासमालिङ्गिततनुः कृतकृत्यः अचिन्त्यज्ञानाद्यैश्वर्यमाहात्म्यातिशय-परमभक्तिनम्रामरेश्वरादिवन्द्यचरणः अन्तर्मुहूर्तं देशोनां वा पूर्वकोटिं भवोपग्राहिकर्मवशाद् विहरन् यदा अन्तर्मुहूर्तपरिशेषायुष्कस्तत्तुल्यस्थितिनामगोत्र वेदनीयश्च भवति तदा मनो-वाग्-बादरकाययोगं निरुध्य सूक्ष्मकाययोगोपगः सूक्ष्मक्रियाऽप्रतिपाति शुक्लध्यानं तृतीयमध्यास्ते, यदा पुनरन्तर्मुहूर्तस्थितिकायुष्क-कर्माधिकतरस्थितिशेषकर्मत्रयो भवत्यसौ तदा आयुष्ककर्मस्थिति-समानस्थितिशेषकर्मसंपादनार्थं समुद्घातमाश्रित्य दण्ड-कपाट-मन्थरलोकपूरणानि स्वात्मप्रदेशविसरणतश्चतुर्भिः समयैर्विधाय तावद्भिरेव तैः पुनस्तान् उपसंहृत्य स्वप्रदेशविश(स)रणसमीकृत-भवोपग्राहिकर्मा स्वशरीरपरिमाणो भूत्वा ततः तृतीयं शुक्लध्यानभेदं परिसमापय्य पुनश्चतुर्थं शुक्लध्यानमारभते तत् पुनर्विगतप्राणा-पानप्रचाराशेषकाय-वाग्-मनोयोगसर्वदेशपरिस्पन्दत्वाद् विगतक्रियानिवर्ति इत्युच्यते तत्र च सर्वबन्धास्रवनिरोधः अशेषकर्मपरिक्षयसामर्थ्योपपत्तेः तदेव च निश्शेषभवदुःखविटपिदावानलकल्पं साक्षाद् मोक्षकारणम् तद्ध्यानवांश्च अयोगिकेवली निःशेषितमलकलङ्कोऽवाप्त-शुद्धनिजस्वभाव ऊर्ध्वगतिपरिणामस्वाभाव्यात् निवातप्रदेशप्रदीपशिखावद् ऊर्ध्वं गच्छति एकसमयेन आलोकान्तात् विनिर्मुक्ताशेषबन्धनस्य प्राप्तनिजस्वरूपस्य आत्मनो लोकान्ते अवस्थानं मोक्षः "बन्धवियोगो मोक्षः" [ ] इति वचनात् । –सम्मतिवृत्तौ, का. ३/६३ ।।

C मू० **परिचत्तअट्टरुद्दे...** ।।४८४।।

वृ० x x x शुक्लध्यानमपि चतुर्विधम्-पृथक्त्ववितर्कसविचारम् । सह विचारेण वर्त्तते इति सविचारम् । विचारोऽर्थव्यञ्जनयोगसङ्क्रमः । अर्थो द्रव्यम्, व्यञ्जनं शब्दः, योगो मनःप्रभृति । एतद्भेदेन सविचारमर्थाद् व्यञ्जनं सङ्क्रामतीति प्रथमं शुक्लम् ।

एकत्ववितर्कमविचारम् । एकत्वेनाभेदेन वितर्कोऽर्थरूपो व्यञ्जनरूपो वा यस्य तत्तथा । तदेवंविधं द्वितीयं शुक्लम् ।

सूक्ष्मक्रियानिवृत्ति तृतीयं शुक्लम् । तच्च केवलिनो निर्वाणगमनकाले मनोवाग्योगद्वये निरुद्धे सत्यर्द्धनिरुद्धकाययोगस्य भवति । काययोगस्तूच्छवासनिश्वासादिलक्षणः सूक्ष्म एवास्य विज्ञेयः ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

इत्थं चतुर्विधं ध्यानमभिधायाधुनैतत्प्रतिबद्धमेव वक्तव्यताशेषमभिधित्सुराह –

**[१] पढमं जोगे जोगेसु वा मयं [a] बितियमेगजोगंमि ।**
**[b] तइयं च कायजोगे सुक्कमजोगंमि य चउत्थं ।।८३।।**

---

व्यवच्छिन्नक्रियं तु चतुर्थं शुक्लम् । तच्च शैलेशीगतस्य केवलिनः सर्वात्मनैव निरुद्धसकलयोगस्य शैलेशीवन्निष्प्रकम्पस्य भवति । एवंविधयोः पूर्वोपवर्णितध्यानद्वयापेक्षया वरयोः प्रधानतमयोर्धर्म्म-शुक्लध्यानयोर्मनसि यः सङ्क्रमः सा विमुक्ताशेषकुविकल्पकल्पनाजालस्यात्मारामस्य मुनेर्मनोगुप्तिरिति ।।४८४।। **—हितोपदेशवृत्तौ** ।।

[१] A **जोगे जोगेसु वा पढमं, बीयं योगंमि कण्हुयी ।**
**ततियं कायिके जोगे, चउत्थं च अजोगिणो ।। ५ ।।** **—आवश्यकचूर्णौ** ।।

B **अव०** अधुना पूर्वोक्तस्वामिन एव विशेष्य कथ्यन्ते –

**मू०** **तत् त्र्येककाययोगायोगानाम्** ।।९-४३ ।।

**भा०** **तदेव चतुर्विधं शुक्लध्यानं त्रियोगस्यान्यतमयोगस्य काययोगस्यायोगस्य च यथासङ्ख्यं भवति । तत्र त्रियोगानां पृथक्त्ववितर्कम्, एकान्यतमकयोगानामेकत्वावितर्कम्, काययोगानां सूक्ष्मक्रियमप्रतिपाति, अयोगानां व्युपरतक्रियानिवर्तीति** ।। ४३ ।।

**वृ०** तदेतच्चतुर्विधं शुक्लध्यानं प्रथमद्वितीयोत्तमसंहननवतो भवति । तत्राद्यं पृथक्त्ववितर्कं त्रियोगस्य भवति, मनो-वाक्-काययोगव्यापारवत इत्यर्थः । एकान्यतमयोगानामिति । अन्यतमैकयोगानामेकत्ववित-र्कमेकोऽन्यतमः कायादीनां योगो यस्य ध्यायिनो व्याप्रियते, कदाचिन्मनोयोगः कदाचिद् वाग्योगः कदाचित् काययोग इति । काययोगानामिति कायैकयोगभाजामेव सूक्ष्मक्रियमप्रतिपाति शुक्लध्यानमिति । निरुद्धयोगद्वयावस्थानां कायव्यापारवतां सूक्ष्मक्रियं भवति, न च प्रतिपतति । अयोगानामिति शैलेश्यवस्थानां ह्रस्वाक्षरपञ्चकोच्चारणसमकालानां मनो-वाक्-काययोगत्रयरहितानां व्युपरतक्रियमनिवर्ति ध्यानं भवति ।

उक्तं च-

"यदर्थव्यञ्जने काय-वचसी च पृथक्त्वतः ।
मनः सङ्क्रमयत्यात्मा, स विचारोऽभिधीयते ।। १ ।।
सङ्क्रान्तिरर्थादर्थं यद्, व्यञ्जनाद् व्यञ्जनं तथा ।
योगाच्च योगमित्येष विचार इति वा मतः ।। २ ।।
अर्थादि च पृथक्त्वेन, यद् वितर्कयतीव हि ।
ध्यानमुक्तं समासेन, तत् पृथक्त्वविचारवत् ।। ३ ।।
अविकम्प्यमनस्त्वेन, योगसङ्क्रान्तिनिःस्पृहम् ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**पढमं० गाहा ।। प्रथमम्** पृथक्त्ववितर्कसविचारं **योगे** मनआदौ **योगेषु**[c] **वा** सर्वेषु **मतम्** इष्टम्, तच्चागमिकश्रुतपाठिनः। **द्वितीयम्** एकत्ववितर्कमविचारमेत**देकयोग** एव, अन्यतरस्मिन् संक्रमाभावात्। **तृतीयं च** सूक्ष्मक्रियाऽनिवर्ति[d] **काययोगे,** न योगान्तरे । **शुक्लम् अयोगिनि च** शैलेशीकेवलिनि **चतुर्थम्** व्युपरतक्रियाऽप्रतिपातीति गाथार्थः ।।८३।।

आह - शुक्लध्यानोपरिमभेदद्वये मनो [a]नास्ति, अमनस्कत्वात् केवलिनः, ध्यानं च मनोविशेषः, "ध्यै चिन्तायाम्" इति पाठात्, तदेतत्कथमिति[b] ? उच्यते –

---

तदेकत्ववितर्काख्यं, श्रुतज्ञानोपयोगवत् ।। ४ ।।
सूक्ष्मकायक्रियारुद्ध-सूक्ष्मवाङ्मनसक्रियः ।
यद् ध्यायति तदप्युक्तं सूक्ष्ममप्रतिपाति च ।। ५ ।।
कायिकी च यदेषाऽपि, सूक्ष्मोपरमति क्रिया ।
अनिवर्ति तदप्युक्तं, ध्यानं व्युपरतक्रियम् ।। ६ ।।" ।। ४३।।

**—तत्त्वार्थ. सिद्ध. वृत्तौ ।।**

C **अव०** चतुर्ष्वपि योगसङ्ख्यां निरूपयति—

**एक-त्रियोगभाजामाद्यं स्यादपरमेकयोगानाम् ।**
**तनुयोगिनां तृतीयं निर्योगानां चतुर्थं तु ।। १० ।।**

**वृ०** आद्यं पृथक्त्ववितर्कं सविचारं मनःप्रभृत्येकयोगभाजां योगत्रयभाजां वा, तच्च भङ्गिकश्रुतपाठकानां भवति । अपरमेकत्ववितर्कमविचारं मनःप्रभृत्यन्यतरैकयोगानाम्, योगान्तरे संक्रमाभावात् । तृतीयं सूक्ष्मक्रियमनिवर्ति, तत् तनुयोगे काययोगे सूक्ष्मे, न तु योगान्तरे । चतुर्थं व्युत्सन्नक्रियमप्रतिपाति निर्योगानामयोगिकेवलिनां शैलेशीगतानां भवति ।

योगस्तु कायवाग्मनोभेदात् त्रिविधः । तत्रौदारिक-वैक्रिया-ऽऽहारक-तैजस-कार्मणशरीरवतो जीवस्य वीर्यपरिणतिविशेषः काययोगः । औदारिक-वैक्रिया-ऽऽहारकशरीरव्यापाराहृतवाग्द्रव्य-समूहसाचिव्याज्जीवव्यापारो वाग्योगः। औदारिक-वैक्रिया-ऽऽहारकशरीरव्यापाराहृतमनोद्रव्य-समूहसाचिव्याज्जीवव्यापारो मनोयोगः ।। १० ।।

**—योगशास्त्रे, प्र. ११ ।।**

D **तत्र त्रियोगिनामाद्यं, द्वितीयं त्वेकयोगिनाम् । सर्वज्ञः क्षीणकर्मासौ, केवलज्ञानभास्करः ।। १९९ ।।**
**अन्तर्मुहूर्तशेषायु-स्तृतीयं ध्यातुमर्हति । शैलेशीकर्मतो ध्यानं, समुच्छिन्नक्रियं भवेत् ।। २०० ।।**
**अयोगयोगिनां तुर्यं, विज्ञेयं परमात्मनाम् । तेन ते निर्मला जाताः, निष्कलङ्का निरामयाः ।। २०१ ।।**

**—ध्यानदीपिकायाम् ।।**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**जह[1] छउमत्थस्स मणो झाणं भण्णइ सुनिच्चलो[c] संतो ।**
**तह केवलिणो काओ सुनिच्चलो भन्नए झाणं ।।८४।।**

**जह० गाहा ।। यथा छद्मस्थस्य मनः**, किम् ? **ध्यानं भण्यते सुनिश्चलं सत्, तथा** तेनैव प्रकारेण योगत्वाव्यभिचारात्**केवलिनः कायः सुनिश्चलो भण्यते ध्यान**मिति गाथार्थः ।।८४।।

आह – चतुर्थे निरुद्धत्वादसावपि न भवति, तथाविधभावेऽपि च सर्वभावप्रसङ्गः, तत्र का वार्तेति ? उच्यते –

**पुव्वप्पओगओ[1] चिय कम्मविणिज्जरणहेउतो यावि ।**
**सद्दत्थबहुत्ताओ तह जिणचंदागमाओ य ।।८५।।**

---

[1] A **अव०** ननु शुक्लध्यानोपरितनभेदद्वये मनो नास्त्येव, अमनस्कत्वात् केवलिनः, ध्यानं च मनःस्थैर्यम्, तदेतत् कथम् ? इत्याह–

**छद्मस्थितस्य यद्वन्मनः स्थिरं ध्यानमुच्यते तज्ज्ञैः ।**
**निश्चलमङ्गं तद्वत् केवलिनां कीर्तितं ध्यानम् ।। ११ ।।**

**वृ०** यथा **छद्मस्थस्य मनः स्थिरं** सत् **ध्यानं भण्यते,** तथा **केवलिनोऽपि सुनिश्चलः कायो** योगत्वाव्यभिचाराद् **ध्यान**शब्दाभिधेयो भवति ।। ११ ।।

**–योगशास्त्रे प्र. ११ ।।**

B **अव०** अथ यदेव सूक्ष्मक्रियस्य वपुषः स्थैर्यं भवति, तदेव केवलिनां ध्यानं स्यादित्याह–

**छद्मस्थस्य यथा ध्यानं, मनसः स्थैर्यमुच्यते ।**
**तथैव वपुषः स्थैर्यं, ध्यानं केवलिनो भवेत् ।। १०१ ।।**

**वृ० यथा** येन प्रकारेण **छद्मस्थस्य** योगिनो **मनसः स्थैर्यं ध्यानमुच्यते, तथैव** तेन प्रकारेण **वपुषः स्थैर्यं** शरीरस्य निश्चलत्वं **केवलिनो ध्यानं भवती**ति ।। १०१ ।।

**–गुणस्थानकक्रमारोहे ।।**

[1] A **अव०** ननु चतुर्थे शुक्लध्याने काययोगस्य निरुद्धत्वाद् असावपि न भवति, तथापि भावेऽतिप्रसङ्गः, तत्र कथं ध्यानशब्दवाच्यता? इत्याह–

**पूर्वाभ्यासाज्जीवोपयोगतः कर्मजरणहेतोर्वा ।**
**शब्दार्थबहुत्वाद्वा जिनवचनाद्वाऽप्ययोगिनो ध्यानम् ।। १२ ।।**

**वृ०** x x x यथा कुलालचक्रं भ्रमणनिमित्तदण्डादेरभावेऽपि **पूर्वाभ्यासाद्** भ्रमति, तथा मनःप्रभृतिसर्वयोगो-परमेऽप्ययोगिनो ध्यानं भवति ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**चित्ताभावेवि सया सुहुमोवरयकिरियाइ भण्णंति ।**
**जीवोवओगसब्भावओ भवत्थस्स झाणाइं ।।८६।।**

**पुव्व० गाहा ।। चित्त० गाहा ।।** काययोगनिरोधिनो योगिनोऽ[a]योगिनो वा [b]**चित्ताभावेऽपि सति** [c]**सूक्ष्मोपरतक्रिये** [d]**भण्येते, सूक्ष्म**ग्रहणात् सूक्ष्मक्रियाऽनिवर्तिनो ग्रहणम्, [e]**उपरत**ग्रहणाद् व्युपरतक्रियाऽप्रतिपातिन इति, **पूर्वप्रयोगादिति** हेतुः, कुलालचक्रभ्रमणवदिति दृष्टान्तोऽभ्यूह्यः। यथा [f]तच्चक्रं भ्रमणनिमित्तदण्डादिक्रियाऽभावेऽपि भ्रमति तथाऽस्यापि मनःप्रभृतियोगोपरमेऽपि **जीवोपयोगसद्भावतो** भावमनसो भावा**द्भवस्थस्य ध्याने** इति, **अपि**शब्दश्चोदनानिर्णय*प्रथमहेतुसम्भावनार्थः, **च**शब्दस्तु प्रस्तुतहेत्वनुकर्षणार्थः, एवं शेषहेतवोऽप्यनया गाथया योजनीयाः ।

विशेषस्तूच्यते - **कर्मविनिर्जरणहेतुतश्चापि** कर्मविनिर्जरणहेतुत्वात् क्षपकश्रेणिवत्, अतो [g]भवति च क्षपकश्रेण्यामिवास्य भवोपग्राहिकर्मनिर्जरेति भावः, **च**शब्दः प्रस्तुतहेत्वनुकर्षणार्थः, **अपि**शब्दस्तु द्वितीयहेतुसम्भावनार्थ इति तथा **शब्दार्थबहुत्वाद्** यथैकस्यैव हरिशब्दस्य शक्र-शाखामृगादयो[h]ऽनेकेऽर्थाः एवं ध्यानशब्दस्यापि, न विरोधः, "ध्यै चिन्तायाम्, ध्यै [i]काययोगनिरोधे, ध्यै अयोगित्वे" इत्यादि। **तथा जिनचन्द्रागमाच्चै**तदेवमिति, उक्तं च –

---

तथा यद्यपि द्रव्यतो योगा न सन्ति, तथापि **जीवोपयोगरूप**भावमनःसद्भावादयोगिनो ध्यानम् । **यद्वा** ध्यानकार्यस्य **कर्मनिर्जरणस्य हेतोः** हेतुत्वात् ध्यानम्, यथा पुत्रकार्यकरणादपुत्रोऽपि पुत्र उच्यते । भवति ह्यस्य भवोपग्राहिकर्मनिर्जरा ।

**अथवा शब्दार्थबहुत्वाद्** ध्यानम्, यथा 'हरि'शब्दस्य अर्क-मर्कटादयो बहवोऽर्थाः, एवं ध्यानशब्दस्यापि । तथाहि–

ध्यै चिन्तायाम्, ध्यै काययोगनिरोधे, ध्यै अयोगित्वे । वदन्ति हि–

"निपाताश्चोपसर्गाश्च धातवश्चेति ते त्रयः । अनेकार्थाः स्मृताः सर्वे पाठस्तेषां निदर्शनम् ।। १ ।।" [ ] इति ।

**जिनागमाद्वाऽयोगिनोऽपि ध्यानम्** । यदाह–

"आगमश्चोपपत्तिश्च संपूर्णं दृष्टिलक्षणम् । अतीन्द्रियाणामर्थानां सद्भावप्रतिपत्तये ।। १ ।।" [ ]

इति ।। १२ ।।　**–योगशास्त्रे प्र. ११ ।।**

* **प्रथमहेतुरिति** पूर्वप्रयोगलक्षणः ।　**– ध्यानशतकवृत्ति-विषमपदपर्याये ।।**

Jain Education International 2010_02　For Private & Personal Use Only　www.jainelibrary.org

"आगमश्चोपपत्तिश्च सम्पूर्णं दृष्टिलक्षणम् ।
अतीन्द्रियाणामर्थानां सद्भावप्रतिपत्तये ।।१।।" [दशवैकालिकचूर्णौ, पृ.१३७]
इत्यादि गाथाद्वयार्थः ।।८५-८६।।

उक्तं **ध्यातव्यद्वारम्**, **ध्यातारस्तु** धर्मध्यानाधिकार एवोक्ताः, अधुनाऽ**नुप्रेक्षाद्वार**मुच्यते –

**सुक्कज्झाणसुभावियचित्तो चिंतेइ झाणविरमेऽवि ।**
**णिययमणुप्पेहाओ चत्तारि चरित्तसंपन्नो ।।८७।।**

**सुक्क० गाहा ।। शुक्लध्यानसुभावितचित्तश्चिन्तयति ध्यानविरमेऽपि नियतमनुप्रेक्षाश्चतस्त्रश्चारित्रसम्पन्नः**, तत्परिणामरहितस्य तदभावादिति गाथार्थः ।।८७।।

ताश्चैताः-

**आसवदारावाए[१] तह संसारासुहाणुभावं च ।**
**भवसंताणमणन्तं वत्थूणं विपरिणामं च ।।८८।।**

---

[१] A मू० **चतारि झाणा पं० x x x सुक्कस्स णं झाणस्स चतारि अणुप्पेहाओ पं० तं० अणंतवत्तियाणुप्पेहा, विप्परिणामाणुप्पेहा, असुभाणुप्पेहा, अवायाणुप्पेहा ।।**
**–स्था. सू. २४७, भग. सू. ८०२, औप. सू. २० ।।**

वृ० x x x अथ **तदनुप्रेक्षा** उच्यन्ते- '**अणंतवत्तियाणुप्पेह**' त्ति अनन्ता-अत्यन्तं प्रभूता वृत्तिः-वर्त्तनं यस्यासावनन्तवृत्तिः अनन्ततया वा वर्त्तत इत्यनन्तवर्त्ती तद्भावस्तत्ता, भवसन्तानस्येति गम्यते, तस्या अनुप्रेक्षा अनन्तवृत्तितानुप्रेक्षा अनन्तवर्त्तितानुप्रेक्षा वेति, यथा–
"एस अणाइ जीवो संसारो सागरोव्व दुत्तारो । नारयतिरियनरामरभवेसु परिहिंडए जीवो ।। १ ।।"
इति, एवमुत्तरत्रापि समासः, नवरं '**विपरिणामे**'त्ति विविधेन प्रकारेण परिणमनं विपरिणामो वस्तूनामिति, गम्यते, यथा-
"सव्वट्ठाणाइं असासयाइं इह चेव देवलोगे य । सुरअसुरनराईणं रिद्धिविसेसा सुहाइं च ।। १ ।।"
'**असुभे**'त्ति अशुभत्वं संसारस्येति गम्यते, यथा–
"धी संसारो जंमि(मी)जुयाणओ परमरूवगव्वियओ ।
मरिऊण जायइ किमी तत्थेव कडेवरे नियए ।। १ ।।"
तथा **अपाया** आश्रवाणामिति गम्यते, यथा–
"कोहो य माणो य अणिग्गहीया, माया य लोभो य पवड्ढमाणा ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**आसव० गाहा ।। आश्रवद्वाराणि** मिथ्यात्वादीनि, तदपायान् दुःखलक्षणान्, **तथा** [a]**संसाराशुभानुभावं च** "धी* संसारो... [द.वै.चूर्णि पृ.३४] इत्यादि," **भवसन्तानमनन्तं** [b]भाविनं नारकाद्यपेक्षया, **वस्तूनां विपरिणामं च** सचेतनाचेतनानाम् "सव्वट्ठाणाणि असासयाणि" [द.वै.चूर्णि पृ.३४] इत्यादि, एताश्चतस्रोऽप्यपाया-ऽशुभा-ऽनन्त-विपरिणामानुप्रेक्षा आद्यद्वयभेदसङ्गता एव द्रष्टव्या इति गाथार्थः ।।८८।।

उक्तम**नुप्रेक्षाद्वारम्**, इदानीं **लेश्याद्वारा**[a]भिधित्सयाऽऽह-

**[१]सुक्काए लेसाए दो [b]ततियं परमसुक्कलेस्साए ।**
**थिरया[c]जियसेलेसं लेसाईयं परमसुक्कं ।।८९।।**

**सुक्का० गाहा ।।** सामान्येन **शुक्लायां लेश्यायां द्वे** आद्ये उक्तलक्षणे, **तृतीयम्** उक्तलक्षणमेव **परमशुक्ललेश्यायाम्, स्थिरताजितशैलेशम्** मेरोरपि निष्प्रकम्पतरमित्यर्थः **लेश्यातीतं परमशुक्लम्** चतुर्थमिति गाथार्थः ।।८९।।

उक्तं **लेश्याद्वारम्,** अधुना **लिङ्गद्वारं**[a] विवृण्वंस्तेषां नाम-प्रमाण-स्वरूप-गुणभावनार्थमाह –

---

चत्तारि एए कसिणा कसाया, सिंचंति मूलाइं पुणब्भवस्स ।। १ ।।" इह गाथा – [ध्यानशतके] "आसवदारावाए तह संसारासुहाणुभावं च । भावसंताणमणंतं वत्थूणं विपरिणामं च ।। ८८ ।।" इति । x x x ।। **—स्थानाङ्गसूत्रवृत्तौ ।।**

B **इमाओ पुण से चत्तारि अणुप्पेहाओ**-अवायाणुप्पेहा, असुभाणुप्पेहा, अणंतवत्तियाणुप्पेहा, विप्परिणामाणुप्पेहा । जधत्थं आसवादिअवायं पेक्खति संसारस्स असुभत्तं अणंतत्तं सव्वभाव-विपरिणामित्तं । **—आवश्यकचूर्णौ ।।**

C **आश्रवाऽपायसंसारा-नुभावभवसन्ततीः ।**
**अर्थे विपरिणामं वाऽनुपश्येच्छुक्लविश्रमे ।।८१।।** **—अध्यात्मसारे, अ. १६ ।।**

* **धी संसार** इति वीसीभावनामन्ये गाथा "सव्वट्ठाणाणि" इयमपि ।
**—ध्यानशतकवृत्ति-विषमपदपर्याये ।।**

[१] A पढमबितियाओ सुक्काए, ततियं परमसुक्कियं । लेश्यातीतं उवरिल्लं, होति ज्झाणं वियाहितं ।। ८।।
**—आवश्यकचूर्णौ ।।**

B **द्वयोः शुक्ला तृतीये च, लेश्या सा परमा मता ।**
**चतुर्थशुक्लभेदस्तु, लेश्याऽतीतः प्रकीर्तितः ।। ८२ ।।** **—अध्यात्मसारे, अ. १६ ।।**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**अवहा-ऽसंमोह-विवेग-विउसग्गा तस्स होंति लिंगाइं ।[१]**

**लिंगिज्जइ जेहिं मुणी सुक्कज्झाणोवगयचित्तो ।।९०।।**

**अवहा० गाहा ।। अवधाऽसम्मोह-विवेक-व्युत्सर्गास्तस्य** शुक्लध्यानस्य **भवन्ति लिङ्गानि, 'लिङ्ग्यते'** गम्यते **यैर्मुनिः शुक्लध्यानोपगतचित्त** इति गाथाक्षरार्थः ।।९०।।

अधुना भावार्थमाह –

**चालिज्जइ[१] [a]बीहेइ व धीरो न परीसहोवसग्गेहिं ।**

**सुहुमेसु न संमुज्झइ भावेसु न देवमायासु ।।९१।।**

**देहविवित्तं पेच्छइ अप्पाणं तह य सव्वसंजोगे ।**

**देहोवहिवोसग्गं निस्संगो सव्वहा कुणइ ।।९२।।**

**चालिज्जइ० गाहा ।। चाल्यते** ध्यानान्न **परीषहोप[b]सर्गैर्बिभेति वा धीरो** बुद्धिमान् स्थिरो वा न तेभ्य इत्यवधलिङ्गम् । **सूक्ष्मेषु** अत्यन्तगहनेषु **न [c]सम्मुह्यति** न [d]सम्मोहमुपगच्छति, **भावेषु** पदार्थेषु, **न देवमायासु** अनेकरूपास्वित्यसम्मोहलिङ्गमिति [e]गाथार्थः ।।९१।।

---

[१] **लिङ्गं निर्मलयोगस्य, शुक्लध्यानवतोऽवधः । असम्मोहो विवेकश्च, व्युत्सर्गश्चाऽभिधीयते ।। ८३ ।।**

**–अध्यात्मसारे, अ. १६ ।।**

**(गाथा-९१)**

[१] A **चतारि झाणा पं०** x x x **सुक्कस्स णं झाणस्स चतारि लक्खणा पं० तं०- अव्वहे, असम्मोहे, विवेगे, विउस्सग्गे** x x x **।। सू. २४७ ।।** **–स्था. सू. २४७, भग. सू. ८०२, औप. सू. २० ।।**

**वृ०** x x x अथ **शुक्लध्यानलक्षणान्युच्यन्ते–अव्वहे**त्ति देवादिकृतोपसर्गादिजनितं भयं चलनं वा व्यथा तस्या अभावो अव्यथम्, तथा देवादिकृतमायाजनितस्य सूक्ष्मपदार्थविषयस्य च संमोहस्य-मूढताया निषेधा**दसम्मोहः**, तथा देहादात्मन आत्मनो वा सर्वसंयोगानां विवेचनं-बुद्ध्या पृथक्करणं **विवेकः**, तथा निःसङ्गतया देहोपधित्यागो **व्युत्सर्ग** इति । अत्र विवरणगाथा– [ध्यानशतके]

चालिज्जइ बीहेइ व धीरो न परीसहोवसग्गेहिं ।

सुहुमेसु न संमुज्झइ भावेसु न देवमायासु २ ।। ९१ ।।

देहविवित्तं पेच्छइ अप्पाणं तहय सव्वसंजोगे ३ ।

देहोवहिवुस्सग्गं निस्संगो सव्वहा कुणइ ।। ९२ ।।" इति x x x ।। **–स्थानाङ्गसूत्रवृत्तौ ।।**

Jain Education International 2010_02	For Private & Personal Use Only	www.jainelibrary.org

**देह० गाहा ।। देहविविक्तं पश्यत्यात्मानं तथा च सर्वसंयोगानि**ति विवेकलिङ्गम्। **देहोपधिव्युत्सर्गं निःसङ्गः सर्वथा करोति** व्युत्सर्गलिङ्गमिति गाथार्थः ।।९२।।

गतं **लिङ्गद्वारम्**, साम्प्रतं **फलद्वारमु**च्यते, इह च लाघवार्थं प्रथमोपन्यस्तं धर्मफलमभिधाय शुक्लध्यानफलमाह, धर्मफलानामेव शुद्धतराणामाद्यशुक्लद्वयफलत्वात्, अत आह -

**होंति सुहासव-संवर-विणिज्जराऽमरसुहाइं विउलाइं ।**
**झाणवरस्स फलाइं सुहाणुबंधीणि धम्मस्स[१] ।।९३।।**

**होंति० गाहा ।। भवन्ति शुभाश्रव-संवर-** [a] **विनिर्जराऽमरसुखानि शुभाश्रवः** पुण्याश्रवः **संवरः** अशुभकर्मागमनिरोधो **विनिर्जरा** कर्मक्षयः **अमरसुखानि** देवसुखानि, एतानि च दीर्घस्थिति-विशुद्ध्युपपाताभ्यां **विपुलानि** विस्तीर्णानि, **ध्यानवरस्य** ध्यानप्रधानस्य **फलानि शुभानुबन्धीनि** सुकुलप्रत्यायाति-पुनर्बोधिलाभ-भोग-प्रव्रज्या-केवल-शैलेश्य-पवर्गानुबन्धीनि **धर्मस्य** ध्यानस्येति गाथार्थः ।।९३।।

---

B **लक्खणाणि वि चत्तारि**-विवेगे, वियोसग्गे, अव्वहे असंमोहे, विवेगे सव्वसंजोगविवेगं पेक्खति, वियोसग्गे सव्वोवहिमादिविउस्सग्गं करेति, अव्वधे विण्णाणसंपण्णो ण बिहेति ण चलति, असंमोहे सुसण्हेवि अत्थे न संमुज्झतित्ति । **—आवश्यकचूर्णौ** ।।

C **अवधादुपसर्गेभ्यः, कम्पते न बिभेति च । असम्मोहान्न सूक्ष्माऽर्थे, मायास्वपि न मुह्यति ।। ८४ ।।**
**विवेकात् सर्वसंयोगा-द्भिन्नमात्मानमीक्षते । देहोपकरणाऽसङ्गो व्युत्सर्गाज्जायते मुनिः ।। ८५ ।।**
**—अध्यात्मसारे, अ. १६ ।।**

[१] A **जिनवरवचनगुणगणं सञ्चिन्तयतो वधाद्यपायांश्च ।**
**कर्मविपाकान् विविधान् संस्थानविधीननेकांश्च ।। २५० ।।**
**नित्योद्विग्नस्यैवं क्षमाप्रधानस्य निरभिमानस्य ।**
**धूतमायाकलिमलनिर्मलस्य जितसर्वतृष्णस्य ।। २५१ ।।**
**तुल्यारण्यकुलाकुलविविक्तबन्धुजनशत्रुवर्गस्य ।**
**समवासीचन्दनकल्पनप्रदेहादिदेहस्य ।। २५२ ।।**
**आत्मारामस्य सतः समतृणमणिमुक्तलोष्ठकनकस्य ।**
**स्वाध्यायध्यानपरायणस्य दृढमप्रमत्तस्य ।। २५३ ।।**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अध्वसायविशुद्धेः प्रमत्तयोगैर्विशुद्ध्यमानस्य ।
चारित्रशुद्धिमग्र्यामवाप्य लेश्याविशुद्धिं च ।। २५४ ।।
तस्यापूर्वं करणमथ घातिकर्मक्षयैकदेशोत्थम् ।
ऋद्धिप्रवेकविभववदुपजातं जातभद्रस्य ।। २५५ ।।
सातर्द्धिरसेष्वगुरुः सम्प्राप्य विभूतिमसुलभामन्यैः ।
सक्तः प्रशमरतिसुखे न भजति तस्यां मुनिः संगम् ।। २५६ ।।
या सर्वसुरवरर्द्धिर्विस्मयनीयापि साऽनगारर्द्धेः ।
नार्घति सहस्रभागं कोटिशतसहस्रगुणितापि ।। २५७ ।।
तज्जयमवाप्य जितविघ्नरिपुभवशतसहस्रदुष्प्रापम् ।
चारित्रमथाख्यातं सम्प्राप्तस्तीर्थकृत्तुल्यम् ।। २५८ ।।
शुक्लध्यानद्वयमवाप्य कर्माष्टकप्रणेतारम् ।
संसारमूलबीजं मूलादुन्मूलयति मोहम् ।। २५९ ।।

—प्रशमरतौ ।।

B अव० चतुर्विधस्य धर्म्यध्यानस्य फलमाह—

अस्मिन्नितान्तवैराग्यव्यतिषङ्गतरङ्गिते । जायते देहिनां सौख्यं स्वसंवेद्यमतीन्द्रियम् ।। १७ ।।

वृ० स्पष्टः।

उक्तं च—

अलौल्यमारोग्यमनिष्ठुरत्वं गन्धः शुभो मुत्रपुरीषमल्पम् ।
कान्तिः प्रासादः स्वरसौम्यता च योगप्रवृत्तेः प्रथमं हि चिह्नम् ।। १ ।। [ ] १७।।

अव० आमुष्मिकं फलं श्लोकचतुष्टयेनाह-

त्यक्तसङ्गास्तनुं त्यक्त्वा धर्म्यध्यानेन योगिनः । ग्रैवेयकादिस्वर्गेषु भवन्ति त्रिदशोत्तमाः ।। १८ ।।
महामहिमसौभाग्यं शरच्चन्द्रनिभप्रभम् । प्राप्नुवन्ति वपुस्तत्र स्रग्-भूषाऽम्बरभूषितम् ।। १९ ।।
विशिष्टवीर्य-बोधाढ्यं कामार्तिज्वरवर्जितम् । निरन्तरायं सेवन्ते सुखं चानुपमं चिरम् ।। २० ।।
इच्छासंपन्नसर्वार्थमनोहारि सुखामृतम् । निर्विघ्नमुपभुञ्जाना गतं जन्म न जानते ।। २१ ।।
दिव्यभोगावसाने च च्युत्वा त्रिदिवतस्ततः। उत्तमेन शरीरेणावतरन्ति महीतले ।। २२ ।।
दिव्यवंशे समुत्पन्ना नित्योत्सवमनोरमान् । भुञ्जते विविधान् भोगानखण्डितमनोरथाः ।। २३ ।।
ततो विवेकमाश्रित्य विरज्याऽशेषभोगतः । ध्यानेन ध्वस्तकर्माणः प्रयान्ति पदमव्ययम् ।। २४ ।।

वृ० -स्पष्टाः ।। १८-२४ ।।   —योगशास्त्रे, प्र.१० ।।

C शीलसंयमयुक्तस्य, ध्यायतो धर्म्यमुत्तमम् ।
स्वर्गप्राप्तिं फलं प्राहुः, प्रौढपुण्यानुबन्धिनीम् ।। ७२ ।।

—अध्यात्मसारे, अ.१६ ।।

Jain Education International 2010_02   For Private & Personal Use Only   www.jainelibrary.org

उक्तानि [a]**धर्मफलानि**, अधुना **शुक्लम**धिकृत्याह –

**[१]ते य विसेसेण सुभासवादओऽणुत्तरामरसुहं च ।**
**दोण्हं सुक्काण फलं परिनिव्वाणं परिल्लाणं ।।९४।।**

**ते य० गाहा ।। ते च विशेषेण शुभाश्रवादयो**ऽनन्तरोदिताः, **अनुत्तरामरसुखं च द्वयोः शुक्लयोर्फल**माद्ययोः, **परिनिर्वाणम्** मोक्षगमनं **परिल्लाणं** ति चरमयोर्द्वयोरिति गाथार्थः ।।९४।।

अथवा सामान्येनैव संसारप्रतिपक्षभूते एते इति दर्शयति –

**आसवदारा संसारहेयवो जं ण धम्म-सुक्केसु ।**
**संसार[a]कारणाइं न तो धुवं धम्म-सुक्काइं ।।९५।।**

**आसवदारा० गाहा ।। आश्रवद्वाराणि संसारहेतवो** वर्तन्ते, तानि च **यस्मान्न** [b]**धर्म-शुक्लयो**र्भवन्ति [c]**संसारकारणे न तस्माद् ध्रुवं** नियमेन **धर्म-शुक्ले** इति गाथार्थः ।।९५।।

---

D **अस्मिन्नितान्तवैराग्यव्यतिसङ्गतरङ्गिते ।**
**जायते देहिनां सौख्यं स्वसंवेद्यमतीन्द्रियम् ।। १९३ ।।**
**त्यक्तसङ्गास्तनुं त्यक्त्वा धर्मध्यानेन योगिनः ।**
**ग्रैवेयकादिस्वर्गेषु भवन्ति त्रिदशोत्तमाः ।। १९४ ।।**

**–ध्यानदीपिकायाम् ।।**

[१] A अणुत्तरेहिं देवेहिं, पढमबीएहिं गच्छती । उवरिल्लेहिं झाणेहिं, सिज्झती निरयो धुवं ।। ९।।

**–आवश्यकचूर्णौ ।।**

B **अव०** धर्म्यध्यानमुपसंहरन् शुक्लं ध्यानं प्रस्तौति-
**स्वर्गापवर्गहेतुर्धर्म्यध्यानमिति कीर्तितं तावत् ।**
**अपवर्गैकनिदानं शुक्लमतः कीर्त्यते ध्यानम् ।। १ ।।**

**वृ०** धर्म्यध्यानस्यापवर्गहेतुत्वं पारम्पर्येण, **अपवर्गस्यैकम**साधारणं **निदानं** कारणं **शुक्लध्यानम्**, इदं चोत्तरशुक्लध्यानद्वयापेक्षया द्रष्टव्यम् । आद्ययोस्तु शुक्लध्यानभेदयोरनुत्तरविमानगमननिबन्धनता अप्यस्ति । यदाह – [ध्यानशतके]
"होंति सुहासव-संवर-विणिज्जरा-ऽमरसुहाइं विउलाइं ।
झाणवरस्स फलाइं सुहाणुबंधीणि धम्मस्स ।।९३।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

संसारप्रतिपक्षतया च मोक्षहेतुर्[a]ध्यानमित्यावेदयन्नाह –

**संवर-विणिज्जराओ मोक्खस्स पहो तवो पहो तासिं ।**
**झाणं च पहाणंगं तवस्स तो मोक्[b]खहेऊ तं[1] ।।९६।।**

**संवर० गाहा ।। संवर- [c]विनिर्जरे मोक्षस्य पन्थाः** अपवर्गस्य मार्गस्**तपः पन्था** मार्गः **तयोः** संवर-निर्जरयोः, **ध्यानं च प्रधानाङ्गं तपस** आन्तरकारणत्वात्, **ततो मोक्षहेतुस्तद्** ध्यानमिति गाथार्थः ।।९६।।

अमुमेवार्थं सुखप्रतिपत्तये दृष्टान्तैः प्रतिपादयन्नाह –

**अंबर-लोह-महीणं कमसो जह मल-कलंक-पंकाणं ।**
**सोज्झा-वणयण-सोसे साहेंति जलाऽणलाऽऽइच्चा ।।९७।।**

**तह सोज्झाइसमत्था जीवंबर-लोह-मेइणिगयाणं ।**
**झाणजला-ऽणल-सूरा कम्ममल-कलंक-पंकाणं ।।९८।।**

**अंबर० गाहा ।। अम्बर-लोह-महीनां** वस्त्र-लोहा-ऽऽर्द्रक्षितीनां **क्रमशः** क्रमेण **यथा मल-कलङ्क-पङ्कानां** यथासङ्ख्यं **शोध्य-[a]पनयन-शोषान्** यथासङ्ख्यमेव **साधयन्ति** निर्वर्तयन्ति **जला-ऽनला-ऽऽदित्या** इति गाथार्थः ।।९७।।

---

ते य विसेसेण सुहासवादओ अणुत्तरसुहं च।
दोण्हं सुक्काण फलं परिनिव्वाणं परिल्लाणं ।। ९४ ।।"

**– योगशास्त्रे, प्र. ११ ।।**

C **एतच्चतुर्विधं शुक्लध्यानमत्र द्वयोः फलम् ।**
**आद्ययोः सुरलोकाप्ति-रन्त्ययोस्तु महोदयः ।। ८० ।।**

**–अध्यात्मसारे, अ. १६ ।।**

[१] A **मोक्षोऽतिकर्मक्षयतः प्रणीतः कर्मक्षयो ज्ञानचारित्र्यतश्च ।**
**ज्ञानं स्फुरद् ध्यानत एव चास्ति ध्यानं हितं तेन शिवाध्वगानाम् ।। ४६ ।।**
**मोक्षः कर्मक्षयादेव स सम्यग्ज्ञानतो भवेत् ।**
**ध्यानसाध्यं मतं तद्धि तस्मात्तद्धितमात्मनः ।। ४७ ।।**

**–ध्यानदीपिकायाम् ।।**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**तह० गाहा ।। तथा शोध्यादिसमर्था जीवाऽम्बर-लोह-मेदिनीगतानां ध्यानमेव जलाऽनल-सूर्याः कर्मैव मल-कलङ्क-पङ्कास्तेषामिति** गाथार्थः ।।९८।।

किञ्च –

**[a]तावो सोसो भेओ जोगाणं झाणओ जहा निययं ।**
**तह ताव-सोस-भेया कम्मस्स वि झाइणो नियमा ।।९९।।**

**तावो० गाहा ।। तापः शोषो भेदो योगानां ध्यानतो** ध्यानाद् **यथा नियतम्** अवश्यम्, तत्र **तापो** दुःखम्, तत एव **शोषो** दौर्बल्यम्, तत एव **भेदो** विदारणम्, **योगानां** वागादीनाम्, **तथा** तेनैव प्रकारेण **ताप-शोष-भेदाः कर्मणोऽपि** भवन्ति, कस्य ? **ध्यायिनो** न यदृच्छया **नियमेने**ति गाथार्थः ।।९९।।

किञ्च –

**जह रोगासयसमणं विसोसण-विरेयणोसहविहीहिं ।**
**तह कम्मामयसमणं झाणाणसणाइजोगेहिं ।।१००।।**

**जह० गाहा ।। यथा रोगाशयशमनम्** रोगनिदानचिकित्सा, **विशोषण-विरेचनौषधविधिभिः** अभोजन-[a]विरेकौषधप्रकारैः, **तथा कर्मामयशमनम्** कर्मरोगचिकित्सा **ध्यानानशनादिभिर्योगैः, आदि**शब्दाद् ध्यानवृद्धिकारकशेषतपोभेद-ग्रहणमिति गाथार्थः ।।१००।।

किञ्च –

**जह चिरसंचियमिंधणमनलो पवणसहिओ [a]दुयं दहइ ।**
**तह [b]कम्मिंधणममियं खणेण झाणाणलो डहइ ।।१०१।।**

**जह० गाहा ।। यथा चिरसञ्चितं** प्रभूतकालसञ्चितम् **इन्धनं** काष्ठादि [c]**अनलः** अग्निः **पवनसहितो** वायुसमन्वितो **द्रुतं** [d]शीघ्रं **दहति** भस्मीकरोति, **तथा** दुःख-तापहेतुत्वात् कर्मैवेन्धनम् **कर्मेन्धनम् अमितम्** अनेकभवोपात्तमनन्तम्, **क्षणेन** समयेन ध्यानमनल इव **ध्यानानलः** असौ **दहति** [e]अकर्म्मीकरोतीति गाथार्थः ।।१०१।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**[a]जह वा घणसंघाया खणेण पवणाहया विलिज्जंति ।**

**झाणपवणावहूया तह कम्मघणा विलिज्जंति ।।१०२।।**

**जह० गाहा ।। यथा वा घनसङ्घाता** मेघौघाः **क्षणेन पवनाहता** वायुप्रेरिता [b]**विलीयन्ते** विनाशं यान्ति-गच्छन्ति, **ध्यानपवनावधूता** ध्यानवायुविक्षिप्ताः [c]**तथा कर्मैव** जीवस्वभावावरणाद् [d]**घनाः** उक्तं च –

"स्थितः शीतांशुवज्जीवः प्रकृत्या भावशुद्धया ।

चन्द्रिकावच्च विज्ञानं तदावरणमभ्रवत् ।।१।।" [ ] इत्यादि ।

**विलीयन्ते** विनाशमुपयान्तीति गाथार्थः ।।१०२।।

किञ्चेदमन्यदिहलोकप्रतीतमेव[a] **ध्यानफलमि**ति दर्शयति –

**ण कसायसमुत्थेहि य बाहिज्जइ माणसेहिं दुक्खेहिं ।**

**ईसा-विसाय-सोगाइएहिं झाणोवगयचित्तो ।।१०३।।**

**ण कसाय० गाहा ।। न कषायसमुत्थैश्च** न क्रोधाद्युद्भवैश्च **बाध्यते** पीड्यते **मानसैर्दुःखैः,** मानसग्रहणात्ताप इत्याद्यपि यदुक्तं तत्र बाध्यते **ईर्ष्या-विषाद-शोकादिभिस्तत्र** प्रतिपक्षाभ्युदयोपलम्भजनितो मत्सरविशेष **ईर्ष्या, विषादो** वैक्लव्यम्, **शोको** दैन्यम् [b]आदिशब्दाद्भयादिपरिग्रहः, **ध्यानोपगतचित्त** इति प्रकटार्थमयं गाथार्थः ।।१०३।।

**सीयाऽऽयवाइएहि य सारीरेहिं सुबहुप्पगारेहिं ।**

**झाणसुनिच्चलचित्तो न वहिज्जइ निज्जरापेही ।।१०४।।**

**सीयायव० गाहा ।।** इह कारणे कार्योपचारात् **शीतातपादिभिश्च** आदिशब्दात् [a]क्षुदादिपरिग्रहः, **शारीरैः सुबहुप्रकारैः** अनेकभेदै**र्ध्यानसुनिश्चलचित्तो** ध्यानभावितमतिर्न **बाध्यते,** ध्यानसुखादिति गम्यते, अथवा न शक्यते [b]चालयितुम्, तत [c]एव च **निर्जरापेक्षी** कर्मक्षयापेक्षक इति गाथार्थः ।।१०४।।

उक्तं फलद्वारम्, अधुनोपसंहरन्नाह –

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**इय[1] सव्व[a]गुणाहाणं दिट्ठादिट्ठसुहसाहणं झाणं ।**
**सुपसत्थं सद्धेयं नेयं झेयं च निच्चंपि ।।१०५।।**

**इय० गाहा** ।। 'इय' एवमुक्तेन प्रकारेण **सर्वगुणाधानम्** अशेष[b]गुणस्थानं **दृष्टादृष्टसुखसाधनं ध्यान**मुक्तन्यायात् सुष्ठु प्रशस्तं **सुप्रशस्तम्** [c]तीर्थंकरादिभिरासेवितत्वात्, यतश्चैवमतः **श्रद्धेयं** नान्यथैतदिति [d]भावनया **ज्ञेयं** ज्ञातव्यं स्वरूपतया **ध्येयम्** अनुचिन्तनीयं क्रियया, एवं च सति सम्यग्दर्शन-ज्ञान-चारित्राण्यासेवितानि भवन्ति, **नित्यमपि** सर्वकालमपि।

आह – एवं तर्हि [e]शेषक्रियालोपः प्राप्नोति ? न, तदासेवनस्यापि तत्त्वतो ध्यानत्वात्, नास्ति काचिदसौ क्रि[f]या या आगमानुसारेण क्रियमाणा साधूनां ध्यानं न भवतीति गाथार्थः ।।१०५।।*

**[ [a]पंचुत्तरेण गाहासएण झाणस्सयं समक्खायं ।**
**जिणभद्दखमासमणेहिं [b]कम्मसोहीकरं जइणो[c] ।। १०६ ।।]**

**।। इति वैक्रमीये २०६५ तमे वर्षे व्याख्यानवाचस्पतिपूज्यपाचार्यश्रीमद्विजयरामचन्द्रसूरिशिष्यानां वर्धमानतपोनिधिपूज्याचार्यश्रीमद्विजयगुणयशसूरीश्वराणामन्तेवासिना विजयकीर्तियशसूरिणा मुम्बापुरीनगरे संशोधितः संपादितश्चायं समर्थशास्त्रकारशिरोमणि-श्रीमद्-हरिभद्र-सूरिविरचितवृत्याऽलङ्कृतो भगवच्छ्रीमज्जिनभद्रगणि-क्षमाश्रमण-विरचितो ध्यानशतकग्रन्थः समाप्तिमगमत् ।।**

---

१. एतद्ध्यानफलं शुद्धं, मत्वा भगवदाज्ञया ।
यः कुर्यादेतदभ्यासं, सम्पूर्णाऽध्यात्मविद्भवेत् ।। ८६ ।।
—अध्यात्मसारे, अ. १६ ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# परिशिष्टम्

| गाथा | पाठांतर | प.क्र. |
|---|---|---|
| १ | a. किं विशिष्टं तमित्यत (M), | २ |
| | b. ०त्यर्थः समान० (M), | २ |
| | c. ०धास्ये इति, किं (M), | २ |
| | d. अपडिभूया (M), | ४ |
| | e. ०र्थान्तरं, योगीश्वरं (B E F G M) | ४ |
| | f. शुक्लध्यानाग्निना दग्ध० (D M) | ५ |
| | g. इह शुक्लध्यानाग्निना दग्ध० (D M) | ५ |
| | h. चोभयपदव्यापारे एक० (H I) | |
| | चोभयपदव्यभिचारेऽज्ञात० (M) | ५ |
| | i. पूर्वपूर्वमुनि० (B) | ५ |
| २ | a. ध्यानलक्षण० (B D M) | ५ |
| | b. एकाग्रताल० (D M) | ५ |
| | c. निर्देशे (D H M) | ५ |
| | d. भवेद् भावना भाव्यत, (M) | ९ |
| | भवेद् का ? भावना भाव्यत (M) | |
| | e. स्मृतिध्यानाद् (D H M) | ११ |
| | f. रहिता चिन्ता मन० (B M) | |
| | ०रहिता मन० (D) | ११ |
| ३ | a. ध्यानलक्षण० (B D M), | १२ |
| | b. पाणेत्ति (B), पाणोत्ति (L) | १२ |
| | c. लवे (M) | १२ |
| | d. एकं च तद्वस्तु एकवस्तु (D M) | १२ |
| ५ | a. ०फलभावं (D M), | १६ |
| | b. सुखसिद्धिरिति (D E), | २१ |
| | c. ०प्रतिपत्तिः (D M), | २१ |
| ६ | a. ०वस्तुनामिति शब्दा० (D M), | २२ |
| | b. ते विषयाश्च, आदि० (D M), | २२ |
| | c.०गोचरा वा (D M), | २२ |
| | d. ०चिन्तेति, कथं (B), | २२ |
| | e. ०सम्प्रयुक्त० (D G M) | २३ |
| | f. ०ग्रह इति । (D M) | २३ |
| ७ | a. प्रथमो (G M), | २३ |
| | b. साम्प्रतं (D G M), | २३ |
| | c. वेदना तत् तस्याः (B), | २४ |
| | d. विप्रयोगे (B F), | २४ |
| | e. चिन्ता आर्तध्यान० (B L F) | २४ |
| | f. ०ग्रहणेना० (D M) | २४ |
| ८ | a. द्वितीयभेदः (D), | २४ |
| | b. साम्प्रतं (D G M) | २४ |
| | c. अविप्रयोगे दृढा० (B F) | २५ |
| ९ | a. ०पत्थणम० (D M), | २६ |
| | b. गुणऋद्धयः (B D M) | २७ |
| | c. ०गुणर्द्धयः (B D M) | २७ |
| | d. च (D M) | २८ |
| १० | a. चतुर्थो (B D F G M L), | २८ |
| | b. दोसा (B), | २८ |
| | c. आत्मनः किम् ? आ० (D F M) | २८ |
| | d. ०मिति तथा च इयं चतु० (M) | २८ |
| | e. किंविशिष्टम् ? इत्यत (D M) | २८ |
| ११ | a. ०सभाव० (D M), ०वचिंतणा० (B) | ३१ |
| | ०सभावचिंतणा (C), | ३१ |
| | b. समं (D F H M), | ३१ |
| | c. जगत्त्रिका० (B F G H), | ३१ |
| | d. शूलादि, प्राक्कर्म (A) | ३१ |
| | e. ०मुनिभिः (D M), | ३१ |
| | f. पुव्विं खलु (D M), | ३१ |

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

| गाथा | पाठांतर | प.क्र. |
|---|---|---|
| | g. वेदइत्ता (H) वेइत्ता (B D F G M), | ३१ |
| | h. एवं (D M), | ३१ |
| | I शोभनाध्यवसायेन (B M) शोभनेनाध्यवसायेन (L), | ३१ |
| १२ | a. प्रथमः पक्षः (B F G) | ३१ |
| | b. अछित्तं अहीयं तवोविहाणेण (B F G H), | ३२ |
| | c. सहावद्येन सावद्यम् (B F G L), | ३२ |
| | d. ०वचन- स्तोक० (A), | ३२ |
| | e. ०प्रतिकारं (M), | ३२ |
| | f. ०तदपि निश्च० (D G M), | ३२ |
| १३ | a. एवानुपपत्तिरिति (A), | ३२ |
| १४ | a एताः कर्मो० (D M) | ३३ |
| १५ | a ०ध्यानी (D E) ०ध्याता (M) | ३३ |
| १६ | b. गच्छति (D M), | ३५ |
| १७ | c. विषयाश्च तेषु (I M) शब्दादयश्च शब्दादिविषयाः तेषु (F) | ३५ |
| | d. ततः परा० (D M), | ३५ |
| १८ | a. ०विरय० (B F G H), | ३६ |
| | b. ०संजयाणुयं (B F G H), | ३६ |
| | c ०नुगतम् (B F G H) | ३६ |
| | d. ०धरभेदाः (D M), | ३७ |
| | e. ०जनेन, (D M) | ३७ |
| १९ | a. चोमास्वाति० (D M), | ३८ |
| | b. दहणं (C), | ४० |
| | c. ०हमविवागं (D M L), | ४० |
| | d. कीलिका० (D) किलिका० (M), | ४० |
| | e. एतेषु (D M), | ४० |
| | f. मानादयो गृ० (D M), | ४० |

| गाथा | पाठांतर | प.क्र. |
|---|---|---|
| २० | a. प्रथमो भेदः (D M), | ४२ |
| | b. ०मभिधित्सुराह (D M), | ४२ |
| | c. इत्यत्रानिष्टस्यसूचकं पिशुनं 'पिशुनमनिष्टसूचकं 'पिशुनं सूचकं विदुः... (D M) इत्यत्रानिष्ट-सूचकं पिशुनं 'पिशुनंसूचकं विदुः... (A B F G H), | ४२ |
| | d. प्रतिभेदस्वगत० (A F H), | ४४ |
| | e. ०ष्ववर्त्तमानस्यापि (G F H L), | ४४ |
| | f. अतिसन्धन० (A), | ४५ |
| | g. ०मप्या(स्या)ह (M), | ४५ |
| २१ | a. द्वितीयभेदः (B F G H L), | ४६ |
| | b. ०निरवेक्खं (D M), | ४६ |
| | c. दृढाध्यवसायप्रकार० (B D G M), | ४६ |
| | d. उत्कटौ तौ (B F G M), | ४६ |
| २२ | a. ०तृतीयभेदः (B D F G H), | ४७ |
| | b. चतुर्थं भेदमु० (D M), | ४७ |
| | c. ०धणसारक्खण० (C D M), | ४७ |
| | d. तेषां साधनं-कारणं च तद्धनं च तत्संरक्षणे (A) तेषां साधनं-कारणं शब्दादिविषयसाधनं तच्च तद्धनं च तत्संरक्षणे (B G F), तेषां साधनं-कारणं शब्दादिविषयसाधनं च तद्धनं च शब्दादिविषय-साधनधनं तत्संरक्षणे (M), | ४७ |
| | e. तथा चाऽनिष्टं (D), | ४७ |
| | f. ०मभिशङ्कनेनाकुलमिति सम्बध्यते न (D G H M), | ४७ |
| | g. ०यास्तैराकुलं (D G M) | ४७ |
| | h. ०साधनविशेषणं (A), | ४७ |

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

| गाथा | पाठांतर | प.क्र. |
|---|---|---|
| २३ | a. विशेषणाभि० (D M), | ४९ |
| | b. मनोग्रहणमित्यत्र (D H M) | ५१ |
| २४ | a. मोहाउलस्स (B D F G H I M), | ५१ |
| | b. निरइगयमूलं (B F G H), | |
| | निरइगयमूलं (L) | ५१ |
| | c. इयमत्र चतु० (D F G M), | ५१ |
| | d. निरयागति० (B) निरइगइ० (F), | |
| | निरयगति० (AG), | ५१ |
| २५ | a. पूर्ववद् व्याख्येया (D M), | ५१ |
| | b. विशेषः तीव्र (D H M), | ५१ |
| २६ | a. तु त्वक्तक्षण० (B G F H I), | ५२ |
| | b. वर्तत (B F G L), | ५२ |
| | c. महदापद्ग० (A D H M), | ५२ |
| | d. महदापद्ग० (D H M), | ५२ |
| | e कालसौकरादिवदपि (B G L), | ५२ |
| | f. तेष्वेव हिंसानुबन्ध्यादिषु (D M), | ५२ |
| | g. चतुर्भेदेषु (D M), | |
| | h. उत्सन्नादिदोषलि० (D G M) | ५२ |
| २७ | a. अहिनंदइ (D M), | ५३ |
| | b. निरवेक्खो (D M), | ५३ |
| | c. हरसिज्जइ (C F G H) | ५३ |
| | d. निर्वर्तितपापः सिंह० (D M), | ५३ |
| २८ | a. धर्मम् (D F G H L), | ५४ |
| | b. ध्यायेन्मुनिरिति । तत्कृत० (D M), | ५४ |
| | c. पश्चात् शुक्लध्यान० (D F G M), | ५४ |
| ३० | a. ०प्रतिपादनायाह (D M), | ५४ |
| | b. भावणाहि (M), | ५४ |
| | c. ०जणियाओ (B C D E F G H I L), | ५४ |
| | d. नियताः परि० (D M) | ५५ |
| ३१ | a. झाइज्ज (D), | ५६ |
| | b. आसेवालक्षणः (A), | ५६ |
| ३२ | a. ०रहितः शङ्कनं (D G M), | ५८ |
| | b. एतेषां (D M), | ५८ |
| | c. उक्तदोषरहित० (D H M), | ५८ |
| | d. प्रश(श्र)म० (M), | ५८ |
| | e. एव गुणास्तेषां गणः (D M), | ५९ |
| ३३ | a. गुणदर्शना० (D H M), | ६० |
| ३४ | a. गुणदर्शना० (D M), | ६१ |
| | b. ०जगस्सहावो (C), | ६१ |
| | c. ०वशात्ससंयोगो (B), | ६१ |
| ३५ | a. विशेष्यते (D M), | ६३ |
| ३६ | a. संहनन-धृतिभ्यां (D H M) | ६४ |
| | b. ०योगानां च (D), | ६४ |
| | c. इह एक० (D M), | ६४ |
| | d. विकल्पे (D M), | ६४ |
| ३७ | a. जो [तो] (M), | ६४ |
| | b. होइ (C), | ६४ |
| | c. मणोवयण० (D M L), | ६४ |
| | d. एवं तदुक्तं (D H M), | ६४ |
| | e. ०पितस्वरूपाणामिति (D M), | ६५ |
| ३८ | a. वा कालः, (D H M), | ६५ |
| ३९ | a. ०द्वारं व्या० (B D M), | ६६ |
| | b. निविण्णो (B D), | ६६ |
| | c. इहैव या (D M), | ६६ |
| | d. निषण्णादिरूपा (B D M), | ६६ |

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

| गाथा | पाठांतर | प.क्र. |
|---|---|---|
| | e. इति तयावस्थया स्थितः तदवस्थः (F G H), इति सैवावस्था यस्य सः तदवस्थः (D M) | ६६ |
| ४० | a. ०लाइभावं (D), | ६६ |
| | b. पइयव्वं (B D F G H), | ६७ |
| | c. केवलादिभावश्च प्रधानकेवलादिभावः (D), | ६७ |
| | d. यतितव्यं (D E), | ६७ |
| ४२ | a. ०प्रतिपादनायाह (D G M), | ६७ |
| | b. आलंबणाइं (B), आलंबणाई (M), | ६७ |
| ४४ | a. शुक्लस्य च (तं) प्रति० (M), | ६९ |
| | b. सेसाण (M), | ६९ |
| | c. प्रतिपत्तिक्रम (D H M), | ६९ |
| | d. प्रतिपत्तिपरिपाट्य (D E M), | ६९ |
| | प्रतिपत्ति परिपाट्यभि० (B F G L), | ६९ |
| | e. वस्थान्तर्गतः (D H M L), | ६९ |
| ४५ | a. ०जिणाणमाणं (D M), | ७० |
| | b. परिभावगं (D M), | ७० |
| | c. भूतभावनाम् (D M), | ७१ |
| | d. श्रूयन्ते च, बहव एव चिलातीपुत्रादयः एवंविधा इति (F G H L), श्रूयन्ते च, चिलातीपुत्रादय एवंविधा बहव इति (D M), | ७१ |
| | e. अणग्घेणं (D M), | ७२ |
| | f. उदयं (D M), | ७२ |
| | g. एत्तो वि (D M), तत्तो य (L) | ७२ |
| | h. एक्कस्स (D), | ७२ |
| | i. मृष्टां वा पथ्यां वा (D H M), | ७२ |
| | j. गच्छइ (D M), | ७२ |
| | k. कोसल्लगुणेऽणण्ण० (B F G L), | ७२ |
| | l. प्रधानप्राणिस्थिता० (D M), | ७३ |
| | m. छुहिंति (B F G L), | ७३ |
| | n. ०लक्षणां कुशल० (D M), | ७३ |
| | o. किं विशिष्टाम् ? (M), | ७३ |
| | P. तेन दुर्ज्ञेयामिति (D M), | ७३ |
| ४७ | a. यावि (D), | ७४ |
| | b. ०विरहतो वाऽपि (F H), विरहतोऽपि (D M), | ७४ |
| | c. गह्वरत्वेन (A B D H M), | ७४ |
| | d. ०श्चतुर्थाबोधकारण० (D M), | ७४ |
| | e. ज्ञेयगहनाप्रति० (D M), | ७४ |
| | f. तत्कार्य० (D M), | ७४ |
| | g. हिनोतिइति गमयति (A), | ७४ |
| | h. सर्वज्ञमतं वचनं (D H M L), | ७५ |
| ४९ | a. विशेष्यन्ते (D M), | ७५ |
| | b. ०वितथभाषिणो (A) | ७५ |
| | c. ०भावे गुणसमु० (B), | ७५ |
| | d. द्वेषाद्वा" इत्यादि गाथार्थः (B D M), | ७५ |
| ५० | a. प्रथमभेदः (A), | ७५ |
| | b. उच्यते - राग० (D M) | ७५ |
| | c. प्रवर्तमाना० (D M), | ७५ |
| | d. ०व्याध्यभिभूतस्य अपथ्या० (B G F H L), ०व्याध्यभिभूतस्य कुपथ्या० (D M), | ७६ |
| | e. तदपायाः (D H M L), | ७७ |
| | f. पुनः - "कोहो य माणो.... (M), | ७७ |
| | g. सर्वपापेभ्यः (D M), | ७८ |
| | h. इहं (D E F G H M), | ७८ |
| | i. ०गरिहिए पावे (B F G H), | ७८ |
| | j. ०भेदात्पञ्च (F G H L), | ७८ |
| ५१ | a. मनोवाक्काययोगादि० (B F), | ७९ |

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

| गाथा | पाठांतर | प.क्र. |
|---|---|---|
| | b. गाथार्थः (B D M) | ७९ |
| | c. पयईउत्ति (B D F G H M), | ७९ |
| | d. णाणावरणीयादिणो (A), | ७९ |
| | e. चिंतिज्जा विचिंतिज्ञा, किंच (A F G H), | ७९ |
| | f. ठिइविभिन्नं (D M), | ७९ |
| | g. पएसभिन्नं शुभाशुभं जाव चिंतेज्जा, पएसोति (A H), | ८० |
| | h. राशेस्ततः (D M), | ८० |
| | i. २५६, अमीषां घने कृते राशिरयमागच्छति अथवा चतुर्भिराशिभिरागुणिते अस्य (F G H), २५६, अमीषां घने कृते राशिरयमागच्छति अथवा चतुर्भिरष्टौ वारा गुणिते अस्य (B), | ८० |
| | j. क्रियते (A B D F H), | ८० |
| | k ०भेएहिं वित्थरओ (A G), | ८२ |
| | l. वित्थरओ कम्म० (B D F H M), | ८२ |
| | m. मणवायकाया (B), | ८२ |
| ५२ | a. जिणदेसियाइ (M), | ८२ |
| | b. ०खेत्तागिई (D M) | ८४ |
| | c. पएस इति (A), | ८४ |
| | d. ०नामेवात्मीयानि (B D M), | ८४ |
| | e. नाशोत्पत्ति (D M), | ८४ |
| ५३ | a. ०रवनिर्यथा (D M), | ८५ |
| | b. ०मूर्तिस्व० (B E F G H L), | ८५ |
| | c. ०त्मकम्, लोक्यत (D M), | ८५ |
| | d. तथाहि (D M K), | ८६ |
| | e. तहेव (D H M K), | ८६ |
| | f. लोगंमि(ग)निक्खेवो (M), लोगंमि निक्खेवो (H), | ८६ |
| | g. ०भेदादिति (D I), भेदादिं (M) | ८६ |

| गाथा | पाठांतर | प.क्र. |
|---|---|---|
| ५४ | a. ०रमणसागर० (D M), | ८६ |
| | b. नरगा (D H M), | ८६ |
| | c. असङ्ख्येयानि (M), | ८६ |
| | d. एसो भवणसमासो (D M), | ८७ |
| ५५ | a. भोयं (D M), | ८७ |
| | b. किमित्यत (D H M), | ८७ |
| | c. स्वकर्मणः आत्मीयस्य कर्मणः (D MK), | ८७ |
| ५७ | d. सन्ततप्रवृत्त० (B D G M), | ८८ |
| | e. संसारः सागर (D H M), | ८८ |
| ५८ | a. मणग्घं (C D M), | ८९ |
| | b. चारित्तमहं (B F G L), | ८९ |
| | c. ०जइणतरवेगं (D M K), | ८९ |
| | d. ०जह परिनिव्वाणपुरं (B F G H L), | ८९ |
| | e. ०पावंति (D M), | ८९ |
| | f. ०महाबोहित्थम् (B D M), | ८९ |
| ५९ | g. कृतं निश्छिद्रं (D M), | ९० |
| | h. जैनतरः (A), | ९० |
| | i. विरागभावो (A D H), | ९० |
| | j. एता (B D M), | ९० |
| ६० | k. महार्घाणि शील० (B D M), | ९० |
| | l. ०संरम्भ० (B D M), | ९० |
| | m. परिपूर्णः (B D M), | ९० |
| ६१ | a. जइ (M), | ९० |
| | b. प्राग्वदिति (D M), | ९० |
| ६२ | a. ०जीवपुण्यपापाऽऽश्रव० (D), | ९१ |
| ६३ | a. भणिया एए पंच पमाया" । (B F G H L), | ९५ |
| ६४ | a. प्रसङ्गत एव तानेवाभि० | |

| गाथा | पाठांतर | प.क्र. |
|---|---|---|
| | (DKM), प्रसङ्गत एव तानभि० (BE), प्रसङ्गत एतानभिधि० (FLGH) | १०३ |
| | b. ०व्युपरत० (BDM), | १०४ |
| | c. ०प्रतिपातिल० (BFGLHM), | १०४ |
| | d. सयोगायोगकेवलिनो (DGM), | १०४ |
| | e गम्मए (DM), | १०५ |
| ६५ | a. ०भावणापरमो (DM), | १०५ |
| | b. तद्विगमेऽपि (DM), | १०५ |
| | c. द्वादशानुप्रेक्षा (DMK), | १०५ |
| | d. तथारोग्यम्... सुदुर्लभा बोधिः ।। अयं पाठः FGL मध्ये नास्ति । | १०६ |
| | e. सुभावितान्तःकरणः (DM), | ११० |
| | f. प्राग्निरूपितशब्दार्थेन (DM), | ११० |
| ६६ | a. प्रतिपादनायाह (DM), | ११० |
| | b. ०मन्दभेदा (DM), | १११ |
| ६७ | -a. ०गुणकित्तण० (DMKL), | १११ |
| | b. प्ररूपितानां द्रव्यादि० (DM), | ११२ |
| | c. श्रद्धनाम् (BGL), | ११३ |
| | d. तल्लिङ्गं तत्त्व० (DM), | ११३ |
| | e. ०ध्यायीति (DM), | ११३ |
| | f. ०दान-विनयसम्पन्नः (BFLGH), | ११५ |
| ६९ | a. ०ध्यानाद० (DM), | ११८ |
| | b. क्रोधनिवर्तन० xxx वा विफली० (DM), | ११८ |
| | c. नियमतो (DM), | १२५ |
| | d. ०द्यालम्बना xxx०सादयन्ति (DM), | १२५ |
| ७० | a. ०श्चाऽऽद्योर्धर्म० (D), ०श्चाऽऽद्ययोर्धर्म० (KM), | १२५ |
| | b. ०पुनरयं (FGH), | १२५ |
| | c. मणं (CFGHL), | १२५ |

| गाथा | पाठांतर | प.क्र. |
|---|---|---|
| | d. ०तेति वाक्यशेषः (DM), | १२५ |
| | e. शैलेशीं न प्राप्तः (D), | १२५ |
| ७१ | a. मंतजोगेणं (DHML), मंतजोगेहिं (C), | १२६ |
| | b. भक्षितदेशः तत्र (B), भक्षणदेशे (DM), | १२६ |
| | c. पाठान्तरं वा (DLM), | १२६ |
| ७२ | a. जोगमंतबलजुत्तो (DM) | १२६ |
| | b. ०त्वाद्विषम्, (DM), | १२६ |
| ७३ | a. दृष्टान्तरमाह (BFGHL), | १२६ |
| | b. उसारि० (BCDFG),उस्सारि० (M), | १२६ |
| | c. हुयासुव्व (CDEFGH), | १२६ |
| | d. उत्सारिते० (DM), | १२७ |
| | e. विध्याति (ABFGHL), | १२७ |
| | f. दृष्टान्तोपनय० (DM), | १२७ |
| ७५ | a. भाजनं २ तत्तदुदरस्थं (A), भाजनं च तप्तायसभाजनं च लोहभाजनं च तदुदरस्थं (BFGL), | १२७ |
| | b. अयमर्थोपनयः (DM), | १२७ |
| ७६ | a. कायजोगं च (BFGHL), | १२७ |
| | b. गाथार्थः (DM), | १२७ |
| | c. मनोद्रव्यसाचि० (DGM), | १२८ |
| | d. शुभवेदनीया० (BFGL), | १२८ |
| | e. सत्स्वेत० (DM), | १२८ |
| | f. संखेज्ज० (BFG), | १२८ |
| | g. तदवत्था (BF), तयवत्थो (GHM), | १२९ |
| ७७ | a. ०जमेगवत्थुंमि० (DM), | १३० |
| | b. तावद्भेदेन (M), | १३३ |
| | c. तकम् (BDFGHM), | १३३ |
| | d. प्रथमशुक्लं आद्यशुक्लं (FH), | |

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

| गाथा | पाठांतर | प.क्र. |
|---|---|---|
| | प्रथमं शुक्लं आद्यशुक्लं (B D G M), | १३३ |
| | e. गाथार्थः (A D M), | १३३ |
| ७९ | a. बिईय० (C), बियइय० (F G H), | |
| | बितिय (D M), | १३५ |
| | b. ०पुनः सुनि० (M), | १३५ |
| | c. ततः (B H M), | १३७ |
| | d. तमेवंविधं (D H M), | १३७ |
| | e. द्वितीयं शुक्लं (D M), | १३७ |
| ८१ | a. तईयं (C), झाणं (D) | १३९ |
| | b. यस्य तत्तथा (D M), | १४० |
| ८२ | a. मेरुरिव (A H), | १४५ |
| | b. योगाभावात् तत् अप्रति० (D M), | १४५ |
| | c. अनुपरतस्व० (D G M), | १४५ |
| ८३ | a. बितियमेयजोगंमि (D M), | १४७ |
| | b. तईयं (C), | १४७ |
| | c. ०रं तदेकयोग (D M), | १४८ |
| | d. निवृत्ति (A), | १४८ |
| ८४ | a. नास्त्येव (D M), | १४८ |
| | b. ०कथम् ? उच्यते (D M), | १४८ |
| | c. सुनिश्चलं संतं (C F G H), | १४९ |
| ८५ | a. ०धिनोऽयोगिनो वा (A), | |
| | ०धिनो योगिनोऽयोगिनोऽपि (D M), | १५० |
| | b. ०भावेऽपि सूक्ष्मो० (D M), | १५० |
| | c. सूक्ष्मोपरतक्रियो (D H M), | १५० |
| | d. भण्यते (B D F G H M), | १५० |
| | e. उपरतक्रिया० (B), | १५० |
| | f. चक्रं (D M), | १५० |
| | g. ०वत्, भवति (B D F G H K L), | १५० |
| | h. ०नेकार्थाः (B D M L), | १५० |
| | i. कायनिरोधे (D M), | १५० |
| ८८ | a. संसारानुभावं (D M), | १५२ |
| | b. भाविनारका० (A H), | १५२ |
| ८९ | a. ०भिधित्सुराऽऽह (B H), | १५२ |
| | b. तइयं (H), तईयं (B C), | १५२ |
| | c. जियसेलेसिं (D H M L), | १५२ |
| ९० | a. विवर्णिषुस्तेषां (B), | |
| | विवरीषुस्तेषां (D F G H L), | १५२ |
| ९१ | a. बीभेइ य (D M), | १५३ |
| | b. ०सर्गैर्बिहेति (A), | १५३ |
| | c. सम्मुह्यते (D G M), | १५३ |
| | d. मोहमुप० (A), | १५३ |
| | e. गाथाक्षरार्थः (D G M), | १५३ |
| ९३ | a. निर्जरा (M), | १५४ |
| ९४ | a. धर्मध्यानफलानि (F G H L), | १५६ |
| ९५ | a. ०कारणाइं तओ धुवं (D M), | १५६ |
| | b. ०शुक्ल-धर्मयोर्भ० (D M), | १५६ |
| | c. ०कारणानि तस्माद् (D M), | १५६ |
| ९६ | a. ०ध्यानमिति निवेदयन्नाह (B L), | १५७ |
| | b. ०हेऊयं (D F G H M), | १५७ |
| | c. ०निर्जरे (B D E F G H I L M), | १५७ |
| ९७ | a. ०शोध्यापनयन० (B D E F), | १५७ |
| ९९ | a. तापो (D M), | १५८ |
| १०० | a. ०विरेचकौ० (B), ०वेरेको (F G), | १५८ |
| १०१ | a. धुवं (D), | १५८ |
| | b. कर्म्मेध० (D G M), | १५८ |
| | c. ज्वलनः (A B F G H) | १५८ |
| | d. शीघ्रं च दहति (D M), | १५८ |
| | e. भस्मीक० (B M), | १५८ |
| १०२ | a. किञ्च - जह वा... (F G L), | १५९ |

Jain Education International 2010_02          For Private & Personal Use Only          www.jainelibrary.org

| गाथा | पाठांतर | प.क्र. |
|---|---|---|
| | b. विलीयन्ति - विनाशं एति - गच्छन्ति (B) विलयं विनाशं यान्ति गच्छन्ति (DM), | १५९ |
| | c. तथैव (FGH), | १५९ |
| | d. घनाः कर्मघनाः, उक्तं (FGHLM), | १५९ |
| १०३ | a. प्रतीतमेव ध्यानफलं (A), प्रतीतमेव ध्यानफलमेव (H) प्रतीतमिति ध्यानफलमेव (FG), | १५९ |
| | b. हर्षादिपरिग्रहः (BDFGHML), | १५९ |
| १०४ | a. खेदादि० (FGHL), | १५९ |
| | b. चलयितुं (ABFGH), | १५९ |
| | c. एव निर्जरा० (BDHM), | १५९ |
| १०५ | a. ०गुणाधाणं (DM), | १६० |
| | b. ०गुणसंस्थानं (FG), | १६० |
| | c. तीर्थंकर-गणधरादिभि० (BDM), | १६० |
| | d. भावनया ज्ञेयं ज्ञातव्यं स्वरूपतः ध्येयं (DFGHKLM), भावनया ज्ञातव्यं स्वरूपतः ध्येयं (B) | १६० |
| | e. सर्वक्रिया० (DM), | १६० |
| | f. क्रिया यया साधूनां (DGM), | १६० |
| १०६ | a. सत्तुत्तरेण (L,C प्रतस्यार्थलेशे) | १६० |
| | b. कम्मविसोहीकरं (GJL) | १६० |
| | c. इयं गाथा नास्ति । (ADEFHIKM) | १६० |
| | ● इयं गाथा धीरसुन्दरगणिविरचित-आवश्यकावचूरौ ज्ञानसागरसूरिकृतावचूर्णौ च अस्ति । | १६० |
| | ● जइणो ।।६।। (B) | १६० |

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

पू.आ.श्रीविजयरामचन्द्रसूरिस्मृति-
संस्कृत-प्राकृतग्रन्थमाला

२३

।। प्रकाशकम् ।।

सन्मार्ग प्रकाशन

ISBN-978-81-87-163-56-5

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org